
# TANTRIK TEXTS

EDITED BY ARTHUR AVALON

VOL. XV



## BRAHMA SAMHITĀ

## VISHNUSAHASRANĀMA

CALCUTTA:
SANSKRIT PRESS DEPOSITORY,
*30, Cornwallis Street.*

LONDON:
LUZAC & CO.,
*46, Great Russell Street, W.C.*

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

२३ जून '५६, मंगलवार.

# TANTRIK TEXTS

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

# TANTRIK TEXTS

*Edited by* ARTHUR AVALON

VOL. XV.

## BRAHMA-SAMHITĀ

*with commentary*

BY JĪVA GOSVAMĪ

and

## VISHNU-SAHASRA-NĀMA

*with commentary*

BY SHAMKARACHARYA

Published for the
ĀGAMĀNUSANDHĀNA SAMITI,
By the SANSKRIT PRESS DEPOSITORY,
*30, Cornwallis Street,*
CALCUTTA.

LONDON:
LUZAC & CO.,
*46, Great Russell Street,* W.C.

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

## Introduction.

The *Brahma Samhitā* is held in very great veneration by all schools of Vaishnava Sādhakas, but by far the largest number among them know it only by name and even to the few who have had the good fortune to come across the book itself, it is not quite intelligible. This is due mainly to the defective manuscripts. The two printed editions which I have come across do not speak much in favour of the care bestowed on the publications. These remarks apply not so much to the text itself as to the way in which the masterly commentary of Jīva Gosvāmī has been dealt with. Jīva as is well known to all students of Vaishnavism, was an auther of very great powers and dealt with Vaishnavism from a very catholic point of view. The Vaishnavism which Chaitanya taught and his personal disciples laboured to preach is not what we generally come across in the present age. Jīva accompanied his two uncles Rūpa and Sanātana when they in compliance with the injunction of Chaitanya Deva whose disciples they were, went to Brindābana and spent the rest of their lives there. It was there that Jīva wrote his books. Rūpa and Sanātana were the highest officers under the Mohammadan King Hussain Shah of Gour. Rūpa's office was that of Saphar-mallika and that of Sanātana, Davir-khas. There is a document in the possession of an old Moslem family in Pirojepur to which under the Panza (hand impression) in gold of King Hussain Shah is the signature "Sanātana Davir-khas the protector of Cows and Brāhmanas". The two brothers, were very high in the favour of the King and greatly trusted and were men of immense wealth and power, but they renounced all these and lived the life of ascetics in very great povery with their nephew, who was the son of a deceased brother, in Brindābana. It was when living there that they came under the influence of Mira Bai the famous queen devotee of Jaypur who also had renounced a royal palace for a cottage in Brindābana. It was she, as the *Rasa-bhāva-prānta* says, who initiated them into Yoga practice. This book which is yet in manuscript is written in the Bengali language by a Vaishnava devotee of old and is not very generelly

Downloaded from https://www.holybooks.com

understood. A Bengali writer himself a Vaishnava, in the course of a speech delivered by him at a learned society in Calcutta interpreted a passage from this book to contain a libelous attack on Chaitanya Deva. The passage in question states that Mahāprabhu Chaitanya united with Vidhavā Brāhmanī and the speaker, not knowing that Vidhavā Brāhmanī is a name of Kundalinī Shakti, interpreted the passage in question to mean that he had some questionable connection with a Brahman widow.

The Brahma Samhitā is according to Jīva Gosvāmī composed of one hundred chapters (Adhyāya-shata-yuk). The fifth chapter according to him contains the essence of the entire book as maxims or in Sūtra form. It is on this account that he wrote the commentary to the fifth chapter alone. The book itself was brought by Chaitanya Deva from the temple of Ādi Keshava in Mallāra in the Deccan. The *Chaitanya charitāmrita* (Madhya Līlā chapter X) describes how delighted he was when he discovered this book. It also says that it contains the essence of all Vaishnava Shāstras. Shrī Chaitanya evidently got only the fifth chapter and there is no trace of the remaining 99 chapters. Part of the Nārada Pancharātra published by the Anandāshrama Press of Poona is also called Brahma Samhitā and though that also is a Vaishnava work and does not conflict with the teachings of the book here published is entirely distinct. The commentary was written by Jīva as the request of his Guru Chaitanya Deva.

The first verse of the book which has been commented upon at considerable length says that Krishna is but another name for the Supreme Brahman. He is the Lord ( Īshvara ). He is united with all the great Shaktis ( Parama ). He is Sat-Chit-Ānanda. He is without beginning ( Anādi ). He is the Source ( Ādi ), and is the Cause of all causes ( Sarva-kārana-kārana ). The commentator draws his materials in support of the interpretation as above from the Shrīmadbhāgavata, the Upanishads (mainly the Gopāla Tāpanī) the Gautamīya Tantra and the Gītā. He also argues from the grammatical construction of the word and tradition. The second verse speaks of the Lotus of a thousand petals as Gokula. This recalls Verse 49 of the Shatchakranirūpana (Vol. II of the Tantrik Texts) : "Within Her (Nirvāna-kalā) is the everlasting place called the abode of Shiva which is free from Māyā, attainable only by Yogīs and known by the name of Nityānanda. It

Downloaded from https://www.holybooks.com

is replete with every form of Bliss and is Pure Knowledge itself. Some call it the Brahman others call it Hangsa; wise men describe it as the abode of Vishnu, and righteous men speak of it as the ineffable place of Knowledge of the Ātmā, or the place of Liberation." The English reader is referred to the "*Serpent Power*" which is a translation of the Shatchakranirūpana. Verses 3 and 4 say that the Yantra wherein is the Mantra of eighteen letters is in the pericarp of the lotus. Jīva in his commentary to these verses quotes two verses rom the Gautamīya Tantra one of which says that the Devatā of the Mantra is Krishna, but the Adhishthātrī Devatā (controlling divinity) is Durgā. He further quotes a text to show that Durgā is Mahāvishnu. The other verse says that Krishna is Durgā and Durgā is Krishna and he who makes a distinction between the two is never liberated from the Samsāra. He also quotes the Sammohana Tantra which says the samething. Verse 5 say that in the filaments of the lotus abide the Āvarana Devatās of Krishna and on the petals the Shaktis. Here Jīva quotes the Brihad-Gautamīya Tantra, the Matsyapurāna, the Rikparishishta and a text whose source is not traceable. This last mentioned authority quoted speaks of the Sahasrāra lotus, on the petals whereof are the Devīs (Shaktis) and the Gopālas and in the middle of it the adorable Supreme Purusha ( Shrīparamah Purushah ). Verses 6 to 9 describe the precincts of Gokula which is square in shape and is called Shvetadvīpa. Shvetadvīpa literally means "white island" but here, as is explained later on, Shveta (white) means "pure uncontaminated by anything worldly" and Dvīpa is used in the sense of anything detached, not connected with Samsāra. It is the abode of the four manifestations (Mūrti) viz., Vāsudeva, Sangkarshana, Pradyumna and Aniruddha and it is divided into four sections. The four aims of human existence Viz., Dharma, Artha, Kāma and Moksha are there as also the four Vedas (Sāma and others) whereby the same can be attained. It is protected by ten Shūlas placed in all the ten directions. The eight gems viz., Shankha, Chakra and others; the eight Siddhis viz., Animā and others; the ten Dikpālas, Indra and others, the wonderful Shaktis Vimalā and others are there. A long passage is quoted from the Shrīmadbhāgavata (Sk. X. Ch. 28) descriptive of Gokula. There is another long passage quoted from Harivamsha (Ch. 76.). A verse is here cited (Bhgāgavata Sk.

Downloaded from https://www.holybooks.com

IV. 24, 29) which says "a man who is faithful to his own Dharma after a hundred births reaches the state of Virincha and thereafter ME (i.e. Krishna) and after death becomes Vishnu's very self." Verse 10 says that the Supreme Deva who is Sat and Ānanda is Light itself and Ātmārāma and has no intercourse (Samāgama) with Prakriti or Māyā. Ātmārāma is defined to mean he who enjoys the Eternal Bliss which is within his own self. The Supreme Deva, it is said in verse 11, who is in a state of enjoyment with Māyā (Māyayā ramamānah) is inseparate from Her (Na viyogah tayā saha) and enjoys with Her who is within Himself. This union, it is said, in the same verse, is because of their desire to create (Sisrikshayā). Another name for Māyā is Ramā and Ramā is another name for Niyati (V. 12.) and Niyati, the commentator says, is the imperishable Shakti of Hari (Anapāyinī Hareh shaktih). The commentator in support of the statement that the Devī is imperishable quotes texts from Vishnu Purāna which reads like a text from any Shākta Tantra. Verse 13 says that creation is the outcome of the union of Linga and Yoni.. Verse 14 says that Purusha is Shaktimān and Mahesvara is Lingarūpī. This is followed by a paraphrase of the Purushasūkta:—"That Purusha is thousand-headed, thousand-eyed, thousand-footed" and so forth and this Purusha, it is further said, (v. 16) is Nārāyana. Nārāyana is defined to be He who pervades humanity and in support of this the commentator quotes a text from Manusamhitā which says "Nāra" means the waters and "Nāra" and the waters are the offspring of Man (Narasunavah). He who abides in or pervades them is Nārāyana. Verse 19 says that from the left side of Purusha originated Vishnu and from his right Prajāpati (Brahmā) and from the space between the eye-brows of Purusha emanated Shambhu who is the Luminous Linga. The space between the eyebrows is the "Ājnāchakra." The "Ajnā Chakra" of Nārāyana is the place of Shambhu. This tallies with the Shākta conception of the "Ajnāchakra" where it is said, that the Linga which is in that Chakra is "Itara" which is lustrous like chains of lightning. Verse 20 speaks of the universe as the product of "Ahamkāra". This also agrees with the statement in the Sāradātilaka and other Tantras, which says the from "Ahangkāra" emanated "Vyoma" (Ether) and from "Vyoma", "Vāyu" (Air) and so on. Verse 29, gives the Mantra of eighteen letters of Krishna. Verse

Downloaded from https://www.holybooks.com

32 and 33 describe the union, in the lotus of a thousand petals of Prakriti with the ever existing and luminous "Chidānanda". Verses 34 says that the melody of Krishna's flute is Shabda-Brahman. Verse 38 to 64 contain a hymn to Krishna under the name of Govinda. The hymn speaks of the Lakshmīs or Shaktis by whom Govinda or Krishna is surrounded, of the way He protects and nourishes the worlds by His luminous form consisting of Sat Chit-Ānanda, of His nonduality or inseparateness (Advaita) from creation of His perennial youth, of the ease by which He can be attained along the path of Bhakti. At the same time, it is said, that it is difficult to reach Him by mere "Jnāna" (Vedeshu durlabham). Verse 43 says that the mind of man moves along millions of ways, but the mind of the Great Munis always tend towards Him. In verse 46, it is said, that He abides in "Gokula" surrounded by countless Kalās or Shaktis who are but His reflections. In verse 50, it is said, that it is His Māyā which brings forth (Sūte) the hundreds of worlds. This reminds one of the Vedantic text "Indro Māyābhih pururūpa iyate". In the commentary to verse 52 is quoted a long passage from Ch. IV. of the Gautamīya Tantra describing Brindābana. It reads somewhat like the description of Kailāsa as in the Mahānirvāna and non-Vaishnava Tantras. Verse 53 speaks of Durgā as His shadow (Chhāyā) and says that it is She who creates, maintains and destroys. This does not differ from what is said in the Nityāshodashikārnava (IV. 6 & 7), that the Supreme (Para) is unable to do anything without Shakti and so forth. The Devī Bhāgavata also says that it is Shakti who creates and protects. The Prapanchasāra states that Mahāvishnu speaking to Brahmā (the Creator) says "The duration of thy life is that of my outgoing breath" (Tavāyur mama nishvāsah) and here, it is said, (V. 57) that the Lords of the various worlds live during the duration of one outgoing breath of Govinda. The hymn goes on to say that all Devīs and Devas bow to Govinda as He is the Supreme Lord over all. In verse 67 Govinda is spoken of as Mahāvishnu. This book clearly shows that Krishna, Govinda, Mahāvishnu, Shiva, Brahman, are, but different names looked at in different ways of the One Supreme Spirit. This has been very well stated in verse 44 of the Satchakranirūpana in Arthur Avalon's "Serpent Power" in the following words:—"The Shaivas call it the abode of Shiva, the Vaishnavas call it Parama-Purusha, others again, call it the place

Downloaded from https://www.holybooks.com

of Hari-Hara. Those who are filled with a passion for the Lotus feet of the Devī call it the excellent abode of the Devī; and other great sages (Munis) call it the Pure place of Prakriti-Purusha."

The *Vishnusahasranāma* is a Hymn to Vishnu wherein are the thousand names which present to the votary His thousand aspects. The worshippers of other forms of the Supreme have each hymns like this. There are hymns of thousand names of Kālī, Krishna, Shiva, Tripurā Lalitā and others. This hymn to Vishnu forms the 149th chapter of the Anushāsanaparva of the Mahābhārata and the speaker is Bhīshma. This and other hymns of this class are classed under the Smritiprasthāna of Vedānta. For a complete understanding of the Vedāntadarshana it has to be studied in three different ways. The first is called Shruti-prasthāna. The books which come under this class are the Upanishads and the Agamas or Tantras. Shruti, it has been said by the sage Hārīta and the lexicographer Medinī, is both Vedik and Tantrik (Shrutishcha dvividhā proktā vaidikī tāntrikīti cha). The Vedas spoken by Brahmā, it is said, teach Pravritti Dharma and the Tantras spoken by Shiva are guides on the path of Nivritti. The Gītā Sanatsujātīya and the thousand names of Vishnu and other aspects of the divine spirit, the Mārkandeyachandī and others come under the class Smritiprasthāna and the Brahma Sūtras or Vaiyāsika Nyāyamālā, the Nyāyaprasthāna or logical method. The word Prasthāna ordinarily means the act of going. It means here a path or method. Vedānta should, therefore, be approached and looked at from three points of view otherwise one cannot get an adequate conception of all that it teaches. The *Vishnusahasranāma* thus has a prominent place in the Vaishnava-tantra. Bhīshma spoke this hymn in reply to six questions put to him by Yudhishthira, the eldest and most pious of the Pāndava brothers. His questions were (1) Who is the One Deva in this world? (Kimekang daivatang loke); (2) Who is the Supreme One to be attained? (Kim ekam pārāyanam); (3 & 4) by singing Whose praise and by worship of Whom can man get what is the Good? (Stuvantah kam kam archantah prāpnuyur mānavāh shubham); (5) What is the highest Dharma and (6) by Japa of what can man be liberated from rebirth and the bonds of Samsāra. To this Bhīshma replies as follows :—

That man is beyond all pain who is ever wakeful in singing, by His thousand names, the praise of the Lord of the World, the Deva

Downloaded from https://www.holybooks.com

among Devas Whom neither time nor space can limit and Who is Supreme both as cause and effect. This is the reply to the sixth question and he next replies to the fourth and says—that man is beyond all pain and enjoys the fruit of his devotion who in a devout spirit worships, by his mind, by speech and body, the Purusha Who is changeless and imperishable.

The third question is answered in two verses. Verse 6 says that by always singing of Vishnu Who is without beginning and end, Who is the Lord of all that is visible (or of all the Lokas) and to Whom everything is visible a man passes beyond all pain (Sarvaduhkhātigo bhavet ). Verse 7 says that the Lord is Brahmanya, knows all Dharmas and by infusing His own Shakti, He glorifies His creatures. He is supplicated by and rules all. He is Mahat or the Brahman substance because He excels all, and He is the source of all that is. Verse 8 says that the highest Dharma is that whereby man is prompted to adore and worship Him who abides in the lotus of the heart. It is so, says the commentator quoting from Vishnupurāna, because what was attainable is the Krita age by meditation, in the Tretā by Yajna and in Dvāpara by worship, is in the Kali age attained by singing (the praise of) Keshava ( Vishnu ). He quotes another text from Mahābhārata which says that whilst doing Japa the mind should be free from envy, malice and the like.

Verse 9 answers the second question and says that as He ( Vishnu ) is the Most excellent and Greatest Tejas, as He controls this and the world hereafter and all Bhūtas and His might is, therefore, not intermittent and as He is the Supreme Brahman, He is the one object of attainment.

Verse 10 answers the first question and says that as He is as above described and is besides the Pure among and the Pure, Good (Mangala) among the Good, the One Devatā among all Devatās, and the imperishable Father of all, He is the One Deva. The commentator quotes a mass of authority to show that this is so, and to show the Oneness of Brahmā, Vishnu and Shiva and of Jīva and Parama. He draws his materials from the Upanishads, the Gītā, the Mahābhārata, the Purānas, Āgama, Yoga-Yājnavalkya and others.

Having answered the questions as above Bhīsma says "Listen to the thousand names of Him from Whom in the beginning all creatures

Downloaded from https://www.holybooks.com

came and into Whom at the time of Pralaya they again disappear. These names of the Great Atmā dispel all sin and fear, and describe His attributes ( Gaunāni )." The commentary says that He is the great Âtmā and there is nothing outside Him. He is, Bhūtātmā, Indriyātmā, Pradhānātmā, Âtmā, and Paramātmā,

The names are enumerated in verses 14 to 120, It is not possible for the purposes of this introduction to do more than select some of the names and briefly give their significance as interpreted by Shankarāchārya. The hymn begins with the Pranava and the first name is Vishva ( Universe ). He is that because all creatures come from and go back to Him. He is thus the Brahman, and in verse 84, He has been so called. He is the Universe, because apart from Him there is nothing that is. To illustrate this and to prove the Oneness of the Pranava with the Universe the commentator has here also cited a large mass of texts from Shruti, Smriti, the Āgamas and every possible source available. Vishnu is the second name in Verse 14. It occurs also in verses 41 and 83. It means Vyāpanashīla (i. e. whose nature it is to spread and penetrate). It is also defined to mean One who cannot be limited by time and space (Desha-kāla-parichheda-shūnya) and penetrates and envelopes. It also means ( v. 41 ) who strides forth, the allusion being to Vishnu's Dwarf ( Vāmana ) Incarnation when He by three steps covered the Heaven, Earth and the Nether world. It also means (v. 83 ) effulgence which spreads over Heaven and Earth (Rodasī vyāpya). Under verse 13, there is a text quoted from the Vishnu Purāna which identifies Vishnu with all that is. It says :— " The Jyotīngshi ( Lights ) are Vishnu, the Bhuvanāni ( Worlds ) are Vishnu; the forests are Vishnu; the mountains are Vishnu as also are all spaces ( Dishah=the points of the compass ), the rivers, the oceans and all that exists and does not exist." There is another text quoted there from the Mahābhārata which says :— "Let not him who is not Vishnu himself, sing the praise of Vishnu. Let not such an one worship Vishnu nor meditate on Vishnu for he shall never get Vishnu." Space does not permit reproducing all the beautiful texts full of meaning cited in the commentary. One of His names ( v. 15 ) is Muktānām paramā gatih ( highest Goal of tho liberated ). Shiva ( v. 17 and 77 ) is another name and He is so called because the three Gunas are absent from Him and He is pure, and also because (77) He purifies if merely meditated upon (Smritimātrena).

Downloaded from https://www.holybooks.com

Sharva (v, 17) and Shambhu (v. 18) which are names of Shiva are also His names. Sharva means the destroyer and Shambhu, "well-being" or "he who does good." In verses 20 and 72 He is called Krishna. He is Krishna because Krishna means Sat-Chit-Ānanda and also because (72) He is Krishna Dvaipāyana which is a name of Vyāsa. Jīva Gosvāmī also, possibly following Shamkara, interprets Krishna to mean Sat-Chit-Ānanda. Īshāna another name of Shiva, is also applied (v, 21) to Vishnu for He is the Director and Ruler of all creatures (Sarva-bhūta-niyantā). A large number of the names applied to Vishnu are the names of Shiva in his Sakala aspect and of the Saguna Brahman. Rudra (v. 26) is another name of Shiva which is applied to Vishnu because on the authority of the Linga Purana, "He destroyes the pain (Ru=Duhkha) of His creatures". The word may also mean "He who at the time of final dissolution causes his creatures to weep". He is Veda (v. 27) because He destroys the darkness of ignorance. He is Vishvayoni (v. 29) because the Universe owes its existence to Him. He is Madhu (v. 30) which means wine because of the great happiness He produces. He is Mahāmāya (v. 31) because His Māyā is unsurpassable. He is Mahāshakti (v. 32). He is Shrīnivāsa (v. 33) because His Shakti, the imperishable Shrī, adides in His breast. Hangsa (v. 34) is another name and He is so called because Hangsa is derived from a combination of Aham (I) and Sah (He) and is the Mantra whereby the Oneness of the worshipper and worshipped is realised and helps the devotee to be rid of the fear of Samsāra. As the instructor of all Vidyās He is Guru (v. 36). Verse 37 contains four names namely Sahasramūrdhā, Vishvātmā, Sahasrāksha, Sahasrapāt. Three of these expressions occur in the well-known Purushasūkta as the attributes of Supreme Purusha. In Verse 39 He is called Nārāyana becāuse he abides in Nāra which means the Tattvas also collective humanity. Texts from the Mahābhārata, Shruti and the Purānas are cited in support of this interpretation. He is called Mantra (v. 43) because all Mantras point to Him, and also because He can be understood by Mantras (Mantrabodhyatvāt). In verse 46, it is said, that He is Adrishta (invisible, imperceptible) because He is beyond the scope of the senses and He is also called Vyaktarūpa (Manifest), because, in His manifestations, He is visible to all and His true Self is manifest to the Yogīs. He is Deva (v. 54) because He is Light and also plays with Creation, Preservation and so forth. He is

Downloaded from https://www.holybooks.com

Rāma (v.56) because Rāma is but another name for Supreme Brahman.

In verse 57 He is called Vaikuntha. The particle 'Vi', according to Shamkara means 'various' (Vividha). Kunthā means restriction (Gatch pratihatih); and Vishnu is Vaikuntha because at the time of creation He collected together and restricted the movements of scattered Bhūtas. [Vaikuntha is ordinarily said to be Vishnu's heaven. The word is formed by the negative particle 'Vi' and 'Kunthā' which mean diffidence, hesitation, ignorance and the like. It is Vaikuntha because His devotees are freed from all ignorance and hesitation when they know Him.] He is (v. 57) Hiranygarbha which is a name of Brahmā the Creator. He is Vyāpī because like the etherial region He is spread everywhere. In verse 64 are four names viz., Sat, Asat, Kshara and Akshara. Sat is the Supreme Brahman (Param Brahma). Asat is Brahman in His manifestation (Aparam Brahman). He is thus Brahman both Immanent and Transcendent. He is Kshara or perishable as the Bhūtas and Akshara or imperishable in His own true nature. He is Gabhastinemi (v. 65) because as the Sun, He is the centre of the circle of lights. He drinks Soma (v.67) and, therefore, is Somapa. He drinks nectar and is therefore Amritapa and is Soma because as Shiva He is united with Umā.

In verse 70 it is said that He is Maharshi Kapilāchārya. It is so because Vishnu as Kapila was the teacher (Āchārya) of the Sānkhya Darshana which contains the knowledge (Vijnāna) of the Shuddha Tattvas. Verse 71 speaks of Him as Chakra-gadādhara (the holder of the discus and the mace). Chakra (Discus) means Manastattva which is restless like a circular body and Gadā (Mace) is Buddhitattva which is certain for the stroke of a mace is so. Banamālī (wearer of the garland Banamālā V. 73.) means that the Bhūta Tanmātras are in Him. Vyāsa (v. 74) is Vishnu because it is by Vishnu as Vyāsa were divided (Vyasta) the Vedas into four, the Puranas into eighteen, and so also other branches of learning. He is the Healer (Bhishak v. 75) because He cures His devotees from the disease of Samsāra and shows them the paths to Liberation. In same verse it is said He is Shama, Shānta and Shānti. He is (v. 76) Brishabhāksha because his vision (Akshi=eye) is Brishabha (Dharma) and He Brishapriya because Brisha or Dharma is what He loves. He is Shrīsha (v. 78) because He is the Lord (Īsha)

Downloaded from https://www.holybooks.com

of Shrī or Lakshmī and Shrīdhara as He carries on His breast Shrī the mother of all creatures. As He is beyond all the Gunas He Vishuddhātmā (v. 81). In verse 84 it is said that He is Brahmā as creator and Brahman because He is great and nourishes (Brihattvāt, bringhanavāt) and Brāhmana-priya as He loves or is loved by the knower of the Brahman. He is ( v. 86 ) Stava ( praise or adoration ), Stotra, Stuti and Stotā. He is ( v. 87 ) Havih for as has been said in the Gītā and elsewhere "the Brahman is the offering, the offerer" and so forth. In verse 90 it is said He is Vishvamūrti, Mahāmūrti, Dīptamūrti, Amūrtimān and Anekamūrti, because He assumes countless forms for the world. He is Avyakta (Unmanifest ) because He cannot be pointed out as this or like this ( Ayam indrisha eveti na vyajyate ). He is (v. 91) Ekah, Naikah. "He is "Ka" ( Brahman ) "Kim" ( also Brahman ) and Yat and Tat ( which also mean Brahman ). He is ( v. 92 ) Shūnya ( Void ) because there is nothing special about Him ( Sarva-vishesha-rahitatvāt ). He is ( v. 95 ) Chaturmūrti because He is Virāt, Sūtrātmā, Avyākrita and Turīya, He is Chaturgati as He is the four Āshramas (Brahmachārī, Grihastha, &c. ) and the four Varnas (Brāhmana, Kshatriya &c. ); He is Chaturātmā because he is Manas, Buddhi, Ahamkāra and *Chitta;* He is Chaturbhāva ( Fourfold aspect ) because from, Him are Dharma, Artha, Kāma and Moksha. He is ( V. 101 ) Sulabha ( easily attained ) because the devotee can attain to Him by any offering however humble if made in a devout spirit. He is ( V. 102 ) Achintya and ( V. 103 ) Anu, Brihat, Krisha, Sthūla, endowed with Gunas ( Gunabhrit ) and Nirguna ( without Gunas ). He is Āshrama as He is the refuge of all. He is ( v. 106 ) Abhiprāya because those who seek the fourfold aims of human existance tend towards Him or because at the time of Dissolution the world goes back to Him. He is (v. 108 ) Naikaja ( not once born ) because he was born many times for the protection of Dharma. He is (v. 110 ) Shabdātiga because He is ineffable. In verse 112 one of the names given is Santah. A man who follows the right path is called 'Sat" or good; "Santah" is the plural form of "Sat". Because, as the commentary says, in the forms of good men Vishnu promoted Vidyā (Knowledge) and Vinaya (Humility), He is Santah. The Bengal MSS quotes a number of texts which are not traceable to any book and which are in some places somewhat obscure to

Downloaded from https://www.holybooks.com

show what constitutes goodness of behaviour. There is another name in this verse Jīvana (Life) because He is the life in all created beings. He is (V.117/18) Yajna Yajnapati, Yajvā, Yajnabrit, Yajnakrit, Yajnasādhana, Yajnāntakrit. He is (V.120) Shangkhabhrit or carries the conch which is Bhautika Ahamkāra. He is Chakrī because the wheel of Samsāra goes round at His behest. He is Shārangadhara because His Shāranga or Dhanu (bow) is Indriyādi Ahamkāra. The last of the names is Sarva-praharanāyudha, (He who has all the weapons) and this name is twice repeated followed by 'Om namah'. This name says the commentary, indicates that He is the Lord of all (Sarveshvara) and the double repetition shows the end of the Hymn. The hymn began with OM and ends with OM because 'OM' is auspicious. The verses which follow give the Phalashruti. In Verses 122, 123 it is said that by daily recitation of or listening to these names man escapes all evil both in this and the world hereafter. The Brāhmana by repeating this becomes Master of Vedānta, the Kshatriya becomes victorious, the Vaishya acquires wealth and the Shūdra becomes happy. In the commentary however it is said that the Shūdra by merely listening to this becomes happy and the other three castes have to recite them. Verse 133 says that by daily repetition of it man conquers anger, malice, greed and all evil inclinations. Verse 136 says the Senses (Indriyāni), Manas, Buddhi, Magnanimity, Courage, Strength, Endurance, the Body (Kshetra) and individual Spirit (Kshetrajna=jīva) are all of Vāsudeva (Vāsudevātmakāni). The Āchāra of the Sādhaka should, it is said in verse 137, be as enjoined in any of the Āgamas. The follower of all Āgamas may repeat these names. Dharma is based on Āchāra and the Lord of Dharma is imperishable Vishnu. Then the text goes on to say "the Rishis, the Pitris, the Devas, the Mahābhūtas all that is moving and motionless have their origin in Him. Yoga and the Jnāna acquired thereby, Sāmkhya (Discrīmination between Chit and Achit) and every branch of learning and the arts and sciences (Shilpādi) come from Janārdana (Vishnu). The one Vishnu in countless forms spreads over the three worlds and enjoys the material world which is His glory manifest. He, who worships the Lotus-eyed eternal Deva, the Lord of the Universe, the Origin and Place of Dissolution of the world, knows no defeat."

A. A. S.

Downloaded from https://www.holybooks.com

# ब्रह्मसंहिता

पञ्चमोऽध्यायः

जीवगोस्वामिकृत टीकोपेतः ।

---

# श्रीश्रीविष्णुसहस्रनामस्तोत्रम्

शाङ्करभाष्योपेतम्

श्रीआर्थार एवेलनेन सम्पादितम् ।

कलिकातानगर्य्यां १८।२ नं शिवनारायणदासलेनस्थ सिद्धेश्वरयन्त्रे
श्रीअविनाशचन्द्रमण्डलद्वारा मुद्रितम् ।

कलिकातानगर्य्यां ३० नं कर्णओयालिसष्ट्रीटस्थ
संस्कृतप्रेसडिपजिटरी कर्त्तृकेन
प्रकाशितम् ।

लण्डनराजधान्यां लुज्याक एण्ड कीं सदने
प्राप्तव्यम् ।

संवत् १९८५

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

# ब्रह्मसंहिता

## पञ्चमोऽध्यायः

श्रीश्रीराधाकृष्णाभ्यां नमः

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥

श्रीकृष्णरूपमहिमा मम चित्ते सहीयताम् । यस्य प्रसादाद्व्याकर्तुमिच्छामि ब्रह्मसंहिताम् ॥
दुर्योजनाऽपि युक्तार्था सुविचाराद्दृषिस्मृतिः । विचारे तु ममात्र स्याद्दृषीणां स ऋषिर्गतिः ॥
यद्यप्यध्यायशतयुक् संहिता सा तथाप्यसौ । अध्यायसूत्ररूपत्वात्तस्याः सर्वाङ्गतां गतः ॥
श्रीमद्भागवताद्येषु दृष्टं यन्मृष्टबुद्धिभिः । तदेवात्र परामृष्टं ततो हृष्टं मनो मम ॥
यद्द यच्छ्रीकृष्णसन्दर्भे विस्तराद्विनिरूपितम् । अत्र तत् पुनरामृश्य व्याख्यातुं स्पृह्यते मया ॥

अथ श्रीभागवते यदुक्तम्—एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इति । तदेव तावत् प्रथममाह—ईश्वर इति । अत्र कृष्ण इत्येव विशेष्यं तन्नाम एव । 'कृष्णावतारोत्सव-सम्भ्रमोऽस्पृशन्' इत्यादौ श्रीशुकादिमहाजनप्रसिद्धया । 'कृष्णाय वासुदेवाय देवकीनन्दनाय' इत्यादि सामोपनिषदि च प्रथमप्रतीतत्वेन तन्नामवर्णाविर्भावकता गर्गेण प्रथममुद्दिष्टत्वेन । तथाच मन्त्रमधिकृत्य पयसा कुम्भं पुरयतीति न्यायेन तत्राग्रतः पठितत्वेन मूलरूपत्वात् । तदुक्तं प्रभासखण्डे पद्मपुराणे च नारदकुशध्वजसंवादे श्रीभगवदुक्तौ ।

नाम्नां मुख्यतमं नाम कृष्णाख्यं मे परन्तप । इति ।

अतएव ब्रह्माण्डपुराणोक्त कृष्णाष्टोत्तरशतनामस्तोत्रे ।

सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत् फलम् । एकावृत्त्या तु कृष्णस्य नामैकं तत् प्रयच्छति ॥

इत्यत्र श्रीकृष्णस्येत्येवोक्तम् । यस्त्वग्रे गोविन्दनाम्ना स्तोष्यते तत् खलु कृष्णत्वेऽपि तस्य गवेन्द्रत्ववैशिष्टदर्शनार्थमेव । तदेवं रूढ़िबलेन प्राधान्यात्तस्यैवेश्वर इत्यादीनि विशेषणानि । अथ गुणद्वारापि तद्दृश्यते । यथाह गर्गः ।

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः । शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥
प्रागयं वसुदेवस्य क्वचिज्जातस्तवाऽऽत्मजः । वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥

Downloaded from https://www.holybooks.com

बहूनि सन्ति नामानि रूपाणि च सुतस्य ते। गुणकर्म्मानुरूपाणि तान्यहं वेद नो जनाः ॥

अस्य कृष्णत्वेन दृश्यमानस्य प्रतियुगं नाना तनूरवतारान् गृह्णतः प्रकाशयतः शुक्लादयो वर्णास्त्रय आसन् प्रकाशमवापुः। सत्यादौ शुक्लादिरवतार इदानीं साक्षादस्याऽवतारसमये कृष्णतां गतः। एतस्मिन्नेवान्तर्भूतः। अतएव कृष्णे कर्तृत्वात् सर्वोत्कर्षकत्वात् कृष्णेति मुख्यं नाम। तस्मादस्यैव तानि रूपाणीत्याह बहूनीति। तदेवं गुणद्वारा तन्नाम्नि प्राधान्य-सूचकस्य कृष्णस्य तन्नाम्नः प्राधान्ये लब्धे

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति योगवृत्तित्वेऽपि तस्य तादृशत्वं लभ्यते। न चेदं पद्यमन्यपरम्। तदुपासनातन्त्र-गौतमीयतन्त्रे अष्टादशाक्षरमन्त्रव्याख्यायां तदेतत्तुल्यं पद्यं दृश्यते।

कृषशब्दस्य सत्तार्थो णश्चाऽऽनन्दस्वरूपकः। सुखरूपो भवेदात्मा भावानन्दमयस्ततः ॥ इति ॥

तस्मादयमर्थः। भवन्त्यस्मात् सर्वेऽर्था इति भूस्तत्वर्थ उच्यते। भावशब्दवत् स चात्र कर्षतेरेवार्थस्तस्यैव प्राप्तत्वात्। गौतमीये भूशब्दस्य सत्तावाचकत्वेऽपि तद्धात्वर्थः सत्तैवोच्यते। घटशब्दस्य प्रतिपाद्यमानत्वेन सहसा सामान्याधिकरण्यासम्भवात् हेतुहेतुमत्तावत् भेदोपचारः कार्य्यः तत्राकर्षाभिप्रायः। घटत्वं सत्तावाचकमित्युक्ते घटसत्तैव गम्यते न तु पटसत्ता न सामान्य-सत्तेति। अथ निर्वृतिरानन्दस्तयोरैक्यं सामानाधिकरण्येन व्यक्तं यत् परं ब्रह्म सर्वतोऽपि सर्वस्यापि बृंहणं वस्तु तत् बृहत्तमम्। कृष्ण इत्यभिधीयते। ईर्य्यते इति वा पाठः। किन्तु कृषिराकर्षमात्रार्थकेन णशब्दस्य च प्रतिपाद्येनाऽऽनन्देन सह सामानाधिकरण्यासम्भवाद्धेतुहेतु-मतोरभेदोपचारः कार्य्यः। तत्राऽऽकर्षप्राचुर्य्यार्थमायुर्घृतमितिवत्। परंब्रह्मशब्दस्य तत्तदर्थश्च। 'बृहत्त्वाद् बृंहणत्वाच्च तद्ब्रह्म परमं विदुः' इति विष्णुपुराणात्। 'अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति' इति श्रुतेश्च। एवमेवोक्तं बृहद्गौतमीये।

कृषिशब्दो हि सत्तार्थो णश्चाऽऽनन्दस्वरूपकः। सत्तास्वानन्दयोर्योगाच्चित् परंब्रह्म चोच्यते ॥ इति ॥

अद्वयब्रह्मवादिभिरपि सत्तानन्दयोरैक्यं तथा मन्तव्यम्। शाब्दिकैर्भिन्नाभिधेयत्वेन प्रतीतेः। सत्ताशब्देन चात्र सर्व्वेषां सतां प्रवृत्तिहेतुर्यत् परमं सत् तदेवोच्यते। 'सदेव सौम्येदमग्र आसीत्' इति श्रुतेः। अभिन्नाभिधेयत्वे बृहत्स्वरूपरितिवद्विशेषेण विशेष्यत्वायोगादेकस्य वैयर्थ्याच्च।

गौतमीयपद्यञ्चैवं व्याख्येयम्। पूर्वार्द्धे सर्वाकर्षणशक्तिविशिष्ट आनन्दः कृष्ण इत्यर्थः। उत्त-रार्द्धे यस्मादेवं सर्वाकर्षकसुखरूपोऽसौ तस्मादात्मा जीवश्च तत्र सुखरूपो भवेत्। तत्र हेतुः। 'भावः प्रेमा तन्मयानन्दत्वात्' इति। तदेवं रूपगुणाभ्यां परमबृहत्तमः सर्वाकर्षक आनन्दः कृष्णशब्दवाच्य इति ज्ञेयम्। स च शब्दः श्रीदेवकीनन्दन एव रूढ़ः। अस्यैव सर्वानन्दकत्वं वासुदेवोपनिषदि दृष्टम्। 'देवकीनन्दनो निखिलमानन्दयेत्' इति। आनन्दमात्रमविकार-मनन्यसिद्धम्। ततश्चासौ शब्दो नान्यत्र संक्रमणीयः। यथाह भट्टः।

Downloaded from https://www.holybooks.com

लब्धात्मिका सती रूढ़िर्भवेद् योगापहारिणी । कल्पनीया तु लभते नात्मानं योगबाधतः ॥ इति ॥

परं ब्रह्मत्वञ्च श्रीभागवते । 'गूढं परं ब्रह्म मनुष्यलिङ्गम्' इति । 'यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्' इति च । श्रीविष्णुपुराणे । 'यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति' इति । श्रीगीतासु च । 'ब्रह्मणो हि प्रतिष्ठाऽहम्' इति । तापनीषु च । 'योऽसौ परं ब्रह्म गोपालः' इति ।

अथ मूलमनुसरामः । यस्मादेतादृक् कृष्णशब्दवाच्यस्तस्मादीश्वरः सर्ववशयिता । तदिदमुपलक्षितं हृद्गृहीतमीये कृष्णशब्दस्यैवार्थान्तरेण ।

अथवा कर्षयेत् सर्वं जगत् स्थावरजङ्गमम् । कालरूपेण भगवांस्तेनायं कृष्ण उच्यते ॥ इति ॥

कलयति नियमयति सर्वमिति हि कालशब्दार्थः । तथा च तृतीये तमुद्दिश्योद्धवस्य च पूर्ण एव निर्णयः ।

स्वयन्त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
बलिं हरद्भिश्चिरलोकपालैः किरीटकोटीड़ितपादपीठः ॥ इति ॥

श्रीगीतासु । 'विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति । तापन्याम् ।

एको वशी सर्व्वगः कृष्ण ईड्य एकोऽपि सन् बहुधा यो विभाति ।
तं पीठस्थं येऽनुभजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ इति ॥

यस्मादेव तादृगीश्वरस्तस्मात् परमः । पराः सर्वोत्कृष्टा मा लक्ष्मीरूपाः शक्तयो यस्मिन् । तदुक्तं श्रीभागवते । 'रेमे रमाभिर्निजकामसंप्लुतः' इति ।

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥ इति ॥
तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः । मध्ये मणीनां हैमानां महामरकतो यथा ॥ इति ॥
ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः । व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ इति च ।

अत्रैवाग्रे वक्ष्यते । 'श्रियः कान्ताः कान्तः परमपुरुषः' इति । तापन्यां च । 'कृष्णो वै परमं दैवतम्' इति । यस्मादेव तादृक् परमस्तस्मादादिश्च । तदुक्तं श्रीदशमे ।

श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः । आहोपायं तमेवाऽऽद्य उद्धवो यमुवाच ह ॥ इति ॥

टीका च स्वामिपादानाम् । आद्यो हरिः श्रीकृष्ण इत्येषा । एकादशे तु तस्य श्रेष्ठत्वमाद्यत्वञ्च युगपदाह । 'पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि' । इति ।

न चैतदादित्वं तदवतारापेक्षं किन्तु अनादिः न विद्यते आदिर्यस्य तादृशम् । तापन्याञ्च 'एको वशी सर्व्वगः कृष्ण' इत्युक्त्वाऽऽह

'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' । इति ॥

Downloaded from https://www.holybooks.com

यस्मादेव तादृशतया आदिस्तस्मात् सर्वकारणकारणम्। सर्वेषां कारणं महत् स्रष्टा पुरुषस्तस्यापि कारणम्। तथा च दशमे तं प्रति देवकीवाक्यम्।

यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः।
भवन्ति किल विश्वात्मंस्तं त्वाऽद्याऽहं गतिं गता ॥ इति।

टीका च। हे आद्य यस्यांशः पुरुषस्तस्य अंशो माया तस्या अंशा गुणाः। तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवन्ति। तं त्वा त्वां गतिं शरणं गताऽस्मीत्येषा।

तथा च ब्रह्मस्तुतौ। 'नारायणोऽङ्गं नरभू-जलायनात्' इति। भारते च।

नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः। तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ॥

इत्यनेन लक्षितो नारायणः स तवाङ्गं त्वं पुनरङ्गीत्यर्थः। श्रीगीतासु। 'विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति। तदेवं कृष्णशब्दस्य यौगिकार्थोऽपि साधितः। ये च तच्छब्देन कृषिणाभ्यां परमानन्दमात्रं वाचयन्ति तेऽपि ईश्वरादिविशेषणैस्तत्र स्वाभाविकीं शक्तिं मन्येरन्। तस्मिन् तस्मान्न द्वितीयत्वेन सर्वकारणत्वेन च वस्त्वन्तरशक्त्यारोपायोगात्। तथा च श्रुतिः। 'आनन्दं ब्रह्मेति'। 'को ह्येवान्यत् कः प्राण्याद् य आकाश आनन्दो न स्यात्'। 'आनन्दाद्ध्येवमानि भूतानि जायन्ते'।

न तस्य कार्य्यं करणञ्च विद्यते न तत्समश्चाऽभ्यधिकश्च दृश्यते।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ इति ॥

ननु स्वमते योगवृत्तौ च सर्वाकर्षकपरमबृहत्तमानन्दः कृष्ण इत्यभिधानादविग्रह एव स इत्यवगम्यते। आनन्दस्य विग्रहानवगमात्। सत्यम्। किन्त्वयं परमोऽपूर्वः पूर्वसिद्धानन्द-विग्रह इति। सच्चिदानन्दविग्रहो लक्षणो यो विग्रहस्तद्रूप एवेत्यर्थः। तथा च श्रीदशमे ब्रह्मणस्तवे। 'त्वय्येव नित्यसुखबोधतनावनन्ते' इति। तापनी-हयशीर्षयोरपि। 'सच्चिदानन्द-रूपाय कृष्णायाक्लिष्टकारिणे' इति। ब्रह्माण्डे च श्रीकृष्णाष्टोत्तरशतनामस्तोत्रे। 'नन्द-व्रजजनानन्दी सच्चिदानन्दविग्रहः' इति। एतदुक्तं भवति। सत्यं खल्वव्यभिचारत्वमुच्यते तद्रूपत्वञ्च तस्य श्रीदशमे ब्रह्मादिवाक्ये 'सत्यव्रतं सत्यपरं त्रिसत्यम्' इत्यत्र व्यक्तम्। श्रीदेवकी-वाक्ये च।

नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु।
व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः ॥
योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम्।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥
मर्त्यो मृत्युव्यालभीतः पलायन् लोकान् सर्वान्निर्भयं नाध्यगच्छत्।
त्वत्पादाब्जं प्राप्य यदृच्छयाऽद्य स्वस्थः शेते मृत्युरस्मादपैति ॥

Downloaded from https://www.holybooks.com

इत्यादि सर्वा। 'एकोऽसि प्रथमम्' इत्यादि श्रीब्रह्मणो वाक्ये तदिदं ब्रह्माऽद्वयं शिष्यते। इति। श्रीगीतासु। 'ब्रह्मणो हि प्रतिष्ठाऽहम्' इति।

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ इति॥

तापन्याम्। 'जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयम्। योऽसौ सौर्य्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान् पालयति योऽसौ गोपेषु तिष्ठति योऽसौ सर्वेषु देवेषु तिष्ठति योऽसौ सर्व्वैर्देवैर्गीयते योऽसौ सर्वेषु भूतेष्वाविश्य तिष्ठति भूतानि च विदधाति स वो हि स्वामी भवति' इति। गोविन्दान्मृत्युर्बिभेति 'गोपीजनवल्लभज्ञानेन तज्ज्ञानं भवति' इति च। तत्र पूर्वत्र सौर्य्ये इति। सौरी यमुना तददूरभवदेशे वृन्दावन इत्यर्थः। अथ चिद्रूपत्वं स्वप्रकाशत्वेन परप्रकाशकत्वम्। तच्चोक्तं श्रीदशमे ब्रह्मणा

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनन्त आद्यः।

नित्योऽक्षरोऽजस्रसुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः॥

तापन्याम्।

यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापयति स्म कृष्णः।

तं ह देवमात्मवृत्तिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत्॥ इति।

'न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैवैष आत्मा वृणुते तनुं स्वाम्' इति श्रुत्यन्तरवत्। यथानन्दरूपत्वं सर्वांशेन निरुपाधिपरमप्रेमास्पदत्वम्। तच्च श्रीदशमे ब्रह्मस्तवान्ते 'ब्रह्मन् परोद्भवे कृष्ण' इत्यादि प्रश्नोत्तरयोर्व्यक्तम्। तथा चानुभूतमानकदुन्दुभिना।

विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः। केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक्॥ इति॥

'आनन्दं ब्रह्मणो रूपम्' इति श्रुत्यन्तरवत्। तदेवं सच्चिदानन्दविग्रहरूपत्वे सिद्धे विग्रह एवाऽऽत्मा तथाऽऽत्मा एव विग्रह इति सिद्धम्। ततो जीववद् देहित्वं तस्य नेत्यपि सिद्धान्तितम्। यथोक्तं शुकेन।

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।

जगद्धिताय सोऽप्यत्र देहीवाऽऽभाति मायया॥ इति।

तथापि तस्य देहिवल्लीला कृपापरवशतयैवेत्यर्थः। 'माया दम्भे कृपायाञ्च' इति विश्वप्रकाशः। तदेवमस्य तथा तल्लक्षणं श्रीकृष्णरूपत्वे सिद्धे चोभयलीलाभिनिविष्टत्वेन क्वचिद् वृष्णीन्द्रत्वं क्वचिद् गोविन्दत्वञ्च दृश्यते। यथाह द्वादशे सूतः।

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनीध्रुग्राजन्यवंशदहनाऽनपवर्गवीर्य्य।

गोविन्द गोपवनिता व्रजभृत्यगीत तीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान्॥ इति॥

स्वाभीष्टरूप लीलापरिकरविशिष्टतया गोविन्दत्वमेव स्वाराध्यत्वेन योजयति गोविन्द इति।

Downloaded from https://www.holybooks.com

यथात्रैवाग्रे स्तोष्यते। 'चिन्तामणिप्रकरसद्मसु कल्पवृक्ष' इत्यादि। श्रीदशमे श्रीगोविन्दाभिषेकारम्भे सुरभिवाक्यम्। 'त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते' इति। 'अभ्यषिञ्चत दशार्हं गोविन्द इति चाभ्यधात्' इत्युक्त्वा तत्प्रकरणान्ते श्रीशुकप्रार्थना। 'प्रीयान्न इन्द्रो गवामिति'। गवां सर्वाश्रयत्वाद्गवेन्द्रत्वेनैव सर्वेन्द्रत्वसिद्धेः। न चेदं न्यूनं मन्तव्यम्। तथाहि गोसूक्तम्। गोभ्यो यज्ञाः प्रवर्त्तन्ते गोभ्यो देवाः समुत्थिताः। गोभिर्वेदाः समुद्गीर्णाः षड़ङ्गपदकक्रमाः॥ इति।

अस्तु तावत् परमगोलोकादवतीर्णानां तासां गवामिन्द्रत्वमिति। ब्रह्मणा तदीयमेव स्वेनाराधितं प्रकाशितम्। तापनीषु च।

तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्च-
पदं वृन्दावने सुरभूरुहतलासीनं सततं
समरुद्गणोऽहं परमया स्तुत्या तोषयामि। इति।

तथैव श्रीदशमे।

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्।
यज्जीवितन्तु निखिलं भगवान् मुकुन्दस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव॥ इति॥

तत्र श्रीनन्दनन्दनत्वेनैव तं लब्धं तत्प्रार्थना।

नौमीड्य तेऽभ्रवपुषे तड़िदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय।
वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय॥ इति॥

तदेवं गोविन्दादिशब्दस्य परमैश्वर्य्यमयस्य सार्थताऽपि तेनाभिमता। तथा चोक्तम्। ईश्वरत्वपरमेश्वरत्वानुवादपूर्वकतात्पर्य्यावसानतया गौतमीयतन्त्रे श्रीमद्दशाक्षरमन्त्रार्थकथने।

गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः। अनयोराश्रयो व्याप्त्या कारणत्वेन चेश्वरः॥
सान्द्रानन्दं परं ज्योतिर्वल्लभेन च कथ्यते। अथवा गोपीप्रकृतिर्जनस्तदंशमण्डलम्॥
अनयोर्वल्लभः प्रोक्तः स्वामी कृष्णाख्य ईश्वरः। कार्य्यकारणयोरीशः श्रुतिभिस्तेन गीयते॥
अनेकजन्मसिद्धानां गोपीनां पतिरेव वा। नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धनः॥ इति॥

प्रकृतिमिति मायाख्यां जगत्कारणशक्तिमित्यर्थः। तत्त्वसमूहको महदादिरूपः। अनयोराश्रयः सान्द्रानन्दं परं ज्योतिरीश्वरो वल्लभशब्देन कथ्यते। ईश्वरत्वे हेतुर्व्याप्त्या कारणत्वेन चेति। प्रकृतिरिति स्वरूपभूता मायातीता वैकुण्ठादौ प्रकाशमाना महालक्ष्म्याख्या शक्तिरित्यर्थः। अंशमण्डलं सङ्कर्षणादित्रयम्। अनेकजन्मसिद्धानामित्यत्र 'बहूनि मे व्यतीतानि जन्मानि तव चार्जुन' इति श्रीभगवद्गीतावचनादनादिजन्मपरम्परायामेव। तात्पर्य्यम्। तदेवमत्रापि नन्दनन्दनत्वेनाऽभिमतम्। श्रीगर्गेण च तथोक्तम् 'प्रागयं वसुदेवस्य क्वचिज्जातस्तवाऽऽत्मजः' इति। युक्तं च तत्। आत्मजं हि तस्य श्रीवसुदेवस्यापि मनस्याविर्भूतत्वमेव मतम्। 'आविवेशांशभागेन मन आनकदुन्दुभेः' इति। व्रजेश्वरस्यापि तथाऽऽसीदेव श्रीभगवत्प्रादुर्भावस्य पूर्वाव्यवहितकालं

Downloaded from https://www.holybooks.com

सहस्रपत्रं कमलं गोकुलाख्यं महत्पदम् ।
तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम् ॥ २ ॥
कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकम् ।
षड़ङ्ग-षट्पदी-स्थानं प्रकृत्या पुरुषेण च ॥ ३ ॥

व्याप्य तथा सर्वत्र दर्शनात् । किन्त्वात्मनि तस्याऽऽविर्भावे सत्यप्यात्मजत्वाय पितृभावमयशुद्ध-महाप्रेमैव प्रयोजकम् । ब्रह्मणः सकाशाद्वराहदेवस्याऽऽविर्भावेऽपि ब्रह्मणि वराहदेवे लोके च तदवगमादर्शनात् । तादृशशुद्धप्रेमा तु श्रीव्रजराज एव । श्रीवसुदेवे त्वैश्वर्यज्ञानप्रतिबद्ध इति साधूक्तम् । 'प्रागयं वसुदेवस्य' इति । अतः श्रीमद्दशाक्षरविनियोगेऽपि तन्मय एव दृश्यते ॥ १ ॥

अथ तस्य तद्रूपतासाधकं नित्यं धाम प्रतिपादयति सहस्रपत्रं कमलमित्यादिना । सहस्राणि पत्राणि यत्र तत्कमलमित्यादिना भूमिश्चिन्तामणिगुणमयीति वक्ष्यमाणाच्चिन्तामणिमयं पद्मं तद्रूपं तच्च महत् सर्वोत्कृष्टं पदं स्थानम् । महतः श्रीकृष्णस्य महाभगवतो वा पदं महा-वैकुण्ठरूपमित्यर्थः । तत्तु नानाप्रकारं श्रूयते इत्याशङ्क्य विशेषणत्वेन निश्चिनोति गोकुलाख्य-मिति । गोकुलमित्याख्या रूढ़िर्यस्य तत् गोपावासरूपमित्यर्थः । रूढ़िर्योगमपहरतीति न्यायेन तस्यैव प्रतीतिः । एतदभिप्रेत्योक्तं श्रीदशमे 'भगवान् गोकुलेश्वरः' इति । अतएव तदनुकूलत्वेनोत्तरग्रन्थेऽपि व्याख्येयम् । तस्य श्रीकृष्णस्य श्रीनन्द यशोदादिभिः सह वासयोग्यं महान्तःपुरम् । तैः सहवासिता त्वग्रे समुद्देक्ष्यते । तस्य स्वरूपमाह तदिति । अनन्तस्य बलदेव-स्यांशेन ज्योतिर्विभागविशेषेण सम्भवः सदाऽऽविर्भावो यस्य तत् । तथा तत्त्वेणैतदपि बोध्यते । अनन्तः अंशो यस्य तस्य श्रीबलदेवस्यापि सम्भवो निवासो यत्र तदिति ॥ २ ॥

सर्वमन्त्रगणसेवितस्य श्रीमदष्टादशाक्षराख्य महामन्त्रराजपीठस्य मुख्यपीठमिदमित्याह कर्णिकारमिति द्वयेन । महद्यन्त्रमिति यत्प्रकृतिरेव सर्वत्र यन्त्रत्वेन पूजार्थं लिख्यत इत्यर्थः । यन्त्रमेव दर्शयति षट्कोणान्यभ्यन्तरे यस्य तत् । वज्रकीलकं कर्णिकारे वीजरूपहीरककीलक-शोभितम् । मन्त्रे च चकारोपलक्षिता चतुरक्षरी कीलरूपा ज्ञेया । षट्कोणत्वे प्रयोजनमाह । षट् अङ्गानि यस्याः सा षट्पदी श्रीमदष्टादशाक्षरी तस्याः स्थानं प्रकृतिर्मन्त्रसङ्घरूपम् स्वयमेव श्रीकृष्णः कारणरूपत्वात् । तच्चोक्तम् ऋष्यादिस्मरणे 'कृष्णः प्रकृतिः' इति । पुरुषश्च स एव तदधिष्ठातृदेवतारूपः ताभ्यामवस्थितमधिष्ठितम् । स हि चतुर्धा प्रतीयते । मन्त्रस्य कारण-त्वेन वर्णसमुदायरूपत्वेन अधिष्ठातृदेवतारूपत्वेन आराध्यरूपत्वेन च । तत्र कारणत्वे-नाऽधिष्ठातृरूपत्वेनाऽत्रोच्यते । आराध्यरूपत्वेन प्रागुक्तः 'ईश्वरः परमः कृष्णः' इति । वर्णरूप-त्वेनाग्रत उद्धरिष्यते 'कामः कृष्णाय' इति । यथोक्तं हयशीर्षपञ्चरात्रे ।

Downloaded from https://www.holybooks.com

प्रेमानन्द-महानन्दरसेनावस्थितं हि यत्।
ज्योतीरूपेण मनुना कामबीजेन सङ्गतम् ॥ ४ ॥
तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ॥ ५ ॥

वाच्यत्वं वाचकत्वञ्च देवतामन्त्रयोरिह। अभेदेनोच्यते ब्रह्मन् तत्त्वविद्भिर्विचारितः ॥ इति।
गोपालतापनीश्रुतिषु।

वायुर्यथैको भुवनं प्रविष्टो जन्ये जन्ये पञ्चरूपो बभूव।
कृष्णस्तथैकोऽपि जगद्धितार्थं शब्देनाऽसौ पञ्चपदो विभातीति ॥ इति ॥

क्वचिद् दुर्गाया अधिष्ठातृत्वन्तु शक्तिशक्तिमतोरभेदविवक्षया। अतएवोक्तं गौतमीये कल्पे।

नारदोऽस्य ऋषिः प्रोक्तश्छन्दो विराड़िति स्मृतम्।
श्रीकृष्णो देवता चास्य दुर्गाऽधिष्ठातृदेवता ॥ इति ॥

यः कृष्णः सैव दुर्गा स्याद् या दुर्गा कृष्ण एव सः। अनयोरन्तरादर्शी संसारान्नो विमुच्यते ॥
इत्यादि। अतः स्वयमेव श्रीकृष्णस्तत्र स्वरूपशक्तिरूपेण दुर्गा नाम। तस्मान्नेयं मायांशभूता दुर्गेति गम्यते। निरुक्तिश्चात्र कृच्छ्रेण दुर्गाराधनादिबहुप्रयासेन गम्यते ज्ञायत इति। तथा च श्रीनारदपञ्चरात्रे श्रुतिविद्यासंवादे।

जानात्येका परा कान्तं सैव दुर्गा तदात्मिका। या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥
यस्या विज्ञानमात्रेण पराणां परमात्मनः। मुहूर्त्तादेव देवस्य प्राप्तिर्भवति नान्यथा ॥
एकेयं प्रेमसर्वस्वभावा श्रीगोकुलेश्वरी। अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥
भक्तिर्भजनसम्पत्तिर्भजते प्रकृतिः प्रियम्। ज्ञायतेऽत्यन्तदुःखेन सेयं प्रकृतिरात्मनः ॥
दुर्गेति गीयते सद्भिरखण्डरसवल्लभा। अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी ॥
यया मुग्धं जगत् सर्वं सर्वदेहाभिमानिनः ॥ इति च ॥

तथा च सम्मोहनतन्त्रे।

यन्नाम्ना नाम्नि दुर्गाऽहं गुणैर्गुणवती ह्यहम्। यद्वैभवान्महालक्ष्मी राधा नित्या पराऽद्वया ॥
इति प्रति दुर्गावाच। किञ्च। प्रेमरूपा य आनन्दमहानन्दरसास्तत्परिपाकभेदात्मकेन तथा ज्योतीरूपेण स्वप्रकाशेन मनुना मन्त्ररूपेण कामबीजेन सङ्गतमिति मूलमन्त्रान्तर्गतत्वेऽपि कामबीजस्य पृथगुक्तिः कुत्र च न स्वातन्त्र्यापेक्षया ॥ ३ ॥ ४ ॥

तदेवं तद्धामोक्त्वा तदावरणान्याह तदित्यर्द्धेन। तस्य कर्णिकारूपधाम्नः किञ्जल्कं किञ्जल्काः शिखरावलि-वलित प्राचीरपङ्क्तय इत्यर्थः। तदंशानां तस्मिन्नंशादयो विद्यन्ते येषां परम-प्रेमभाजां सजातीयानां धामेत्यर्थः। गोकुलाख्यमित्युक्तेरेव तेषां तत्सजातीयत्वञ्चोक्तं स्वयं श्रीबादरायणिना।

Downloaded from https://www.holybooks.com

चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतम् ।
चतुरस्रं चतुर्मूर्त्तेश्चतुर्द्धाम चतुष्कृतम् ॥ ६ ॥

एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः । विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ इति ॥

अतएव कमलस्य पत्राणि श्रियां तत्प्रेयसीनां गोपीरूपाणां श्रीराधादीनामुपवनरूपाणि धामानीत्यर्थः । गोपीरूपश्चासां मन्त्रस्य तन्नाम्ना लिङ्गितत्वात् । राधादित्वञ्च ।

देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा ॥

इति बृहद्गौतमीयात् । 'राधा वृन्दावने वने' इति मत्स्यपुराणात् । 'राधया माधवो देवो माधवेनैव राधिका' इति ऋक्परिशिष्टाच्च । तत्र पत्राणाम् उच्छ्रितप्रान्तानां सन्धिषु वर्त्मान्यग्रिमसन्धिषु गोष्ठानि ज्ञेयानि । अखण्डकमलस्य गोकुलत्वात् तथैव गोकुलसमावेशाच्च गोष्ठं तथैव । यत्तु स्थानान्तरे वचनमस्ति ।

सहस्रारं पद्मं दल-ततिषु देवीभिरभितः परीतं गोसङ्ख्यैरपि निखिलकिञ्जल्कमिलितैः ।
कवाटे यस्यास्ति स्वयमखिलशक्ति प्रकटित-प्रभावः सद्यः श्रीपरमः पुरुषस्तं किल भजे ॥ इति॥

तत्र गोसंख्यैरिति तु पाठः समञ्जसः । गोसंख्याश्च गोपा इति । 'गोपे गोपालगोसंख्यगोधुगाभीरबल्लवाः' इत्यमरः । कवाट इति कवाटानामभ्यन्तरे कर्णिकामध्यदेश इत्यर्थः । अखिलशक्त्या प्रकटितप्रभावो येन सः परमः पुरुषः श्रीकृष्ण इत्यर्थः ॥ ५ ॥

अथ गोकुलावरणान्याह चतुरस्रमिति चतुर्भिः । तस्य गोकुलस्य परितो बहिः सर्वतश्चतुरस्रं चतुष्कोणात्मकं स्थलं श्वेतद्वीपाख्यम् । तदेतदुपलक्षणम् । गोकुलाख्यञ्चेत्यर्थः । यद्यपि गोकुलेऽपि श्वेतद्वीपमस्त्येव तदेवान्तरभूमिमयत्वात् तथापि विशेषनाम्नायतनत्वात् तेनैव तत् प्रतीयत इति तथोक्तम् । किन्तु चतुरस्रेऽप्यन्तर्मण्डलं वृन्दावनाख्यं ज्ञेयम् । तथाच स्वायम्भवागमे ।

'ध्यायेत्तत्र विशुद्धात्मा इदं सर्वं क्रमेणैव' इत्युक्त्वा 'तन्मध्ये वृन्दावनं कुसुमितं नानावृक्षैर्विहङ्गमैः संस्मरेत्' इत्युक्तम् ।

तथा च श्रीबृहद्वामनपुराणे श्रीभगवतो श्रुतीनां प्रार्थनापूर्वकाणि पद्यानि ।

आनन्दरूपमिति यद्विदन्ति हि पुराविदः । तद्रूपं दर्शयाऽस्माकं यदि देयो वरो हि नः ॥
श्रुत्वैतद्दर्शयामास गोकुलं प्रकृतेः परम् । केवलानुभवानन्दमात्रमक्षरमध्यगम् ॥
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ॥ इत्यादि ।

तच्च चतुरस्रं चतुर्मूर्त्तेश्चतुर्व्यूहस्य श्रीवासुदेवादिचतुष्टयस्य चतुष्कृतं चतुर्धा विभक्तं चतुर्द्धाम । किन्तु देवलीलात्वादुपरि व्योमयानस्था एव ते ज्ञेयाः । हेतुभिस्तत्तत्पुरुषार्थसाधनैर्मनुरूपैः स्वस्वमन्त्रात्मकैरिन्द्रादिभिः सामादयश्चत्वारो वेदास्तैरित्यर्थः । शक्तिभिर्विमलादिभिः ।



Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतम् ।
शूलैर्दशभिरानद्धमूर्द्धाधो दिग्विदिक्ष्वपि ॥ ७ ॥

गोलोकनामायं लोकः श्रीभागवते साधितः । तदेवं तस्य लोको वर्णितः । तथा च श्रीभागवते ।

नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम् । कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥
ते चौत्सुक्यधियो राजन् मत्वा गोपास्तमीश्वरम् । अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥
इति स्वानां स भगवान् विज्ञायाऽखिलदृक् स्वयम् । सङ्कल्पसिद्धये तेषां कृपयैतदचिन्तयत् ॥
जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः । उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥
इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः । दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥
सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥
ते तु ब्रह्मह्रदं नीता मग्नाः कृष्णेन चोद्धृताः । ददृशुर्ब्रह्मणो लोकं यत्राऽक्रूरोऽध्यगात् पुरा ॥
नन्दादयस्तु तत् दृष्ट्वा परमानन्दनिर्वृताः । कृष्णञ्च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः ॥ इति ॥

अतीन्द्रियं अदृष्टपूर्वम् । लोकपालस्य महोदयमैश्वर्य्यम् । स्वगतिं स्वधाम । सूक्ष्मां ब्रह्माख्यां दुर्ज्ञेयामुपाधास्यत् उपधास्यति नः अस्मान् प्रापयिष्यतीति सङ्कल्पितवन्त इत्यर्थः । इति एवंभूतं स्वानां तेषां सङ्कल्पम् अखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां सङ्कल्पसिद्धये कृपया एतद्वक्ष्यमाणमचिन्तयत् । जनोऽसौ ब्रजवासी मम स्वजनः । तृतीये 'सालोक्ये'त्यादिपद्यैर्जना इतिवदुभयत्राप्यन्यजनत्वमश्रुतमिति । ब्रजजनस्य तु तदीयस्वजनतमत्वं तेन स्वयमेव विभावितम् ।

तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोऽयं मे ब्रत आहितः ॥

इत्यनेन । स एतस्मिन् प्रापञ्चिके लोके । अविद्या देहादावहंबुद्धिस्ततः कामस्ततः कर्म तैः अविद्यादिभिः उच्चावचासु देवतिर्य्यगादिरूपासु भ्रमन् तमिस्रतयाभिव्यक्तोस्तन्निर्विशेषतया जानन् तामेव स्वां गतिं न वेदेत्यर्थः । मदीयलौकिकलीलाविशेषेण ज्ञानांशतिरोधानादिति भावः ।

इति नन्दादयो गोपाः कृष्णरामकथां मुदा । कुर्व्वन्तो रममाणाश्च नाऽविदन् भववेदनाम् ॥

इति श्रीदशमोक्तेरविद्याकामकर्म्मणां तत्रासामर्थ्यात् । गोपानां स्वं लोकं गोलोकमर्थात्तान् प्रत्येवं दर्शयामास । तमसः प्रकृतेः परम् । देहादिपिहितानां दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास । स्वरूपशक्त्यभिव्यक्तत्वादत एव सच्चिदानन्दरूप एवासौ लोक इत्याह सत्यमिति । अथ श्रीवृन्दावने तादृशदर्शनं कथं अन्यदेशस्थितानां तेषां जातमित्यत्राह । सत्यमबाध्यं ज्ञानमजड़म् अनन्तमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं

अष्टभिर्निधिभिर्जुष्टमष्टभिः सिद्धिभिस्तथा।
मनुरूपैश्च दशभिर्दिक्पालैः परितो वृतम्॥ ८॥

ब्रह्म। गुणापाये गुणापोहे। ज्ञानिनो यत् पश्यन्ति तत् कृपयैव दर्शयामास। एवं ब्रह्मह्रदमक्रूरतीर्थं कृष्णेन नीताः पुनश्च तेनैव मग्ना मज्जिताः पुनश्च तस्मात्तेनैवोद्धृताः। उद्धृताः पुनः स्वस्थानं प्रापिताः सन्तो ब्रह्मणः परमवृहत्तमस्य तस्यैव लोकं गोकुलाख्यं ददृशुः। 'मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः' इति द्वितीये वैकुण्ठान्तरस्यापि तत्तथाख्यातेः। कोऽसौ ब्रह्मह्रदस्तत्राह यत्रेति। यत्र यस्मिन् कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान्। तत्तीर्थमहिमानं लक्षमेव विधातुं सेयं परिपाटीति भावः। तत्र स्वां गतिमिति तदीयतानिर्देशः। गोपानां स्वं लोकमिति षष्ठी स्वशब्दयोर्निर्देशः। कृष्णमिति साक्षात्तन्निर्देशश्च। वैकुण्ठान्तरंव्यवच्छिद्य श्रीगोलोकमेव व्यवस्थापितवानिति। तथाच श्रीहरिवंशे शक्रवचनम्'

स्वर्गादूर्द्धं ब्रह्मलोको ब्रह्मर्षिगणसेवितः। तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनाम्॥
तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि। स हि सर्वगतः कृष्ण महाकाशगतो महान्॥
उपर्य्युपरि तत्रापि गतिस्तव तपोमयी। यां न विद्मो वयं सर्वे पृच्छन्तोऽपि पितामहम्॥
लोकास्त्वधो दुष्कृतिनां नागलोकस्तु दारुणः। पृथिवी कर्मशीलानां क्षेत्रं सर्वस्य कर्मणः॥
खमस्थिराणां विषयो वायुना तुल्यवृत्तिनाम्। गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्मणाम्॥
ब्राह्मे तपसि युक्तानां ब्रह्मलोकः परा गतिः। गवामेव हि गोलोको दुरारोहा हि सा गतिः॥
स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना। धृतो धृतिमता वीर निघ्नतोपद्रवं गवाम्॥ इति॥

अत्रापातप्रतीतार्थान्तरे स्वर्गादूर्द्धं ब्रह्मलोक इत्युक्तं स्यात्। लोकत्रयमतिक्रम्योक्तेस्तत्र सौरगतिश्चैवेति न सम्भवति। चन्द्रस्यान्येषामपि ज्योतिषां ब्रह्मलोकादधस्तादेव गतिः तथा साध्यास्तं पालयन्तीत्यपि नोपपद्यते। देवयोनिरूपाणां तेषां स्वर्गलोकस्यापि पालनमसम्भवम्। किमुत तदुपरि लोकस्य सुरभिलोकस्य। तथा तस्य लोकस्य सुरभिलोकत्वे स हि सर्वगत इत्यनुपपन्नं स्यात्। श्रीमद्भगवद्विग्रहलोकयोरचिन्त्यशक्तित्वेन विभुत्वं घटेत न पुनरन्यस्येति। अतएव सर्वातीतत्वात्तत्रापि तव गतिरित्यपि-शब्दो विस्मये प्रयुक्तः। 'यां न विद्मो वयं सर्वे' इत्यादिकञ्चोक्तम्। तस्मात् प्राकृतगोलोकादन्य एवासौ गोलोक इति सिद्धम्। तथाच मोक्षधर्मे नारायणीयोपाख्याने श्रीभगवद्वाक्यम्।

एवं वहुविधै रूपैश्चरामीह वसुन्धराम्। ब्रह्मलोकञ्च कौन्तेय गोलोकञ्च सनातनम्॥ इति॥

तस्मादयमर्थः। स्वर्गशब्देन।

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः।
स्वर्लोकः कल्पितो मूर्द्ध्ना इति वा लोककल्पना॥

Downloaded from https://www.holybooks.com

श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः॥ ९॥

इति भागवते द्वितीयोक्तानुसारेण स्वर्लोकमारभ्य सत्यलोकपर्य्यन्तं लोकपञ्चकमुच्यते। तस्मादुपरि ब्रह्मलोकः ब्रह्मात्मको लोकः। ब्रह्मलोकः सच्चिदानन्दरूपत्वात्। ब्रह्मणो भगवतो लोक इति वा। 'मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः' इति द्वितीयात्। टीका च ब्रह्मलोकः वैकुण्ठाख्यः सनातनो नित्यः न तु सृज्यप्रपञ्चान्तर्वर्त्तीत्येषा। श्रुतिश्च 'एष ब्रह्मलोक आत्मलोकः' इति। स च ब्रह्मर्षिगणसेवितः ब्रह्माणः मूर्त्तिमन्तो वेदाः ऋषयः श्रीनारदादयः गणश्च श्रीगरुड़विष्वक्सेनादयस्तैः सेवितः। एवं नित्याश्रितानुक्त्वा तद्गमनाधिकारिण आह तत्रेति। तत्र ब्रह्मलोके। उमया सह वर्त्तत इति सोमः श्रीशिवस्तस्य गतिः।

स्वधर्म्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततःपरं हि माम्।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाऽहं विबुधाः कलात्यये॥

इति चतुर्थे रुद्रगीतात्। सोमेति सुपां सुलुगित्यादिना षष्ठीलुक् छान्दसः। तदुत्तरत्रापि गतिरित्यन्वयः। ज्योतिर्ब्रह्म तदेकात्मभावानां मुक्तानामित्यर्थः। न तु तादृशमपि सर्वेषां किन्तु महात्मनां महाशयानां मोचानादरतया भजतां श्रीसनकादितुल्यानामित्यर्थः। तथा च षष्ठे।

मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिरपि महामुने॥ इति॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥

इति गीताभ्यश्च। तेष्वेव महत्त्वपर्य्यवसानात्। तस्य ब्रह्मलोकस्योपरि गवां लोकः श्रीगोलोक इत्यर्थः। तञ्च गोलोकं साध्याः प्रापञ्चिकदेवानां प्रसादनीया मूलरूपा नित्यतदीय देवगणाः पालयन्ति दिक्पालरूपतया वर्त्तन्ते।

ते ह नाकं महिमानः सचन्तस्तत्र पूर्वे साध्याः सन्ति देवाः। इति श्रुतेः।
तत्र पूर्वे ये च साध्या विश्वेदेवाः सनातनाः। ते ह नाकं महिमानः सचन्तः शुभदर्शनाः॥

इति महावैकुण्ठवर्णने पाद्मोत्तरखण्डाच्च। यद्वा। 'तद्भूरि भाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि' इति श्रीब्रह्मस्तवानुसारेण तद्विधपरमभक्तानामपि साध्याः तादृशसिद्धिप्राप्तये प्रसादनीयाः श्रीगोपगोपीप्रभृतयस्तं पालयन्ति। तदेवं सर्वोपरिगतत्वेऽपि। हि प्रसिद्धौ। सः श्रीगोलोकः सर्वगतः श्रीनारायण इव प्रापञ्चिकाप्रापञ्चिकवस्तुव्यापकः। केश्चित् क्रममुक्तिव्यवस्थया तथा प्राप्यमाणोऽप्यसौ द्वितीयस्कन्धवर्णितकमलासनदृष्टवैकुण्ठवत् श्रीव्रजवासिभिरत्रापि यस्माद् दृष्ट इति भावः। अतएव महान् भगवद्रूप एव। 'महान्तं विभुमात्मानम्' इति श्रुतेः। अत्र हेतुः। महाकाशं परमव्योमाख्यं ब्रह्मविशेषेण लाभात्। 'आकाशस्तल्लिङ्गात्' इति न्यायसिद्धेश्च। तद्गतः ब्रह्माकारोदयानन्तरमेव वैकुण्ठप्राप्तेः। यथा अजामिलस्य। तदेव मुपर्य्युपरि

Downloaded from https://www.holybooks.com

एवं ज्योतिर्म्मयो देवः सदानन्दः परात्परः ।
आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ १० ॥

सर्वोपर्य्यपि विराजमाने तत्र गोलोके तव गतिः श्रीगोविन्दरूपेण क्रीड़ा वर्त्तत इत्यर्थः । अत एव सा गतिः साधारणी न भवति । किन्तु तपोमयो तपोऽत्रानवच्छिन्नैश्वर्य्यम् । सहस्रनामभाष्येऽपि । 'परमं यो महत्तप' इत्यत्र तथा व्याख्यातम् । 'स तपोऽतप्यत' इति परमेश्वरविषयकश्रुतेः । ऐश्वर्य्यं प्राकाश्ययदिति हि तत्त्वार्थः । अतएव ब्रह्मादिभिर्दुर्वितर्क्यत्वमाह यामिति । अधुना तस्य गोकुल इत्याख्या बीजमभिव्यञ्जयति गतिरिति । ब्राह्मे ब्रह्मलोकप्रापके तपसि श्रीविष्णुविषयकमनःप्रणिधाने युक्तानां रतचित्तानां तदेकप्रेमभक्तानामित्यर्थः । 'यस्य ज्ञानमयं तपः' इति श्रुतेः । ब्रह्मलोकः वैकुण्ठलोकः । परा प्रकृत्यतीता । गवां व्रजवासिमात्राणाम् । 'मोचयन् व्रजगवां दिनतापम्' इति दशमात् । तेषां स्वतस्तद्भावभावितानाञ्च साधनवशादित्यर्थः । अतस्तद्भावस्यापि सुलभत्वादूरारोहादिना धृतो रचितः । श्रीगोवर्द्धनोद्धरणेऽपि तथा स चक्षुषामिव लोकः प्रदिष्टः ।

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥ इति ॥

व्याख्यातञ्च । ता तानि वां युवयोः कृष्णरामयोः वास्तूनि लीलास्थानानि गमध्यै प्राप्तुमुश्मसि कामयामहे । तानि किम्विशिष्टानि । यत्र येषु भूरिशृङ्गाः महाशृङ्गा गावो वसन्ति । यथोपनिषदि । भूरिवाक्ये धर्म्मपरेण भूरिशब्देन महिष्ठमेवोच्यते न तु बहुतरमिति । बहुशुभलक्षणेति वा । अयासः शुभाः । 'अयः शुभावहो विधिः' इत्यमरः । देवास इतिवत् । युषन्तपदमिदम् । वृष्णः सर्वकामदुघस्येति । अत्र भूमौ । तल्लोको वेदे प्रसिद्धः श्रीगोलोकाख्यः । उरुगायस्य स्वयं भगवतः परमं स्थानम् । भूरि बहुधा अवभातीत्याह वेद इति । यजुःसु माध्यन्दिनीये 'याते धामान्युश्मसीति विष्णोः परमं पदमवभारि भूरि' इति चात्र प्रकारान्तरं पठन्ति । शेषं समानम् ॥ ६—८ ॥

अथ मूलव्याख्यामनुसरामः । विराट्तदन्तर्यामिनोरभेदविवक्षया पुरुषसूक्तादावेकपुरुषत्वं यथा निरूपितं तथा गोलोकतदधिष्ठात्रोरप्याह एवमिति । देवो गोलोकस्तदधिष्ठाढ़श्रीगोविन्दरूपः । सच्चिदानन्दमिति तत्स्वरूपमित्यर्थः । नपुंसकत्वम् 'विज्ञानमानन्दं ब्रह्मेति' श्रुतेः । आत्मारामस्यान्यनिरपेक्षस्य प्रकृत्या मायया न समागमः । यथोक्तं द्वितीये ।

प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुताऽपरे हरेरनुव्रता यत्र सुरासुरार्च्चिताः ॥ इति ॥ १० ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



मायया रममाणस्य न वियोगस्तया सह ।
आत्मना रमया रेमे त्यक्तकालं सिसृक्षया ॥ ११ ॥
नियतिः सा रमा देवी तत्प्रिया तद्वशं तदा ।
तल्लिङ्गं भगवान् शम्भुर्ज्योतीरूपः सनातनः ।
या योनिः सा परा शक्तिः कामबीजं महद्धरेः ॥ १२ ॥

अथ प्रपञ्चात्मनस्तदंशस्य पुरुषस्य तु न तादृशत्वमित्याह माययेति । प्राकृते प्रलये प्राप्ते तस्मिंस्तस्या लयात् । 'यस्यांशांशांशभागेन' इत्यादेः । ननु तर्हि जीववत्तल्लिप्तत्वेनानीश्वरत्वं स्यात् तत्राह आत्मनेति । स तु आत्मना अन्तरङ्गया तु रमया स्वरूपशक्त्यैव रेमे रतिं प्राप्नोति बहिरिव मायया सेव्य इत्यर्थः ।

एष प्रसन्नवरदो रमयाऽऽत्मशक्त्या यद्यत् करिष्यति गृहीतगुणावतारः ।

इति तृतीये ब्रह्मस्तवात् । 'मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि' इति प्रथमे श्रीमदर्जुनवाक्यात् । तर्हि तत्प्रेरणं विना कथं सृष्टिः स्यात्तत्राह सिसृक्षया स्रष्टुमिच्छया युक्तः । सृष्ट्यर्थं प्रहितः कालो यस्मात् कारणात्तादृशं यथा स्यात्तथा रेमे । प्रथमान्तपाठस्तु सुगमः । तत्प्रभावरूपेण तेनैव सा सिध्यतीति भावः ।

प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् । इति ।

कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणाऽऽत्मभूतेन वीर्य्यमाधत्त वीर्य्यवान् ॥

इति च तृतीयात् ॥ ११ ॥

ननु रमैव सा का तत्राह नियतिरित्यर्द्धेन । नियम्यते स्वयं भगवत्यैव नियता भवतीति नियतिः स्वरूपभूता तच्छक्तिः । देवी द्योतमाना प्रकाशरूपेत्यर्थः । तदुक्तं द्वादशे ।

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः । इति ।

टीका च । अनपायिनी हरेः शक्तिः । तत्र हेतुः । साक्षादात्मन इति स्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः । इत्येषा । अत्र साक्षाच्छब्देन 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया' इत्याद्युक्त्या माया नेति ध्वनितम् । तत्रानपायित्वं यथा विष्णुपुराणे ।

नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी । यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥ इति ॥
एवं यथा जगत्स्वामी देवदेवो जनार्द्दनः । अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥ इति च ॥

ननु कुत्रापि शिवशक्त्योः कारणता श्रूयते तत्र विराड्वर्णनवत् कल्पनायते तदङ्गविशेषत्वेनाह तल्लिङ्गमिति । 'तस्यायुतायुतांशांशे विश्वशक्तिरियं स्थितिः' इति विष्णुपुराणानुसारेण प्रपञ्चात्मनस्तस्य महाभगवदंशस्य स्वांशज्योतिराच्छन्नत्वादप्रकटरूपस्य पुरुषस्य लिङ्गं लिङ्ग-

लिङ्गयोन्यात्मिका जाता इमा माहेश्वरी प्रजाः ॥ १३ ॥
शक्तिमान् पुरुषः सोऽयं लिङ्गरूपी महेश्वरः
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १४ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः ॥ १५ ॥
नारायणः स भगवानापस्तस्मात् सनातनात् ।
आविरासीत् कारणार्णोनिधिः सङ्कर्षणात्मकः ।
योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ॥ १६ ॥

स्थानीयोऽंशः सैव परा प्रधानाख्या शक्तिरिति पूर्ववत्। तत्र च हरेस्तस्य पुरुषाख्यहर्य्यंशस्य कामो भवति। सृष्ट्यर्थं तद्दिदृक्षा जायत इत्यर्थः। ततश्च महदिति सजीवमहत्तत्त्वरूपं बीजमाहितं भवतीत्यर्थः। 'सोऽकामयत' इति श्रुतेः। 'कालवृत्त्येत्यादि' तृतीयाच्च ॥ १२ ॥

अतः शिवशास्त्रमपि तद्विशेषाविवेकादेव स्वातन्त्र्येण प्रवर्त्तते वस्तुतस्तु पूर्वाभिप्रायत्वमेवेत्याह लिङ्गेत्यर्द्धेन। माहेश्वरी माहेश्वर्य्यः ॥ १३ ॥

शक्तिमानित्यर्द्धेन तदेवानूद्य तस्मिन् पूर्व्वोक्तस्य प्रकटरूपस्याऽप्रकटरूपतया पुनरभिव्यक्तिरित्याह तस्मिन्नित्यर्द्धेण। तस्माल्लिङ्गरूपी प्रपञ्चोत्पादकस्तदंशोऽपि शक्तिमान् पुरुष उच्यते महेश्वराद्युच्यते। ततश्च तस्मिन् भूतसूक्ष्मपर्य्यन्ततां प्राप्ते जीवानां स एव पतिरिति। लिङ्गे स्वयं तदंशो महाविष्णुराविरभूत् प्रकटरूपेणाविर्भवति। यतो जगतां सर्वेषां परावरेषां जीवानां स एव पतिरिति ॥ १४ ॥

तदेव विवृणोति सहस्रशीर्षेति। सहस्रमंशा अवतारा यस्य स सहस्रांशः। सहस्रं सूते सृजति यः सहस्रसूः। सहस्रशीर्षेति सहस्रशब्दः सर्वत्राऽसंख्यतापरः। द्वितीये च रूपमिदमुक्तम्।

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥

अस्य टीकायाम्। यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः स आद्योऽवतारः। परस्य भूम्नः पुरुषः प्रकृतिप्रवर्त्तकः। इति ॥ १५ ॥

अयमेव कारणार्णवशायीत्याह नारायण इति सार्द्धेन। अतः आप एष कारणार्णोनिधिराविरासीत्। अयनं तस्य ताः पूर्वं स तु नारायणः सङ्कर्षणात्मकः इति। पूर्वं गोलोकाव-

Downloaded from https://www.holybooks.com

तद्रोमबिलजालेषु बीजं सङ्कर्षणस्य च ।
हैमान्यण्डानि जातानि महाभूतावृतानि तु ॥ १७ ॥
प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयम् ॥ १८ ॥
वामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिम् ।
ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवाऽसृजत् ॥ १९ ॥

रणतया यश्चतुर्व्यूहमध्ये सङ्कर्षणः सम्मतस्तस्यैवांशोऽयमित्यर्थः । अथ तस्य लीलामाह योगनिद्रामिति । स्वरूपानन्दसमाधिमित्यर्थः । तदुक्तम् ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ इति ॥ १६ ॥

तस्मादेव ब्रह्माण्डानामुत्पत्तिमाह तद्रोमेति । तदिति तस्येत्यर्थः । तस्य सङ्कर्षणात्मकस्य यद्बीजं योनिशक्तावध्यस्तं तदेव भूत सूक्ष्मपर्य्यन्ततां प्राप्तं सत् पश्चात् तस्य लोमविलजालेषु विवरेषु अन्तर्भूतञ्च सत् हैमानि अण्डानि जातानि । तानि चाऽप्रपञ्चीकृतांशैर्महाभूतैरावृतानि जातानीत्यर्थः । तदुक्तं श्रीदशमे ब्रह्मणा ।

क्वाऽहं तमोमहदहंखचराग्निवार्भू-संवेष्टिताण्डघटसप्तवितस्तिकायः ।

क्वेदृग्विधा विगणिताण्डपराणुचर्य्यावाताध्वरोमविवरस्य च ते महित्वम् ॥ इति ॥

टीका च । तमः प्रकृतिः महान् महत्तत्त्वम् अहमहङ्कारः खमाकाशः चरो वायुः अग्निः वार्जलं भूश्च । प्रकृत्यादि पृथिव्यन्तैरेतैः संवेष्टितो योऽण्डघटः स एव तस्मिन् वा स्वमानेन सप्तवितस्तिः कायो यस्य सोऽहं क्व । क्व च ते महित्वम् । कथम्भूतस्य । ईदृग्विधानि यान्यविगणितानि अण्डानि त एव परमाणवस्तेषां चर्य्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव । इत्येषा ।

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः । अण्डकोषो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥
दशोत्तराधिकैर्यत्र प्रविष्टं परमाणुवत् । लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥ इति तृतीये च ॥ १७ ॥

ततश्च तेषु ब्रह्माण्डेषु पृथक् पृथक् स्वरूपै रूपान्तरैः स एव प्रविवेशेत्याह प्रत्यण्डमिति । एकांशादेकांशादेकैकांशेनेत्यर्थः ॥ १८ ॥

पुनः किं चकार तत्राह वामाङ्गादिति । विष्ण्वादय इमे सर्वेषामेव ब्रह्माण्डानां पालकादयः प्रतिब्रह्माण्डान्तःस्थितानां विष्ण्वादीनां स चेश्वराणां प्रयोक्तारः । यथा प्रतिब्रह्माण्डं तथाऽधिब्रह्माण्डमण्डलमभ्युपगन्तव्यमिति भावः । येषु प्रजापतिरयं हिरण्यगर्भरूप एव नतु

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



अहङ्कारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ २० ॥
अथ तैस्त्रिविधैर्वेशैर्लीलामुद्वहतः किल ।
योगनिद्रा भगवती तस्य श्रीरिव सङ्गता ॥ २१ ॥
सिसृक्षायां ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनलिनं ब्रह्मणो लोकमद्भुतं ॥ २२ ॥
तत्त्वानि पूर्व्वरूढ़ानि कारणानि परस्परम् ।
समवायाप्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥ २३ ॥
चिच्छक्त्या सज्जमानोऽथ भगवानादिपुरुषः ।
योजयन् मायया देवो योगनिद्रामकल्पयत् ॥ २४ ॥
योजयित्वा तया चैव प्रविवेश स्वयं गुहाम् ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २५ ॥

वक्ष्यमाणचतुर्मुखरूप एव। सोऽयं तत्तदावरणगततत्तद्देवानां स्रष्टेति। विष्णुशम्भू अपि तत्तत्पालनसंहारकर्त्तारौ ज्ञेयौ। कूर्चदेशात् भ्रुवोर्मध्यात्। एषां जलावरण एव स्थानानि ज्ञेयानि ॥ १९ ॥

तत्र शम्भोः कार्य्यान्तरमप्याह अहङ्कारात्मकमित्यर्द्धेन। एतद्विश्वं तस्मादेवाऽहङ्कारात्मकं व्यजायत बभूव। विश्वस्याऽहङ्कारात्मकता तस्माज्जातेत्यर्थः। सर्व्वाहङ्काराधिष्ठातृत्वात्तस्य ॥२०॥

ब्रह्माण्डप्रविष्टस्य तु तत्तद्रूपस्य लीलामाह अथ तैरित्यादि। तैस्तत्सदृशैस्त्रिविधैः प्रतिब्रह्माण्डान्तर्गतविष्ण्वादिभिर्वेशैः रूपैः लीलां ब्रह्माण्डान्तर्गतपालनादिरूपामुद्वहतो ब्रह्माण्डान्तर्गतपुरुषस्येति तामुद्वहति तस्मिन्नित्यर्थः। योगनिद्रा पूर्व्वोक्तमहायोगनिद्रांशभूता भगवती स्वरूपानन्दसमाधिमयत्वादन्तर्भूतसर्व्वैश्वर्य्यैः सङ्गता। श्रीरिवेति। तत्र यथा श्रीरूपांशेन सङ्गता तथा सापीत्यर्थः ॥ २१ ॥

ततश्च सिसृक्षायामिति। नालं नालयुक्तं तद्धेमनलिनं ब्रह्मणो जन्मशयनयोः स्थानत्वाल्लोक इत्यर्थः ॥ २२ ॥

तथाऽसंख्यजीवात्मकस्य समष्टिजीवस्य प्रबोधं वक्तुं पुनः कारणार्णोनिधिशायिनस्तृतीयस्कन्धोक्तानुसारिणीं सृष्टिप्रक्रियां विवृत्याह तत्त्वानीति त्रयेण। तत्र द्वयमाह मायया स्वशक्त्या परस्परं तत्त्वानि योजयन्निति योजनान्तरमेव निरीहतया योगनिद्रामेव स्वीकृतवानित्यर्थः।

Downloaded from https://www.holybooks.com



स नित्यो नित्यसम्बन्धः प्रकृतिश्च परैव सा ॥ २६ ॥
एवं सर्व्वात्मसम्बन्धं नाभ्यां पद्मं हरेरभूत् ।
तत्र ब्रह्माऽभवद्भूयश्चतुर्वेदी चतुर्मुखः ॥ २७ ॥
सञ्जातो भगवच्छक्त्या तत्कालं किल चोदितः ।
सिसृक्षायां मतिं चक्रे पूर्वसंस्कारसंस्कृताम् ।
ददर्श केवलं ध्वान्तं नान्यत् किमपि सर्वतः ॥ २८ ॥
उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
काम कृष्णाय गोविन्द ङे गोपीजन इत्यपि ।
वल्लभाय प्रिया वह्नेर्मन्त्रं ते दास्यति प्रियम् ॥ २९ ॥
तपस्त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ ३० ॥

अथ तृतीयं योजयित्वेति। योजयित्वा तद्योजनायोगनिद्रयोरन्तरा सा इत्यर्थः। गुहां प्रति विराड्विग्रहम्। प्रतिबुध्यते प्रलयस्वापाज्जागर्त्ति ॥ २३ ॥ २४ ॥ २५ ॥

तयोः स्वाभाविकीं स्थितिमाह स नित्य इत्यर्द्धेन। नित्योऽनाद्यनन्तकालभावी नित्यसम्बन्धो भगवता सह समवायो यस्य सः। सूर्य्येण तद्रश्मिजालस्येवेति भावः।

यत्तटस्थन्तु चिद्रूपं सम्वेदात्तु विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते ॥
इति श्रीनारदपञ्चरात्रात्। तथाच श्रीगीतासु।
ममैवांशो जीवलोके जीवभूतः सनातनः। मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ इति ॥

अतएव प्रकृतिः साक्षिरूपेण स्वरूपस्थित एव विम्बप्रतिविम्बप्रमाहरूपेण प्रकृतिमिव प्राप्तस्येत्यर्थः। 'प्रकृतिं विद्धि मे परां जीवभूताम्' इति श्रीगीतास्वेव च। 'द्वा सुपर्णा सयुजा सखाया' इति श्रुतिश्च नित्यसम्बन्धं दर्शयति ॥ २६ ॥

अथ तस्य समष्टिजीवाधिष्ठानं गुहाप्रविष्टात् पुरुषत्वादुपपन्नमित्याह एवमिति। ततः समष्टिदेहाभिमानिनस्तस्य हिरण्यगर्भब्रह्मणस्तस्मात् भोगविग्रहादुत्पत्तिमाह तत्रेति ॥ २७ ॥

अथ तस्य चतुर्मुखस्य चेष्टामाह सञ्जात इति सार्द्धेन। स्पष्टम् ॥ २८ ॥

अथ तस्मिन् पूर्वोपासनालब्धां भगवत्कृपामाहोवाचेति सार्द्धेन। स्पष्टम् ॥ २९ ॥

एतदेव स्वर्गेषु यत् षोड़शमेकविंशति तृतीयस्कन्धानुसारेण योजयति तपस्त्वमित्यर्द्धेन। स्पष्टम् ॥ ३० ॥

Downloaded from https://www.holybooks.com



अथ तेपे स सुचिरं प्रीणन् गोविन्दमव्ययम् ।
श्वेतद्वीपपतिं कृष्णं गोलोकस्थं परात्परम् ॥ ३१ ॥
प्रकृत्या गुणरूपिण्या रूपिण्या पर्य्युपासितम् ।
सहस्रदलसम्पन्ने कोटिकिञ्जल्कबृंहिते ॥ ३२ ॥
भूमिश्चिन्तामणिस्तत्र कर्णिकारे महासने ।
समासीनं चिदानन्दं ज्योतीरूपं सनातनम् ॥ ३३ ॥
शब्दब्रह्ममयं वेणुं वादयन्तं मुखाम्बुजे ।
विलासिनीगणवृतं स्वैः स्वैरंशैरभिष्टुतम् ॥ ३४ ॥
अथ वेणुनिनादस्य त्रयीमूर्त्तिमती गतिः ।
स्फुरन्ती प्रविवेशाशु मुखाब्जानि स्वयम्भुवः ॥ ३५ ॥
गायत्रीं गायतस्तस्मादधिगत्य सरोजजः ।
संस्कृतश्चादिगुरुणा द्विजतामगमत्ततः ॥ ३६ ॥
त्रय्या प्रबुद्धोऽथ विधिर्विज्ञाततत्त्वसागरः ।
तुष्टाव वेदसारेण स्तोत्रेणाऽनेन केशवम् ॥ ३७ ॥

स तु तेन मन्त्रेण स्वकामनाविशेषानुसारात् सृष्टिकृच्छक्तिविशेषविशिष्टतया वक्ष्यमाण-स्तवानुसारात् गोकुलाख्यपीठगततया श्रीगोविन्दमुपासितवानित्याह अथ तेप इति चतुर्भिः । गुणरूपिण्या सत्त्वरजस्तमोगुणमय्या । रूपिण्या मूर्त्तिमत्या। पर्य्युपासितं परितस्तल्लोका-द्बहिः स्थितयोपासितं ध्यानादिनाऽर्चितम् ।

'माया परैत्यभिमुखे च विलज्जमाना' इति । 'वलिमुद्वहन्ति समदजयाऽनिमिषाः' इति च श्रीभागवतात् । अंशैस्तदावरणस्थैः परिकरैः ॥ ३१—३४ ॥

तदेवं दीक्षातः परस्तादेव तस्य ध्रुवस्येव द्विजत्वसंस्कारस्तदा वाधितत्वात्तन्मन्त्राधिदेवाज्जात इत्याह अथ वेणिति द्वयेन । त्रयी मूर्त्तिमती गतिर्गायत्री वेदमातृत्वात् । द्वितीयपद्ये तस्या एव व्यक्तीभावित्वाच्च तन्मयी गतिः परिपाटी मुखाब्जानि प्रविवेश इत्यष्टभिः कर्णैः प्रविवेशे-त्यर्थः । आदिगुरुणा श्रीकृष्णेन स ब्रह्मा संस्कृत इति कर्मस्थाने प्रथमा ॥ ३५ ॥ ३६ ॥

ततश्च त्रयीमपि तस्मात् प्राप्य तमेव तुष्टावेत्याह त्रय्येति स्पष्टम् ॥ ३७ ॥

Downloaded from https://www.holybooks.com



चिन्तामणिप्रकरसद्मसुकल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ३८ ॥

वेणुं क्वणन्तमरविन्ददलायताक्षं
वर्हावतंसमसिताम्बुदसुन्दराङ्गम् ।
कन्दर्पकोटिकमनीयविशेषशोभं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ३९ ॥

आलोलचन्द्रकलसद्वनमाल्यवंशी-
रत्नाङ्गदं प्रणयकेलिकलाविलासम् ।
श्यामं त्रिभङ्गललितं नियमप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४० ॥

अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति ।

स्तुतिमाह चिन्तामणीत्यादि। तत्र गोलोकेऽस्मिन्मन्त्रभेदेन तदेकदेशेषु वृहद्वानमयादिष्वेकस्य मन्त्रस्य वा समयादिषु च पीठेषु सत्स्वपि मध्यस्थत्वेन मुख्यतया प्रथमं गोकुलाख्यपीठनिवासयोग्यलीलया स्तौति चिन्तामणीत्येकेन। अभि सर्व्वतोभावेन वननयन-चारगोस्थानानयनप्रकारेण पालयन्तं सस्नेहं रक्षन्तम्। कदाचिद्रहसि तु वैलक्षण्यमित्याह लक्ष्मीति। लक्ष्म्योऽत्र गोपसुन्दर्य्य एवेति व्याख्यातमेव ॥ ३८ ॥

तदेव चिन्तामणिप्रकरसद्ममयं 'कथा गानं नाट्यं गमनमपि' इति वक्ष्यमाणानुसारेण गोकुलाख्यविलक्षणपीठगतां लीलामुक्त्वा एकस्थानस्थितिकां कथां गमनादिरहितां वृहद्वानादिदृष्टां द्वितीयपीठगतां लीलामाह वेणुमितिद्वयेन। वेणुमिति तत्र स्पष्टम् ॥ ३९ ॥

आलोलेत्यादि। प्रणयपूर्व्वको यः केलिः परिहासस्तत्र या कला वैदग्धी सैव विलासो यस्य तम्। 'द्रवकेलिपरीहासाः क्रीड़ा लीला च नर्म्म च' इत्यमरः ॥ ४० ॥

तदेव लीलाद्वयमुक्त्वा परमाचिन्त्यशक्त्या वैभवविशेषेणाह अङ्गानीति चतुर्भिः। तत्र तत्र

Downloaded from https://www.holybooks.com



आनन्दचिन्मय-सदुज्ज्वलविग्रहस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४१ ॥
अद्वैतमच्युतमनादिमनन्तरूप-
माद्यं पुराणपुरुषं नवयौवनञ्च ।

विग्रहस्याह अङ्गानीति । हस्तोऽपि द्रष्टुं शक्नोति चक्षुरपि पालयितुं पारयति तथान्यदन्यदप्यङ्गमन्यत् । कलयन्ति कलयितुं प्रभवन्तीति । एवमेवोक्तम् ।

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ इति ॥

जगन्तीति । लीलापरिकरेषु तत्तदङ्गं यथा स्वयमेव व्यवहरतीति भावः । तत्र च तस्य विग्रहस्य वैलक्षण्यमेव हेतुरित्याह आनन्देति ॥ ४१ ॥

वैलक्षण्यमेव पुष्यति अद्वैतमिति त्रिभिः । अद्वैतं पृथिव्यामयमद्वैतो राजेतिवदतुल्यमित्यर्थः ।

यन्मर्त्त्यलीलौपयिकं स्वयोग मायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम् ॥

इति तृतीयस्योद्धववाक्यात् । अच्युतम् ।

कंसो वताद्य कृतं मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना हरेः ।
कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥
यदर्च्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ।
गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुङ्कुमाङ्कितम् ॥

इति दशमस्याक्रूरवाक्यात् ।

या वै श्रियार्चितमजादिभिराप्तकामैर्योगीश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतः प्रपदारविन्दं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥

इति श्रीमदुद्धववाक्यात् ।

दर्शयामास लोकं स्वं गोपानां तमसः परम् । इत्युक्त्वा
नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः । कृष्णञ्च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः ॥

इति शुकवाक्याच्च । अनादिमादिरहितम् । आदित्वयं यथैकादशे सांख्यकथने ।

कालो मायामये जीवे जीव आत्मनि मय्यजे । आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ *

* मायामये मायाप्रवर्त्तके ज्ञानमये वा । अतएव जीवयतीति जीवस्तस्मिन् महापुरुषे । अयं भावः । विश्वस्रष्टुर्महापुरुषस्य उपकरणरूपः कालो वृत्त्यंशेन सृज्यश्च अतस्तदात्मनावतिष्ठत इति । तदुक्तं सप्तमे ।—

Downloaded from https://www.holybooks.com



वेदेषु दुर्लभमदुर्लभमात्मभक्तौ
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४२ ॥

इत्यत्र महाप्रलये सर्व्वावशिष्टत्वेन ब्रह्मोपदिश्य तदपि तस्य द्रष्टा त्वं स्वयं भगवान् । अस्मिन्नाह ।
एष सांख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः । प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ इति ॥

पुराणपुरुषम् । 'एकस्त्वमात्मा पुरुषः पुराणः' इति ब्रह्मवाक्यात् । 'गूढ़ः पुराणपुरुषो वनचित्रमाल्यः' इति माथुरवाक्याच्च । पुरा नवं भवति पुराण इति निरुक्तेः । तथापि नवयौवनम् ।

गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्द्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥ इति दशमात् ।
यस्याननं मकरकुण्डलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो नार्य्यो नराश्च मुदिताः कुपिता निमेश्च ॥ इति नवमात् ।
सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥
ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं मार्द्दवमेव च ॥
प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः ॥
इत्यत्र सत्यं शौचमित्यादौ सौभगकान्तितेज (?) आदीन् पठित्वा
एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥

इति प्रथमात्। बृहद्ध्यानादौ तथा श्रवणात्। 'गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितम्' इति तापनीश्रुतौ। तद्ध्याने तरुणशब्दस्य नवयौवन एव शोभानिधानत्वेन तात्पर्य्यात्। वेदेषु दुर्लभम्।

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्य्यपथञ्च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ इति ॥
तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ।
यज्जीवितन्तु निखिलं भगवान् मुकुन्दस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥

---

कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव सत्यकृदिति ॥

दशमे च ।—

योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ इति ॥

जीव आत्मनि । प्रकृतेर्लीनत्वेन प्रतियोग्यभावात् परिपूर्णत्वेन सद्रूपेण अवतिष्ठते आत्मा च आत्मन्य एव नान्यत्र लीयते । यतः केवलो निरुपाधिः । तत्र हेतुः । विकल्पापायाभ्यां विश्वोत्पत्तिप्रलयाभ्यां लक्ष्यते अधिष्ठानत्वेनावधित्वेन वेति तथा सः ।

Downloaded from https://www.holybooks.com



पन्थास्तु कोटिशतवत्सरसम्प्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानाम् ।
सोऽप्यस्ति यत् प्रपदसीम्न्यविचिन्त्यतत्त्वे
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४३ ॥

एकोऽप्यसौ रचयितुं जगदण्डकोटिं
यच्छक्तिरस्ति जगदण्डचया यदन्तः ।
अण्डान्तरस्थपरमाणुचयान्तरस्थं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४४ ॥

इति श्रीदशमात् । अदुर्लभमात्मभक्तौ ।

भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥

इत्येकादशात् । तथा च श्रीदशमे ।

पुरेऽभूमन् बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ।
विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ इति ॥ ४२ ॥

पन्थास्त्विति । वायोः मनसश्च कोटिशतवत्सरसम्प्रगम्यः पन्थाः । मुनिपुङ्गवानां प्रपदसीम्नि चरणारविन्दयोरग्रे ।

चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥

इति श्रीनारदोक्तेः । 'एको वशी सर्वगः कृष्ण ईड्य एकोऽपि सन् बहुधा यो विभाति' इति गोपालतापन्यां । तत्र सिद्धान्तमाह अविचिन्त्यतत्त्व इति ।

स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः ।
सर्गाद्यनीहोऽवितथाभिसन्धिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ इति तृतीयात् ।

अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम् ॥

इति स्कान्दाद्भारताच्च । 'श्रुतेस्तु शब्दमूलत्वात्' इति ब्रह्मसूत्रात् । अचिन्त्यो हि मणिमन्त्रमहौषधीनां प्रभाव इति तस्य युक्तत्वेति भावः ॥ ४३ ॥

एकोऽप्यसाविति । 'तावत् सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् । व्यदृश्यन्त घनश्यामा' इत्यारभ्योक्तैर्वत्सपालादिभिरेवानन्त-ब्रह्माण्ड-सामग्रीयुत-तत्तदधिपुरुषाणां तेनान्तर्भावात् जगदण्डचया इति ।

यद्भावभावितधियो मनुजास्तथैव
संप्राप्य रूपमहिमासनयानभूषाः ।
सूक्तैर्यमेव निगमप्रथितैः स्तुवन्ति
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४५ ॥

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४६ ॥

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् । पूर्वापरं बहिश्चान्तर्जगतो यो जगच्चयः ॥ इति ॥

'अणोरणीयान्महतो महीयान्' इत्यादि श्रुतेः । 'योऽसौ सर्वेषु भूतेष्वाविश्य तिष्ठति भूतानि विदधाति स वो हि स्वामी भवति च। 'योऽसौ सर्वभूतात्मा गोपालः' । 'एको देवः सर्वभूतेषु गूढ़ः' । इत्यादि तापनीभ्यः ॥ ४४ ॥

अथ तस्य साधकचर्येष्वपि भक्तेषु वदान्यत्वं वदन्नित्येषु कैमुत्यमाह यद्भावेति । यथा गोपैः समानगुणशीलवयोविलासवेशैश्चेत्यागमविधिनेत्यादि नित्यतत्सङ्गिनां तत्साम्यं श्रूयते तथैव सम्भाव्येत्यर्थः । तदुक्तमेकादशे

वैरेण यं नृपतयः शिशुपालशाल्वपौण्ड्रादयो गतिविलासविलोकनाद्यैः ।

ध्यायन्त आकृतिधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम् ॥ इति ॥४५॥

तत्प्रेयसीनां तु किं वक्तव्यं यतः परमश्रीणां तासां साहित्येनैव तस्य तल्लोकवास इत्याह आनन्देति । आनन्दचिन्मयो रसः परमप्रेममय उज्ज्वलनाम्ना तेन प्रतिभाविताभिः । पूर्वं तावत् वा रसस्तन्नाम्ना रसेन सोऽयं भावित उपासितो ज्ञातः स्तुतश्च तस्य तेन याः प्रतिभाविताः ताभिः सहेत्यर्थः । प्रतिशब्दाल्लभ्यते । यथा अखिलानां गोलोकवासिनामन्येषामपि प्रियवर्गाणा-मात्मतः परमश्रेष्ठतयात्मवदव्यभिचार्य्यपि ताभिरेव सह निवसतीति तासामतिशायित्वं दर्शितम् । तत्र हेतुः । कलाभिः ह्लादिनीशक्तिवृत्तिरूपाभिः । तत्रापि वैशिष्ट्यमाह । प्रत्युप-क्रान्तः स इत्युक्तेस्तस्य प्रागुपकारित्वमायाति तद्वत् । तत्रापि निजरूपतया स्वदारत्वेनैव न तु प्रकटलीलावत् परदारत्वव्यवहारेणेत्यर्थः । परमलक्ष्मीणां तासां तत् परदारत्वासम्भवादस्य स्वदारत्वमयरसस्य कौतुकावगुण्ठिततया समुत्कण्ठया पौरुषार्थं प्रकटलीलायां माययैव तादृशत्वं व्यञ्जितमिति भावः । य एव इत्येवकारेण यत् प्रापञ्चिकप्रकटलीलायां तासु पर-

Downloaded from https://www.holybooks.com

प्रेमाञ्जनच्छुरितभक्तिविलोचनेन
सन्तः सदैव हृदयेषु विलोकयन्ति।
यं श्यामसुन्दरमचिन्त्यगुणस्वरूपं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४७ ॥
रामादिमूर्त्तिषु कलानियमेन तिष्ठन्
नानावतारमकरोद्भुवनेषु किन्तु।
कृष्णः स्वयं समभवत् परमः पुमान् यो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४८ ॥
यस्य प्रभा प्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादि विभूतिभिन्नम्।

दारताव्यवहारेण निवसति सोऽयं य एव तदप्रकटलीलास्पदे गोलोके निजरूपताव्यवहारेण निवसतीति व्यज्यते। तथा च व्याख्यातं गौतमीयतन्त्रे तदप्रकटनित्यलीलाशीलमयदशार्ण-व्याख्याने। 'अनेकजन्मसिद्धानां गोपीनां पतिरेव वा' इति। गोलोक एवेत्येवकारेण सेयं लीला तु क्वापि नान्यत्र विद्यत इति प्रकाश्यते ॥ ४६ ॥

यद्यपि गोलोक एव निवसति तथापि प्रेमाञ्जनेति। अचिन्त्यगुणस्वरूपमपि प्रेमाख्यं यदञ्जनच्छुरितवदुच्चैः प्रकाशमानं भक्तिरूपं विलोचनं तेनेत्यर्थः ॥ ४७ ॥

स एव कदाचित् प्रपञ्चे निजांशेन स्वयमवतरतीत्याह रामादीति। यः कृष्णाख्यः परमः पुमान् कलानियमेन तत्र नियतानामेव शक्तीनां प्रकाशेन रामादिमूर्त्तिषु तिष्ठन् तत्तन्मूर्त्तीः प्रकाशयन् नानावतारमकरोत् य एव स्वयं समभवदवततार तं लीलाविशेषेण गोविन्दमहं भजामीत्यर्थः। तदुक्तं श्रीदशमे देवैः।

मत्स्याश्व-कच्छप वराह नृसिंह-हंस-राजन्य-विप्र-विबुधेषु कृतावतारः।
त्वं पासि नस्त्रिभुवनञ्च यथाऽधुनेश भारं भुवो हर यदूत्तम वन्दनं ते ॥ इति ॥ ४८ ॥

तदेवं तस्य सर्व्वावतारित्वेन पूर्णत्वमुक्त्वा स्वरूपेणाप्याह यस्येति। द्वयोरेकरूपत्वेऽपि विशिष्टतयाऽऽविर्भावात् श्रीगोविन्दस्य धर्म्मिरूपत्वमविशिष्टतयाऽऽविर्भावाद् ब्रह्मणो धर्म्मरूपत्वम् ततः पूर्वस्य मण्डलस्थानीयत्वमिति भावः। अतएव श्रीगीतासु। 'ब्रह्मणो हि प्रतिष्ठाऽहम्' इति। अतएवैकादशे स्वविभूतिगणनायां तदपि स्वयं गणितम्।
पृथिवी वायुराकाश आपो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम् ॥ इति ॥



Downloaded from https://www.holybooks.com

तद्ब्रह्म निष्कलमनन्तमशेषभूतम्
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४९ ॥
माया हि यस्य जगदण्डशतानि सूते
त्रैगुण्यतद्विषयवेदवितायमाना।
सत्त्वावलम्बि परसत्त्वविशुद्धसत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५० ॥

टीका चात्र। पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि। अहमहङ्कारः। महान् महत्तत्त्वम्। एताः सप्त प्रकृतिविकृतयः। विकारः पञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोड़शसंख्यकः। पुरुषो जीवः। अव्यक्तं प्रकृतिः। एवं पञ्चविंशतितत्त्वानि। तदुक्तम्।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोड़शकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इति॥

किञ्च रजः सत्त्वं तम इति प्रकृतेर्गुणाश्च परं ब्रह्म च। इत्येषा। श्रीमत्स्यदेवेनाप्यष्टमे तथोक्तम्।
मदीयं महिमानञ्च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि॥ इति॥

अतएवाह ध्रुवश्चतुर्थे।

या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।
सा ब्रह्मणि स्वमहिमन्यपि नाथ माभूत् किम्वन्तकासिलुलितात् पततां विमानात्॥ *

अतएवात्मारामाणामपि तद्गुणेनाकर्षः श्रूयते।

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः॥ इति॥

अत्र विशेषजिज्ञासा चेत् श्रीभागवतसन्दर्भो दृश्यतामित्यलमतिविस्तरेण॥ ४९॥

तदेवं तस्य स्वरूपगतं माहात्म्यं दर्शयित्वा तद्गतमाहात्म्यं दर्शयति द्वाभ्याम्। तत्र बहिरङ्गशक्तिमयाचिन्त्यकार्य्यगतमाया होति। मायया हि तस्य स्पर्शो नास्तीत्याह सत्त्वेति। सत्त्वस्य रजस्तमोमिश्रितस्याश्रयि यत् परं तदमिश्रं शुद्धं सत्त्वं चिच्छक्तिवृत्तिरूपं यस्य तम्। तथोक्तं श्रीविष्णुपुराणे।

सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्व्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु॥ इति॥

विशेषतः श्रीभागवतसन्दर्भे तदिदमपि विवृतमस्ति॥ ५०॥

---

* ननु स्वर्गादि सुखं सकामैः प्राप्यते निष्कामभजने च तत्स्यादित्यत आह येति। स्वमहिमनि निजानन्दरूपेऽपि माभूत् न भवतीत्यर्थः। अन्तकस्यासिना कालेन लुलितात् खण्डितात् विमानात् पततां सा नास्तीति किमु वक्तव्यम्।

Downloaded from https://www.holybooks.com

आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफलं स्मरतामुपेत्य ।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५१ ॥
गोलोकनाम्नि निजधाम्नि तले च तस्य
देवी-महेश-हरि-धामसु तेषु तेषु ।

अथ तन्मयमोहनत्वमाह आनन्देति। आनन्दचिन्मयरस उज्ज्वलाख्यः प्रेमरसः तदात्मतया तदालिङ्गिततया। प्राणिनां मनःसु प्रतिफलन् सर्वमोहनस्वांशच्छुरित-परमाणुप्रतिबिम्बतया किञ्चिदुदयन्नपि स्मरतामुपेत्येत्यादि योज्यम्। यदुक्तं रासपञ्चाध्यायाम् चक्षुषश्चक्षुरितिवत् 'साक्षान्मन्मथमन्मथः' इति। तदेवं तत्कारणत्वेऽपि स्मरावेशस्य दुष्टत्वं जगदावेशवत् ॥ ५१ ॥

तदिदं प्रपञ्चगतं माहात्म्यमुक्त्वा निजधामगतमाहात्म्यमाह गोलोकेति। देवीमहेशेत्यादि गणनं व्युत्क्रमेण ज्ञेयम्। देव्यादीनां यथोत्तरमूर्द्ध्वोर्द्ध्वप्रभवत्वात्तल्लोकानामूर्द्ध्वोर्द्ध्वभावित्वमिति गोलोकस्य सर्वोर्द्ध्वगामित्वं सर्वेभ्यो व्यापकत्वञ्च व्यवस्थापितमस्ति। भुवि प्रकाशमानस्य वृन्दावनस्य तु तेनाभेदः पूर्वत्र दर्शितः।—

गवामेव हि गोलोकः साध्यास्तं पालयन्ति हि। स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना ॥
धृतो धृतिमता वीर निघ्नतोपद्रवं गवाम् ॥

इत्यनेनाभेदेनैव हि गोलोक एव निवसतीत्येवकारः संघटते। यतो भुवि प्रकाशमानेऽस्मिन् वृन्दावने तस्य नित्यविहारित्वं श्रूयते। यथाऽऽदिवाराहे।

वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्। हरिणाऽधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम् ॥ इति ॥

तत्र च विशेषः।

कृष्णः क्रीड़ासेतुबन्धं महापातकनाशनम्। वल्लवीभिः क्रीड़नार्थं कृत्वा देवो गदाधरः ॥
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने। तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ इति ॥

अतएव गौतमीये श्रीनारद उवाच।

किमिदं द्वात्रिंशदनं वृन्दारण्यं विशाम्पते। श्रोतुमिच्छामि भगवन् यदि योग्योऽस्मि मे वद ॥

श्रीकृष्ण उवाच।

इदं वृन्दावनं नाम मम धामैव केवलम्। अत्र ये पशवः पक्षिमृगाः कीटा नराधमाः ॥
ये वसन्ति ममारिष्टा मृता यान्ति ममालयम्। अत्र या गोपकन्याश्च निवसन्ति ममालये ॥

Downloaded from https://www.holybooks.com

ते ते प्रभावनिचया विहिताश्च येन
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५२ ॥

गोपिन्यस्ता मया नित्यं मम सेवापरायणाः । पञ्चयोजनमेवास्ति वनं मे देहरूपकम् ॥
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी । अत्र देवाश्च भूतानि वर्त्तन्ते सूक्ष्मरूपतः ॥
सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् । आविर्भावस्तिरोभावो भवेन्मेऽत्र युगे युगे ॥
तेजोमयमिदं रम्यमदृश्यं चर्म्मचक्षुषा ॥ इति ॥

एतद्रूपमेवाश्रित्य वाराहादौ ते नित्यकदम्बादयो दर्शिता वर्णिताश्च । तस्मादस्मद्दृश्यमानस्यैव वृन्दावनस्य अस्मददृश्यतादृशप्रकाशविशेष एव गोलोक इति लब्धम् । यदा चास्मद्दृश्यमाने प्रकाशे सपरिकरः श्रीकृष्ण आविर्भवति तदैव तस्यावतार उच्यते । तदेव च रसविशेषपोषाय संयोगविरहः पुनः संयोगादिमयविचित्रलीलया तथा पारदार्थ्यादि व्यवहारश्च गम्यते । यदा तु यथात्र यथा वान्यत्र कल्प-तन्त्र-यामल-संहिता-पञ्चरात्रादिषु तथा दिग्दर्शनेन विशेषा ज्ञेयाः । तथा च श्रीदशमे ।

जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत् स्वैर्दोर्भिरस्यन्नधर्म्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥ इति ॥ *

तथा च पाद्मे निर्वाणखण्डे श्रीभगवद्व्यासवाक्ये ।

पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम् । ततो पश्याम्यहं भूप बालं कालाम्बुदप्रभम् ॥
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥ इति ॥

अनेनालब्धस्त्रीधर्म्मवयस्कतादिबोधकेन कन्यापदेन तासामन्यादृशत्वं निराक्रियते । तथा च गौतमीयतन्त्रे चतुर्थाध्याये ।

अथ वृन्दावनं ध्यायेत् सर्वदेवनमस्कृतम् । सर्वर्त्तुकुसुमोपेतं पतत्त्रिगणनादितम् ॥
भ्रमद्भ्रमरझङ्कारमुखरीकृतदिङ्मुखम् । कालिन्दीजलकल्लोल शीतलानिलसेवितम् ॥
नानापुष्पलतावद्धवृक्षखण्डैश्च मण्डितम् । समानोदितचन्द्रार्क तेजोदीपेन दीपितम् ॥

---

* श्रीकृष्णः सर्वोत्तम एव इत्याह जयतीति । जनानां जीवानां यो निवास आश्रयः तेषु वा निवसति अन्तर्यामितया तथा स कृष्णो जयति । देवक्यां जन्मेति वादमात्रं यस्य सः । वस्तुतोऽजन्मा । यदुवराः परिषत् सभासेवकरूपा यस्य सः । इच्छामात्रेण निरसनसमर्थोऽपि क्रीड़ार्थं दोर्भिः अधर्म्मम् अस्यन् क्षिपन् स्थिरतरवृजिनघ्नोऽधिकारिविशेषानपेक्षमेव वृन्दावनतरुगवादीनां संसारदुःखहन्ता । तथा विलासवैदग्ध्यानपेक्षं व्रजवनितानां पुरवनितानाञ्च सुस्मितेन शोभनहास्ययुक्तेन श्रीमता मुखेनैव कामदेवं वर्द्धयन् । कामश्चासौ दीव्यति विजीगीषते संसारमिति देवस्तम् । भोगद्वारा मोक्षप्रदमित्यर्थः ।

Downloaded from https://www.holybooks.com

कमलोत्पलकह्लारधूलीधूसरितान्तरम् । शाखामृगगणाकीर्णं नानामृगनिषेवितम् ॥
द्वात्रिंशद्वनसंवीतं वैकुण्ठादतिसौख्यदम् । पुरन्दरमुखैर्देवैः सर्वतः समधिष्ठितम् ॥
तन्मध्ये रत्नभूमिश्च सूर्यायुतसमप्रभाम् । तत्र कल्पतरूद्यानं नियतं रत्नवर्षिणम् ॥
माणिक्यशिखरोल्लासि तन्मध्ये मणिमण्डपम् । नानारत्नगणैश्चित्रं सर्वतेजोविराजितम् ॥
फलभारोल्लसच्चित्रं वितानैरुपशोभितम् । रत्नतोरणगोपुरमाणिक्यवेदिकान्वितम् ॥
दिव्यघण्टासमायुक्तं मुक्तादामविराजितम् । कोटिसूर्यसमाभासं निर्मुक्तं षट्करङ्गकैः ॥
बुभुक्षा च पिपासा च प्राणस्य मनसस्तथा । शोकमोहौ शरीरस्य जरामृत्युषडूर्मयः ॥
चतुर्द्वारसमायुक्तं कपाटाष्टकशोभितम् । तत्र कल्पतरुं ध्यायेत् श्रविष्ठं रत्नवर्षिणम् ॥
सेवितं ऋतुभिः सर्वैः सुधाशीकरवर्षिणम् । गारुत्मतलसत्पत्रं प्रवालरत्नपल्लवम् ॥
मुक्तारत्नप्रसविनं पद्मरागफलोज्ज्वलम् । संसारतापविच्छेदि कुशलच्छायमङ्गलम् ॥
तन्मूले चिन्तयेन्मन्त्री रत्नसिंहासनं शुभम् । तत्र सूर्यसमाभासं पङ्कजं चाष्टपत्रकम् ॥
सर्व्वतत्त्वमयं तत्र चिन्तयेज्जगदीश्वरम् । संसारसागरोत्तीर्त्यै धर्म्मकामार्थसिद्धये ॥
इन्द्रनीलमणिमेघनवेन्दीवरसन्निभम् ।पीताम्बरधरं कृष्णं पुण्डरीकनिभेक्षणम् ॥
रक्तनेत्राधरं रक्तपाणिपादतलं शुभम् । कौस्तुभोद्भासितोरस्कं नानारत्नविभूषितम् ॥
उद्दामविलसन्मुक्तारत्नहारोपशोभितम् । नानारत्नप्रभोद्भासिमुकुटं दीप्ततेजसम् ॥
हारकेयूरकटककुण्डलैरुपशोभितम् । श्रीवत्सवक्षसं चारुनूपुराद्युपशोभितम् ॥
रत्नैर्नानाविधैर्युक्तं कटिसूत्राङ्गुरीयकैः । गोरोचनाकुङ्कुमेन ललाटतिलकान्वितम् ॥
अलकाशोभिसंयुक्तं पीताम्बरयुगावृतम् । बिम्बाधरपुटोद्भासि वंशामृतरसान्वितम् ॥
बर्हिपत्रकृतापीडं वन्यपुष्पैरलंकृतम् । कदम्बकुसुमोद्बद्धचारुमालाविराजितम् ॥
कोटिकन्दर्पलावण्यं विलसद्बन्धुरोदरम् । वेणुं गृहीत्वा हस्ताभ्यां मुखे संयोज्य वादिनम् ॥
गायन्तं दिव्यगानैश्च वृन्दावनगतं हरिम् । स्वर्गादिव परिभ्रष्टकन्यकाशतमण्डितम् ॥
गोगोवत्सगणाकीर्णं वृहत्षण्डैश्च मण्डितम् । गोपकन्यासहस्रैस्तु पद्मपत्रायतेक्षणैः ॥
अर्चितं भावकुसुमैस्त्रैलोक्यैकगुरुं परम् । तुम्बुरुर्नारदश्चैव हाहा हूहूस्तथैव च ॥
किन्नरोमिथुनश्चापि श्रुत्वा गीतं तथा हरेः । वीणादिसाधनं त्यक्त्वा विस्मयाविष्टचेतसः ॥
ते स्तुवन्ति महात्मानं गायका वियति स्थिताः । सिद्धगन्धर्व्वयक्षैश्च अप्सरोभिर्विहङ्गमैः ॥
स्थावरैः पन्नगैश्चापि सिद्धैर्व्विद्याधरैस्तथा । शाखामृगैर्मनुष्यैश्च वीक्षमाणैः सुविस्मितैः ॥
सर्व्वलक्षणसम्पन्नं सौन्दर्येणाभिशोभितम् । मोहनं सर्व्वगोपीनां लोकानां पतिमव्ययम् ॥
नारदेन च सिद्धेन विश्वामित्रेण धीमता । पराशरेण व्यासेन भृगुणाऽङ्गिरसेन च ॥
दक्षेण सनकाद्यैश्च सिद्धेन कपिलेन च । वास्तुवागीशहारीत याज्ञवल्क्योशनः क्रतुः ॥
मार्कण्डेय भरद्वाजपुलस्त्यपुलहादिभिः । वशिष्ठाद्यैर्मुनीन्द्रैश्च स्तूयमानं सुरासुरैः ॥

Downloaded from https://www.holybooks.com

सृष्टिस्थितिप्रलयसाधनशक्तिरेका
छायेव यस्य भुवनानि विभर्त्ति दुर्गा ।
इच्छानुरूपमपि यस्य च चेष्टते सा
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५३ ॥

ब्रह्मलोकगतैः सिद्धैर्नागलोकगतैरपि । अन्यैरपि सुरश्रेष्ठैः स्तूयमानं स्मरेद् विभुम् ॥
तद्दर्शनकारी च दर्शितस्तत्रैव सदाचारप्रसङ्गे ।
अहर्निशं जपेन्मन्त्रं मन्त्री नियतमानसः । स पश्यति न सन्देहो गोपरूपधरं हरिम् ॥ इति ॥
तत्रैवान्यत्र—वृन्दावने वसेद्धीमान् यावत् कृष्णस्य दर्शनम् । इति ॥
त्रैलोक्यसम्मोहनतन्त्रे चाष्टादशाक्षरप्रसङ्गे ।
अहर्निशं जपेद् यस्तु मन्त्री नियतमानसः । स पश्यति न सन्देहो गोपवेशधरं हरिम् ॥ इति ॥
अतएव तापन्यां ब्रह्मवाक्यम् । 'तदु होवाच ब्रह्मसदनं चरतो मे ध्यातः स्तुतः परार्द्धान्ते सोऽबुध्यत गोपवेशो मे पुरुषः पुरस्तादाविर्बभूव' इति । तस्मात् क्षीरोदशय्याद्यवतारतया तस्य यत् कथनं तत्तु तदंशानां तत्र प्रवेशापेक्षया । तदलमतिविस्तरेण श्रीकृष्णसन्दर्भे दर्शितचरणे । प्रस्तुतमनुसरामः ॥ ५२ ॥

पूर्वं देवीमहेशहरिधाम्नामुपरिचरधामत्वं तस्य दर्शितम् । सम्प्रति तु तत्तदाश्रयत्वात्तदैव योग्यमिति दर्शयति सृष्टीति पञ्चभिः । यथोक्तं श्रुतिभिः ।
त्वमकरणः स्वराड़खिलकारकशक्तिधरस्तव वलिमुद्वहन्ति समदन्त्यजयानिमिषाः ।
वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिता इति ॥ ५३ ॥ *

---

* करणसम्बन्धरहित एवाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि तेषां शक्तीर्धारयति प्रवर्त्तयतीति तथा । कुतः । स्वराट् । यतः स्वेनैव राजसे दीप्यसे । नहि स्वतः सिद्धज्ञानशक्तेरिन्द्रियापेक्षेत्यर्थः । अतस्तव वलिमुद्वहन्ति पूजां कुर्वन्ति । अजया अविद्यया सहितास्तया वृता इत्यर्थः । अनिमिषा देवा इन्द्रादयः तत्पूज्या विश्वसृजो ब्रह्मादयोऽपि । यथा सस्त्रीका एव किङ्कराः स्वामिनं सेवन्ते तथा अविद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः । समदन्ति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं वलिं भक्षयन्ति । अत्र दृष्टान्तः वर्षभुजोऽखिलक्षितिपतेरिवेति । यथा वर्षभुजः खण्डमण्डलपतयः अखिलक्षितिपतेर्महामण्डलेश्वरस्य स्वप्रजादत्तवलिभुजो वलिमुद्वहन्ति तद्वदिति । कथं वलिं वहन्ति तदाह विदधति यत्र ये त्वधिकृता भवतश्चकिता इति । त्वत्तो भीताः सन्तो यस्मिन् कर्म्मणि

Downloaded from https://www.holybooks.com

क्षीराद् यथा दधि विकारविशेषयोगात्
सञ्जायते न हि ततः पृथगस्ति हेतोः ।
यः शम्भुतामपि तथा समुपैति कार्य्यात्
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५४ ॥
दीपार्च्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतुसमानधर्म्मा ।

अथ क्रमप्राप्तं महेशं निरूपयति क्षीरादिति। कार्य्यकारणभावमात्रांशे दृष्टान्तोऽयं दार्ष्टान्तिकस्य कारणनिर्व्विकारत्वात् चिन्तामण्यादिवत् अचिन्त्यशक्त्यैव तदादिकार्य्यतयापि स्थितत्वात्। श्रुतिश्च। 'एको ह वै पुरुषो नारायण आसीन्न ब्रह्मा न च शङ्करः। स मुनिर्भूत्वा समचिन्तयत्। तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्वरुणरुद्रेन्द्र' इति। तथा। 'स ब्रह्मणा सृजति रुद्रेण नाशयति। सोऽनुत्पत्तिलय एव हरिः कारणरूपः परः परमानन्दः' इति। शम्भोरपि कार्य्यत्वं गुणसम्बलनात्। यथोक्तं श्रीदशमे।

हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः। शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृतः ॥इति॥

एतदेवोक्तम्। विकारविशेषयोगादिति। क्वचिदभेदोक्तिर्या दृश्यते तामपि समादधाति ततो हेतोः पृथक्त्वं नास्तीति। यथोक्तमृग्वेदशिरसि। 'अथ नित्यो देव एको नारायणः। ब्रह्मा च नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। द्वादशादित्याश्च नारायणः। वसवोऽश्विनी च नारायणः। सर्वे ऋषयोऽपि नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। अधश्च नारायणः। ऊर्द्धञ्च नारायणः। मूर्त्तामूर्त्तं च नारायणः। अन्तर्वहिश्च नारायणः। नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम्'। 'ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्' इत्यादि। ब्रह्मणा त्वेवमुक्तम्।

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥

इति ॥ ५४ ॥

अथ क्रमप्राप्तः हरिस्वरूपमेकं निरूपयन् गुणावतारमहेशप्रसङ्गाद्गुणावतारं विष्णुं निरूपयति दीपार्च्चिरिति। तादृक्त्वे हेतुः। विवृतहेतुसमानधर्म्मेति। यद्यपीति श्रीगोविन्दा-

---

ये नियुक्तास्ते तत् कुर्वन्तीति। त्वदाज्ञापालनमेव बल्युद्वहनमित्यर्थः। तथा च श्रुतिः।
भीषाऽस्माद्वातः पवते भीषोदेति सूर्य्यः। भीषाऽस्मादग्निश्चन्द्रश्च मृत्युर्धावति पञ्चमः ॥ इति ॥
अनिन्द्रियोऽपि यो देवः सर्वकारकशक्तिधृक्। सर्वज्ञः सर्वकर्त्ता च सर्वसेव्यं नमामि तम् ॥

Downloaded from https://www.holybooks.com

यस्माद्दगेव हि च रिष्णुतया विभाति
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५५ ॥
यः कारणार्णवजले भजति स्म योग-
निद्रामनन्तजगदण्डसरोमकूपः ।
आधारशक्तिमवलम्ब्य परां स्वमूर्त्तिं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५६ ॥
यस्यैकनिश्वसितकालमथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः ।
विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५७ ॥
भास्वान् यथाश्मसकलेषु निजेषु तेजः
स्वीयं कियत् प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एष जगदण्डविधानकर्त्ता
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५८ ॥

शांशः कारणार्णवशायी तस्य गर्भोदकशायी तस्य चावतारोऽयं विष्णुरिति लभ्यते तथापि महादीपात् क्रमपरम्परया सूक्ष्मनिर्मलदीपस्योदितस्य ज्योतीरूपांशे यथा तेन सह साम्यं तथा गोविन्देन विष्णुर्गम्यते। शम्भोस्तु तमोऽधिष्ठानात् कज्जलमयसूक्ष्मदीपशिखास्थानीयस्य न तथा साम्यतिरोधानाय तद्दित्थमुच्यते। महाविष्णोरपि कलाविशेषत्वेन दर्शयिष्यमाणत्वात् ॥ ५५ ॥

अथ कारणार्णवशायिनं निरूपयति य इति। अनन्तजगदण्डैः सह रोमकूपाद् यस्य सः। सहशब्दस्य पूर्वनिपाताभाव आर्षः। आधारशक्तिमयीं परां स्वमूर्त्तिं शेषाख्याम् ॥ ५६ ॥

तत्र सर्वब्रह्माण्डपालको यस्तवाऽवतारतया महाब्रह्मादि सहचरत्वेन तदभिन्नत्वेन च महाविष्णुर्दर्शितः तत्र च तमस्येवं तल्लक्षणतया वर्णयति। तत्तज्जगदण्डनाथा विष्ण्वादयः जीवन्ति तत्तदधिकारतया जगति प्रकटं तिष्ठन्ति ॥ ५७ ॥

तदेवं देव्यादीनां तदाश्रयकत्वं दर्शयित्वा प्रसङ्गसङ्गत्या ब्रह्मणश्च दर्शयन्नतीव भिन्नतया जीवत्वमेव स्पष्टयति भास्वानिति। भास्वान् सूर्य्यो यथा निजेषु नित्यस्वीयत्वेन विख्यातेषु

Downloaded from https://www.holybooks.com

यत्पादपल्लवयुगं विनिधाय कुम्भ-
द्वन्द्वे प्रणामसमये सगणाधिराजः।
विघ्नान् विहन्तुमलमस्य जगत्त्रयस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५९ ॥

अग्निर्मही गगनमम्बु मरुद्दिशश्च
कालस्तथाऽऽत्ममनसीति जगत्त्रयाणि।
यस्माद्भवन्ति विभवन्ति विशन्ति यञ्च
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६० ॥

यच्चक्षुरेष सविता सकलग्रहाणां
राजा समस्तसुरमूर्त्तिरशेषतेजाः।
यस्याज्ञया भ्रमति संभृतकालचक्रो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६१ ॥

अश्मसकलेषु सूर्य्यकान्ताख्येषु स्वीयं किञ्चित्तेजः प्रकटयति अपिशब्दात्तेन तदुपाधिकांशेन दाहादिकार्य्यं स्वयमेव करोति यथा स एव जीवविशेषे किञ्चित्तेजः प्रकटयति। तेन तदुपाधिकांशेन स्वयमेव ब्रह्मा सन् जगदण्डे ब्रह्माण्डे विधानकर्त्ता व्यष्टिसृष्टिकर्त्ता भवतीत्यर्थः। यद्वा। महाब्रह्मैवायं वर्ण्यते तदुपलक्षितो महाशिवश्च ज्ञेयः। ततश्च जगदण्डानां विधानकर्त्तृत्वञ्च युक्तमेव। यद्यपि दुर्गाख्या माया कारणार्णवशायिन एव कर्म्मकरी यद्यपि च ब्रह्मविष्ण्वाद्या गर्भोदकशायिन एवावताराास्तथापि तस्य सर्व्वाश्रयतया तेऽपि तदाश्रयितया गणिताः। एवमुत्तरत्रापि ॥ ५८ ॥

अथ सर्व्वे सर्व्वविघ्ननिवारणार्थं प्रथमं गणपतिं स्तुवन्तीति तस्यैव स्तुतियोग्यतेत्याशङ्क्य प्रत्याचष्टे यत्पादेति। कैमुत्येन तदेव दृढ़ीकृतं श्रीकपिलदेवेन।

यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्द्ध्न्यधिकृतेन शिवः शिवोऽभूत्। इति ॥ ५९ ॥

तच्च युक्तमित्याह अग्निर्महीति। सर्व्वं स्पष्टम् ॥ ६० ॥

केचित् सवितारं सर्व्वेश्वरं वदन्ति यथाह यच्चक्षुरिति। य एव चक्षुः प्रकाशको यस्य सः।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

इति श्रीगीताभ्यः।

'भीषाऽस्माद्वातः पवते भीषोदेति सूर्य्यः' इत्यादि श्रुतेः। विराट्रूपस्यैव सवितृचक्षुष्ट्वाच्च ॥ ६१ ॥



Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



धर्म्मोऽथ पापनिचयः श्रुतयस्तपांसि
ब्रह्मादिकीटपतगावधयश्च जीवाः ।
यद्दत्तमात्रविभवप्रकटप्रभावा
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६२ ॥

यस्त्विन्द्रगोपमथवेन्द्रमहो स्वकर्म्म-
बन्धानुरूपफलभाजनमातनोति ।
कर्म्माणि निर्द्दहति किन्तु च भक्तिभाजां
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६३ ॥

यं क्रोधकामसहजप्रणयादिभीति-
वात्सल्यमोहगुरुगौरवसेव्यभावैः ।
सञ्चिन्त्य तस्य सदृशीं तनुमापुरेते
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६४ ॥

किं बहुना धर्म्म इति । 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते' इति श्रीगीताभ्यः ॥ ६२ ॥

तत्र तत्र सर्व्वेश्वरस्तु पर्ज्जन्यवद्द्रष्टव्य * इति न्यायेन कर्म्मानुरूपफलदातृत्वेन साम्येऽपि भक्ते तु पक्षपातविशेषं करोतीत्याह यस्त्विन्द्रेति ।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥
इति च श्रीगीताभ्यः ॥ ६३ ॥

स एव च स्वयन्तु वैरिभ्योऽप्यन्यदुर्ल्लभफलं ददाति किमुत स्वविषयककामादिना निष्काम-श्रेष्ठेभ्यः ततः को वान्यो भजनीय इति भजामीत्यन्तप्रकरणमुपसंहरति यं क्रोधेति । सहज-प्रणयः सख्यं । वात्सल्यं पित्राद्युचितभावः । मोहः सर्वविस्मरणमयो भावः परब्रह्मतया स्फुर्त्तिः । गुरुगौरवं स्वस्मिन् पितृत्वादिभावनामयं । सेव्यभावः सेव्योऽयं ममेति भावना दास्यमित्यर्थः । तस्य सदृशीं क्रोधावेशिनः प्राकृतत्वमात्रांशेनान्येषु तु तत्तद्भावनायोग्यरूपगुणांशलाभतारतम्येन तुल्यमित्यर्थः ।

* पर्ज्जन्यवच्चास्वमिदं जले वृष्टिः स्थले तथा । इति ॥

श्रियः कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतम्।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दं ज्योतिः परमपि तदास्वाद्यमपि च ॥ ६५ ॥
स यत्र क्षीराब्धिः स्रवति सुरभिभ्यश्च सुमहान्
निमेषार्द्धाख्यो वा व्रजति नहि यत्रापि समयः।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ ६६ ॥

'अदृष्टान्यतमं लोके शीलौदार्य्यगुणैः समम्' इति श्रीवासुदेववाक्यस्य 'जगद्व्यापारवर्ज्जम्' इति ब्रह्मसूत्रस्य
प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्। आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिकः ॥ *
इति नारदवाक्यस्य चैक्यं दृष्ट्वा सर्व्वथा तत्सदृशत्वाविरोधात् 'वैरेण यं नृपतय' इत्यादौ 'अनुरक्तधियां पुनः किम्' इत्यनुरक्तधीषु स्तुत्वा तेन विशिष्टं स्वतस्त्विति प्राप्तेस्तेष्वपि तत्तदनुरागतारतम्येनापि तत्तारतम्यं लभ्यते इति। अनेन गोलोकस्यप्रपञ्चावतीर्णयोरेकत्वमेव दर्शितम्। तदुक्तम्। 'नन्दादयस्तु तं दृष्ट्वा' इत्यादि ॥ ६४ ॥

तदेवं निजेष्टदेवं भजनीयत्वेन स्तुत्वा तेन विशिष्टं तल्लोकं तथा स्तौति श्रियः कान्ता इति युग्मकेन। श्रियः श्रीव्रजसुन्दरीरूपास्तासामेव मन्त्रे ध्याने च सर्व्वत्र प्रसिद्धेः। तासामनन्तानामप्येक एव कान्त इति परमनारायणादिभ्योऽपि तस्य तत्तल्लोकेभ्योऽपि तदीयलोकस्य चास्य माहात्म्यं दर्शितम्। कल्पतरवो द्रुमा इति तेषां सर्वेषामेव सर्वप्रदत्वात्तथैव प्रथितम्। भूमिरित्यादिकञ्च। भूमिरपि सर्वस्पृहां ददाति किमुत कौस्तुभादि। तोयमप्यमृतमिव स्वादु किमुतामृतमित्यादि। वंशी प्रियसखीति सर्वतः श्रीकृष्णस्य सुखस्थितिश्रावकत्वेन ज्ञेयम्। किं बहुना। चिदानन्दलक्षणं वस्त्वेव ज्योतिश्चन्द्रसूर्य्यादिरूपम्। 'समानोदितचन्द्रार्कम्' इति

---

* प्रयुज्यमाने इत्यस्यायमर्थः। 'हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि' इति या भागवती भगवत्पार्षदरूपा शुद्धा सत्त्वमयी तनुः तां प्रतिश्रुतां तनुं प्रति भगवता मयि प्रयुज्यमाने नीयमाने। आरब्धं यत् कर्म्म तन्निर्व्वाणं समाप्तं यस्य आरब्धकर्म्मणो निर्व्वाणमिव निर्व्वाणं यस्येति वा। स पञ्चभूतात्मको देहो न्यपतत्। अनेन पार्षदतनूनाम कर्म्मारब्धत्वं नित्यत्वं शुद्धत्वञ्च सूचितं भवति ॥

Downloaded from https://www.holybooks.com

अथोवाच महाविष्णुर्भगवन्तं प्रजापतिम् ।
ब्रह्मन् महत्त्वविज्ञाने प्रजासर्गे च चेन्मतिः ।
पञ्चश्लोकीमिमामाद्यां वत्स तत्त्वं निबोध मे ॥ ६७ ॥
प्रबुद्धे ज्ञानभक्तिभ्यामात्मन्यानन्दचिन्मयी ।
उदेत्यनुत्तमा भक्तिर्भगवत्प्रेमलक्षणा ॥ ६८ ॥
प्रमाणैस्तत्सदाचारैः सदभ्यासैर्निरन्तरम् ।
बोधयत्यात्मनाऽऽत्मानं भक्तिमप्युत्तमां लभेत् ॥ ६९ ॥

वृन्दावनविशेषणं गौतमीयतन्त्रद्वये । तच्च नित्यपूर्णचन्द्रत्वात्तथा । तदेव परमपि तत्तत्प्रकाश्यमपीत्यर्थः । तथा तदेव तेषामास्वाद्यं भोग्यमपि च चिच्छक्तिमयत्वादिति भावः ।

दर्शयामास लोकं स्वं गोपानां तमसः परम् । इति श्रीदशमात् ।

सुरभिभ्यश्च स्रवतीति तदीयवंशीध्वन्याद्यावेशादिति भावः । व्रजति न हीति तदावेशेन ते तद्वासिनः कालमपि न जानन्तीति भावः । कालदोषास्तत्र न सन्तीति वा ।

प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्च्चिताः ॥*

इति द्वितीयात् । अतएव श्वेतं शुद्धं द्वीपम् अन्यासङ्गरहितम् । 'यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां हि तिष्ठतीति' तापनीभ्यः । क्षितीति । तदुक्तम् ।

यं न विद्मो वयं सर्व्वे पृच्छन्तोऽपि पितामहम् । इति ॥ ६५ ॥ ६६ ॥

तदेवं तस्य स्तुतिमुक्त्वा श्रीभगवत्प्रसादलाभमाह अथेति सार्द्धेन । सर्व्वं स्पष्टम् ॥ ६७ ॥

तत्र प्रसादरूपां पञ्चश्लोकीमाह प्रबुद्ध इति ।

तस्माज् ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावतः ॥ इत्येकादशात् ॥ ६८ ॥

प्रेमलक्षणभक्तेः साधनज्ञानरूपयो भक्त्योः प्राप्त्युपायमाह प्रमाणैरिति । प्रमाणैर्भगवच्छास्त्रैः तत्सदाचारैस्तदीया ये सन्तस्तेषामाचारैरनुष्ठानैः । तदभ्यासैस्तेषामेव पौनःपुन्यबाहुल्येन आत्मनाऽऽत्मानं बोधयति स्वयमेव स्वं भगवदाश्रितः शुद्धजीवरूपमनुभवति । ततोऽप्युत्तमां शुद्धां भक्तिं लभत इति । तथा च श्रुतिस्तवे ।

स्वकृतपुरेष्वमीष्वबहिरन्तरसम्वरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोऽंशकृतम् ।

---

* यत्र वैकुण्ठे । तयोः रजस्तमसोः मिश्रं सत्त्वञ्च न वर्त्तते किन्तु शुद्धसत्त्वमेव । कालविक्रमो नाशः । अपरे रागलोभादयः न सन्तीति किमुत वक्तव्यम् । अनुव्रताः पार्षदाः ।

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



यस्याः श्रेयस्करं नास्ति यया निर्वृतिमाप्नुयात् ।
या साधयति मामेव भक्तिं तामेव साधयेत् ॥ ७० ॥
धर्म्मानन्यान् परित्यज्य मामेकं भज विश्वसन् ।
यादृशी यादृशी श्रद्धा सिद्धिर्भवति तादृशी ॥७१॥
कुर्व्वन्निरन्तरं कर्म्म लोकोऽयमनुवर्त्तते ।
तेनैव कर्म्मणा ध्यायन् मां परां भक्तिमिच्छति ॥ ७२ ॥

इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ॥ *
इति ॥ ६८ ॥

तथा च प्रेमभक्तिरेव साध्या नान्येत्याह यस्या इति । तदुक्तं चतुर्थे ।

तं दुराराध्यमाराध्य सतामपि दुरापया । एकान्तभक्त्या को वाञ्छेत् पादमूलं विना बहिः ॥
इति ॥ ७० ॥

पुनः शुद्धामेव साधनभक्तिं दृढ़यन्नन्यकामैरपि तामेव कुर्य्यादित्याह धर्म्मानन्यानिति द्वाभ्याम् । तदुक्तम् ।

अकामः सर्व्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥
इति ॥ ७१ ॥ ७२ ॥

---

* अपि च कुतो न्वियमाशङ्का स्यात् भगवतो देहाद्युपाधिकृतदोषप्रसङ्ग इति यतोऽविद्याकामकर्म्मभिः संसरतो जीवस्यापि भगवद्भावं लक्षणया बोधयन्त्यस्तं दोषं निषेधयन्ति । स यश्चायं पुरुषे यश्चासावादित्ये स एकः 'तत्त्वमसि' इत्याद्याः श्रुतयः । ननु कृत्वर्थस्यात्मनः स्तुतिरियम् ईश्वरत्वेन क्रियते न तु तस्येश्वरत्वं बोध्यते । नैतद्युज्यते । यतस्तत्र

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्याद्याः श्रुतयः कृतावतारस्य भगवतश्चरणं भजनमुपायं वदन्तीत्याह स्वकृतपुरेष्विति । स्वकर्म्मोपार्ज्जितेषु पुरेषु देहेष्वमीषु नरादिषु भोक्तृत्वेन वर्त्तमानं पुरुषम् अखिलशक्तिधृतः सर्व्वशक्त्याश्रयस्य पूर्णस्य भवांशकृतं वदन्ति । अंश इवांशः कृत इव कृतः । त्वद्रूपं वदन्तीत्यर्थः । ननु कार्य्यकारणसंवृतस्य कुत एवंभूतत्वं तत्राह अबहिरन्तरसंवरणमिति । बहिः कार्य्यम् अन्तरं कारणं वस्तुतस्तदावरणशून्यं तयोरसत्त्वादित्यर्थः । इत्येवं नृगतिं नुर्जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयोऽन्यखेदं न प्राप्यत इति जानन्तो निगमावपनं निगमोक्तकर्म्मणामावपनम् । आ समन्तात् उप्यन्तेऽस्मिन्नित्यावपनं चैतं सर्व्वकर्म्मार्पणविषयमित्यर्थः । यत्रार्पितानि कर्म्माणि मुक्तिफलं फलन्ति तं भवतोऽङ्घ्रिम् । अभवं भवनिवर्त्तकम् । विश्वसिताः कृतविश्वासा उपासतेऽर्च्चनवन्दनादिभिः सेवन्ते । भुवीति मर्त्त्यलोके इदमेवोचितमिति दर्शयन्ति ।

त्वदंशस्य ममेशान त्वन्मायाकृतबन्धनम् । तदङ्घ्रिसेवामादिश्य परानन्द निवर्त्तय ॥

अहं हि विश्वस्य चराचरस्य बीजं प्रधानं प्रकृतिः पुमांश्च।
मयाऽऽहितं तेज इदं बिभर्षि विधे विधेहि त्वमथो जगन्ति ॥७३॥

इति श्रीब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यः पञ्चमोऽध्यायः ॥

तस्मात्तव सिद्धचाऽपि फलिष्यतीति सयुक्तिकमाह अहं हीति। प्रधानं श्रेष्ठं बीजं पूर्णभगवद्रूपम्। प्रकृतिरव्यक्तम्। पुमान् द्रष्टा। किं बहुना। त्वमपि मया आहितमर्पितं तेजो बिभर्षि तस्मात्तेन मत्तेजसा जगन्ति सर्व्वाणि स्थावरजङ्गमानि हे विधे विधेहि कुर्व्विति ॥ ७३ ॥

इति श्रीजीवगोस्वामिकृता ब्रह्मसंहिताटीका सम्पूर्णा ॥ श्रीहरिः ॥

---

Downloaded from https://www.holybooks.com

## शुद्धिपत्रम् ।

| पृष्ठा | | पंक्ति | | अशुद्ध | शुद्ध । |
|---|---|---|---|---|---|
| १ | ... | १२ | ... | इश्वर | ईश्वर |
| १ | ... | १३ | ... | वासुवदोय | वासुदेवाय |
| २ | ... | १५ | ... | मित्यक्ते | मित्युक्ते |
| ४ | ... | १३ | ... | व्दितीयत्वेन | द्वितीयत्वेन |
| ५ | ... | ८ | ... | वेंल्लभ | वल्लभ |
| ५ | ... | १२ | ... | उपान्वितो | उपाधितो |
| ५ | ... | १८ | ... | चानुमूत | चानुभूत |
| ७ | ... | २१ | ... | यत्प्रकृति | यत्प्रतिकृति |
| ८ | ... | २९ | ... | सजातीयानां | स्वजातीयानां |
| १६ | ... | ६ | ... | शग्भुं | शम्भुं |
| १७ | ... | २६ | ... | सृष्ठि | सृष्टि |
| १९ | ... | २० | ... | परेत्य | परैत्य |
| १९ | ... | २० | ... | समदजया | समदन्त्यजया |
| २१ | ... | १६ | ... | वताद्य कृतं | वताद्या कृत |
| २२ | ... | १५ | ... | शोचम् | शौचम् |
| २३ | ... | ४ | ... | सोस्मा | सोम्मा |
| २५ | ... | १४ | ... | जम्म | जन्म |
| २६ | ... | १९ | ... | अप्यरुक्रमे | अप्युरुक्रमे |
| २९ | ... | ११ | ... | मङ्गतम् | मद्भुतम् |

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

## नामानुक्रमणिका।

**अ**—अक्रूरः १११। अक्षरः १५। अक्षरम् ६४। अक्षोभ्यः ९९, १२०। अखण्डपरशुः ७४। अग्रजः १०८। अग्रणीः ३७। अग्राह्यः २०। अचलः ९२। अचिन्त्यः १०२। अच्युतः २४,४८,७०। अजः २४,३५, ६९। अजितः ७१। अणुः १०३। अतीन्द्रः ३०। अतीन्द्रियः ३१। अतुलः ५२। अदृश्यः ४६। अद्भुतः १०८। अधाता ११५। अधिष्ठानम् ४८। अधृतः १०३। अधोक्षजः ५७। अनघः २९,१०२। अनन्तः १०८,८३। अनन्तजित् ४६। अनन्तरूपः ११३। अनन्तश्रीः ११३। अनन्तात्मा ६८। अनन्दः ६९। अनयः ५६। अनर्थः ५९। अनलः ४५,८९। अनादिः ११४। अनादिनिधनः १८। अनामयः ८६। अनिमिषः ३६। अनियमः १०५। अनिरुद्धः ३३,८१। अनिर्देश्यवपुः ३२,८३। अनिर्व्विण्णः ६०,१०८। अनिलः ३८,१००। अनिवर्त्ती ७७। अनिवृत्तात्मा ९६। अनीशः ८०। अनुकूलः ५०। अनुत्तमः २२। अनेकमूर्त्तिः ९०। अन्तकः ६८। अन्नम् ११८। अन्नादः ११८। अपराजितः ८९,१०५। अपां निधिः ४८। अप्ययः १०९। अप्रतिरथः ८१। अप्रमत्तः ४८। अप्रमेयः १९। अप्रमेयात्मा ४०। अभिप्रायः १०६। अभूः ६०। अमरप्रभुः १९। अमानी ९३। अमित-विक्रमः ६८,८१। अमिताशनः ५३। अमूर्त्तिः १०२। अमूर्त्तिमान् ९०। अमृतः २६। अमृतपः ६७। अमृतवपुः १००। अमृतांशूद्भवः ४४। अमृताशः १००। अमृत्युः ३५। अमेयात्मा २४,३२। अमोघः २५,३०। अम्भोनिधिः ६८। अयमः १०५। अरविन्दाक्षः ५१। अरौद्रः ११०। अर्कः ९८। अर्च्चितः ८१। अर्च्चिष्मान् ८१। अर्थः ५९। अर्हः १०६। अविज्ञाता ६४। अविधेयात्मा ७९। अविशिष्टः ४७। अव्यक्तः ९०। अव्यङ्गः २७। अव्ययः १५,१७। अशोकः ५०। अश्वत्थः १०१। असंख्येयः ४०। असम्मितः २५। असत् ६४। असाची ६८। असुखदः १०८। अहः २२। अहः-सम्बर्त्तकः ३८।

**आ**—आत्मयोनिः ११९। आत्मवान् २२। आदित्यः १८,७३। आदिदेवः ४९,६५। आधारनिलयः १०५। आनन्दः ६९। आनन्दी ७३। आवर्त्तनः ३८। आश्रमः १०४।

**इ**—इज्यः ६१। इन्द्रकर्म्मा ९७। इष्टः ४७।

**ई**—ईश्वरः १७,२२। ईशानः २१।

**उ**—उग्रः ५८। उत्तमम् ६१। उत्तरः ६६। उत्तारणः ११२। उदीर्णः ८०। उदुम्बरः १०१। उद्भवः ५४,९८। उपेन्द्रः ३०।

**ऊ**—ऊर्ज्जितः ३०। ऊर्ज्जितशासनः ११०। ऊर्द्ध्वगः ११५।

**ऋ**—ऋतुः ५८। ऋद्धः ४३,५१।

**ए**—एकः ९१। एकपात् ९५। एकात्मा ११६।

**ओ**—ओजः ४३। ओजस्तेजोद्युतिधरः ४३।

**औ**—औषधम् ४४।

Downloaded from https://www.holybooks.com

**क**—कः ९१। कथितः १०३। कनकाङ्गदी ७१। कपिः १०९। कपिलः १०९। कपिलाचार्य्यः ७०। कपीन्द्रः ६६। करणम् ५४। कर्त्ता ४७,५४। कविः २७। कान्तः ४५,८३। कामः ४५। कामकृत् ४५। कामदेवः ८३। कामपालः ८३। कामप्रदः ४५। कामहा ४५। कामी ८३। कारणम् ५४। कालः ५८। कालनेमिनिहा ८२। किम् ९१। कुण्डली ११०। कुन्दः १००। कुन्दरः १००। कुमुदः ७६,१००। कुम्भः ८१। कुवलेशयः ७६। कृतकर्म्मा ९७। कृतज्ञः २२,९०। कृतलक्षणः ६४। कृताकृतः २८। कृतागमः ८३,९७। कृतान्तकृत् ७०। कृतिः २२। कृशः १०३। कृष्णः २०,७२। केशवः १६,८२। केशिहा ८२। क्रतुः ६१। क्रमः २२। क्रोधकृत् ४७। क्रोधहा ४७। क्षमः ६०। क्षमिणां वरः १११। क्षरम् ६४। क्षामः ६०,१०४। क्षितीशः ११९। क्षेत्रज्ञः १५। क्षेमकृत् ७७। क्षोभणः ५४।

**ख**—खण्डपरशुः ७४।

**ग**—गणेश्वरः ७९। गतिसत्तमः ७३। गदाग्रजः ९४। गदाधरः १२०। गभस्तिनेमिः ६५। गभीरः ७१। गभीरात्मा ११३। गरुड़ध्वजः ५१। गहनः ५३,७१। गुणभृत् १०३। गुप्तः ७१। गुरुः ३६। गुरुतमः ३६। गुहः ५४। गुह्यः ७१। गोपतिः ६६,७६। गोप्ता ६६,७६। गोविदां पतिः ३३। गोविन्दः ३३,७१। गोहितः ७६। ग्रामणीः ३७।

**घ**—घृताशीः ९२।

**च**—चक्रगदाधरः ७१। चक्री १२०,११०। चतुरस्रः ११३। चतुरात्मा २८,९५। चतुर्गतिः ९५। चतुर्दंष्ट्रः २८। चतुर्व्वाहुः ९५। चतुर्भावः ९५। चतुर्भुजः २८। चतुर्मूर्त्तिः ९५। चतुर्व्वेदवित् ९५। चतुर्व्यूहः २८,९५। चन्दनाङ्गदी ९२। चन्द्रांशुः ४०। चलः ९२। चाणूरान्ध्रनिषूदनः १०१।

**छ**—छिन्नसंशयः ७९।

**ज**—जगतःसेतुः ४४। जगदादिजः २९। जनजन्मादिः ११४। जननः ११४। जनार्द्दनः २७। जनेश्वरः ५०। जन्ममृत्युजरातिगः ११६। जयः ६७। जयन्तः ९८। जह्नुः ३९। जितक्रोधः ६२। जितमत्युः ११३। जितामित्रः ६९। जीवः ६८। जीवनः ११२। जेता २९। ज्ञानगम्यः ६६। ज्ञानमुत्तमम् ६१। ज्येष्ठः २१। ज्योतिः १०७,७९। ज्योतिरादित्यः ७३। ज्योतिर्गणेश्वरः ७९।

**त**—तत् ९१। तत्त्वम् ११६। तत्त्ववित् ११६। तन्तुवर्द्धनः ९७। तारः ५०,११७। तारणः ५०। तीर्थकरः ८७। तुष्टः ५५। तेजः ४३। तेजोवृषः ९४। त्रिककुब्धाम २०। त्रिदशाध्यक्षः ७०। त्रिपदः ७०। त्रिलोकधृक् ९३। त्रिलोकात्मा ८२। त्रिलोकेशः ८२। त्रिविक्रमः ६९। त्रिसामा ७५। त्वष्टा १९।

**द**—दक्षः ५८,१११। दक्षिणः १११। दण्डः १०५। दमः १०५। दमनः ३४। दमयिता १०५। दर्पदः ८९। दर्पहा ८९। दामोदरः ५३। दारुणः ७४। दाशार्हः ६७। दिवस्पृक् ७४। दिशः ११३। दीप्तमूर्त्तिः ९०। दुःस्वप्ननाशनः ११२। दुरतिक्रमः ९६। दुराधर्षः २२। दुरारिहा ९६। दुरावासः ९६। दुर्गः ९६। दुर्गमः ९६। दुर्जयः ९६। दुर्द्धरः ४२,८९। दुर्मर्षणः ३५। दुर्लभः ९६। दुष्कृतिहा ११२। दृढ़ः ७२। दृप्तः ८९। देवः ५४। देवकीनन्दनः ११९। देवभृद्गुरुः ६५। देवेशः ६५। द्युतिधरः ९४,४३। द्रविणप्रदः ७४।

Downloaded from https://www.holybooks.com

**ध**—धनञ्जयः ८३। धनुर्द्धरः १०५। धनुर्व्वेदः १०५। धनेश्वरः ६३। धन्यः ९३। धन्वी २२। धरणीधरः २८। धराधरः ९३। धर्म्मः ५६। धर्म्मकृत् ६४। धर्म्मगुप् ६४। धर्म्मयूपः ६०। धर्म्मविदुत्तमः ५६। धर्म्माध्यक्षः २८। धर्म्मी ६४। धाता १८,११५। धातुरुत्तमः १८। धाम ३६। धुर्य्यः ४९। धृतात्मा ३०। ध्रुवः ५५।

**न**—नक्षत्रनेमिः ६०। नक्षत्री ६०। नन्दः ६९। नन्दकी १२०। नन्दनः ६९। नन्दिः ७९। नयः ५६। नरः ३९। नहुषः ४७। नारसिंहवपुः १६। नारायणः ३९। निग्रहः ९१। निधिरव्ययः १७। निमिषः ३६। नियन्ता १०५। नियमः ३०,१०५। निर्गुणः १०३। निर्व्वाणम् ७५। निवृत्तात्मा ३८,७७। निष्ठा ७५। नेता ३७। नेयः ५६। नैकः ९१। नैककर्म्मकृत् ६३। नैकजः १०८। नैकमायः ४६। नैकरूपः ४२। नैकशृङ्गः ९४। नैकात्मा ६३। न्यग्रोधः १०१। न्यायः ३७।

**प**—पणः ११५। पदमनुत्तमम् ९१। पद्मगर्भः ५१। पद्मनाभः १९,३४,५१। पद्मनिभेक्षणः ५०। पद्मी ५०। परमस्पष्टः ५५। परमात्मा १५। परमेश्वरः ५४। परमेष्ठी ५८। परर्द्धिः ५५। पराक्रमः ४४। परायणः ७५। परायणम् ७५। परिग्रहः ५८। पर्ज्जन्यः १००। पर्य्यवस्थितः ११२। पवनः ४५। पवित्रम् २०। पापनाशनः ११९। पावनः ९५,१००। पिता ११७। पुण्डरीकाक्षः २५। पुण्यः ८६,११२। पुण्यकीर्त्तिः ८६। पुण्यश्रवणकीर्त्तनः १११। पुनर्वसुः २९। पुरन्दरः ४९। पुरातनः ६६। पुरुजित् ६७। पुरुषः १५,५७। पुरुषोत्तमः १६। पुरुसत्तमः ६७। पुष्कराक्षः १८,७२। पुष्टः ५५। पुष्पहासः ११५। पूतात्मा १५। पूरयिता ८६। पूर्णः ८६। पृथुः ५७। पेशलः १११। प्रकाशनः ४२। प्रकाशात्मा ४३। प्रग्रहः ९४। प्रजागरः ११५। प्रजापतिः २१,३४। प्रजाभवः २३। प्रणवः ५७,११५। प्रतर्द्दनः २०। प्रतापनः ४३। प्रतिष्ठितः ४८। प्रत्ययः २३। प्रथितः ४८। प्रद्युम्नः ८१। प्रधानपुरुषेश्वरः १६। प्रपितामहः ११७। प्रभवः १७। प्रभुः १७,४५। प्रभूतः २०। प्रमाणम् ५९,११६। प्रमोदनः ६९। प्रसन्नात्मा ३९। प्रांशुः ३०। प्राग्वंशः १०३। प्राणः २१,४८,५७। प्राणजीवनः ११६। प्राणदः २१,४८,५७,११५। प्राणनिलयः ११६। प्राणभृत् ११६। प्रियकृत् १०६। प्रियार्हः १०६। प्रीतिवर्द्धनः १०६।

**ब**—बभ्रुः २६। बहुशिराः २६। बीजमव्ययम् ५९। बृहत् १०३। बृहद्भानुः ४९। बृहद्रूपः ४२। ब्रह्म ८४। ब्रह्मा ८४। ब्रह्मकृत् ८४। ब्रह्मज्ञः ८४। ब्रह्मण्यः ८४। ब्रह्मवित् ८४। ब्रह्मविवर्द्धनः ८४। ब्रह्मी ८४। ब्राह्मणः ८४। ब्राह्मणप्रियः ८४।

**भ**—भक्तवत्सलः ९१। भगवान् ७३। भगहा ७३। भयकृत् १०२। भयनाशनः १०२। भयापहः ११३। भर्त्ता १७। भानुः ४४। भारभृत् १०४। भावः १४। भावनः १७। भास्करद्युतिः ४३। भिषक् ७५। भीमः ५२,११४। भीमपराक्रमः ११४। भुजगोत्तमः ३४। भूः ११४। भूगर्भः २१। भूतकृत् १४। भूतभव्यभवत्प्रभुः १४। भूतभव्यभवन्नाथः ४५। भूतभावनः १४। भूतभृत् १४। भूतमहेश्वरः ६५। भूतात्मा १४। भूतादिः १७। भूतावासः ८९। भूतिः ८०। भूरिदक्षिणः ६६। भूर्भुवः ११४। भूर्भुवःस्वस्तरुः ११७। भूर्भुवो लक्ष्मीः ११४। भूशयः ८०। भूषणः ८०। भेषजम् ७५। भोक्ता २९,६६,१०८। भोजनम् २९। भ्राजिष्णुः २९।

Downloaded from https://www.holybooks.com

**म**—मङ्गलं परम् २०। मधुः ३१। मधुसूदनः ३१। मनुः १८। मनोजवः ८७। मनोहरः ६२। मन्त्रः ४३। मरीचिः ३४। महर्द्धिः ५१। महर्षिः ७०। महाकर्म्मा ८५,८७। महाकोशः ५८। महाक्रतुः ८५। महाक्रमः ८५। महाक्षः ५१। महागर्त्तः ८८। महातपाः २६। महातेजाः ८५। महादेवः ६५। महाद्युतिः ३२। महाद्रिधृक् ३२। महाधनः ५८। महान् १०३। महानिधिः ८८। महाबलः ३१। महाबुद्धिः ३२। महाभागः ५३। महाभूतः ८८। महाभोगः ५८। महामखः ६०। महामनाः ७२। महामायः ३१। महामूर्त्तिः ८०। महायज्ञः ८५। महायज्वा ८५। महार्हः ६८। महावराहः ७१। महावीर्य्यः ३२। महाशक्तिः ३२। महाशनः ४६। महाशृङ्गः ७०। महास्वनः १८। महाहविः ८५। महाह्रदः ८८। महीधरः ४७,५३। महीभर्त्ता ३३। महेज्यः ६१। महेन्द्रः ४२। महेष्वासः ३३। महोत्साहः ३१। महोदधिशयः ६८। महोरगः ८५। माधवः २१,३१,८१। मानदः ८३। मान्यः ८३। मार्गः ५३,५६। मुकुन्दः ६८। मुक्तानां परमा गतिः १५। मेदिनीपतिः ७०। मेधजः ८३। मेधावी २२।

**य**—यज्ञः ६१,११७। यज्ञकृत् ११८। यज्ञगुह्यम् ११८। यज्ञपतिः ११७। यज्ञभुक् ११८। यज्ञभृत् ११८। यज्ञवाहनः ११७। यज्ञसाधनः ११८। यज्ञाङ्गः ११७। यज्ञान्तकृत् ११८। यज्ञी ११८। यज्वा ११७। यत् ८१। यदुश्रेष्ठः ८८। यमः ३०,१०५। युगादिकृत् ४६। युगावर्त्तः ४६। योगः १६। योगविदां नेता १६। योगी १०४। योगीशः १०४।

**र**—रक्षणः ११२। रणप्रियः ८६। रत्नगर्भः ३२। रत्ननाभः ८८। रथाङ्गपाणिः १२०। रविः १०७। रविलोचनः १०७। रामः ५६। रुचिराङ्गदः ११४। रुद्रः २६। रोहितः ५३।

**ल**—लक्ष्मीः ११४। लक्ष्मीवान् ५२। लोकत्रयाश्रयः ७८। लोकनाथः ८१। लोकबन्धुः ८१। लोकसारङ्गः ८७। लोकस्वामी ८७। लोकाधिष्ठानम् १०८। लोकाध्यक्षः २८। लोहिताक्षः २०।

**व**—वंशवर्द्धनः १०३। वत्सरः ६३। वत्सलः ६३। वत्सी ६३। वनमाली ७०। वरदः ४८। वराङ्गः ८२। वरारोहः २६। वरुणः ७२। वर्द्धनः ४१। वर्द्धमानः ४१। वषट्कारः १४। वसुः २५,४२,८७। वसुदः ४२। वसुप्रदः ८७। वसुमनाः २५,८७। वसुरेताः ८७। वह्निः ३८। वाग्मी ४२। वाचस्पतिरयोनिजः ७४। वाचस्पतिरुदारधीः ३६। वाजसनः ८८। वामनः ३०। वायुः ५७। वायुवाहनः ४८,१०४। वारुणः ७२। वासवानुजः ४८। वासुदेवः ४८,८७,८८। विकर्त्ता ५४। विक्रमः २२। विक्रमी २२,११०। विक्षरः ५३। विजयः २८। विजितात्मा ७८। विदारणः ६२। विदिशः ११३। विद्वत्तमः १११। विधाता १८,६४। विनयः ६७। विनयिता ६८। विनयितासाक्षी ६८। विभुः ३८,१०७। विमुक्तात्मा ६१। विरतः ५६। विरामः ५६। विरोचनः १०७। विविक्तः ४१। विशिष्टः ४०। विशुद्धात्मा ८१। विशोकः ८०। विशोधनः ८१। विश्रामः ५८। विश्रुतात्मा ३५। विश्वकर्म्मा १८। विश्वदक्षिणः ५८। विश्वधृक् ३८। विश्वबाहुः ४७। विश्वभुक् ३८। विश्वम् १४। विश्वमूर्त्तिः ८०। विश्वयोनिः २६,२८। विश्वरेताः २३। विश्वात्मा ३७। विषमः ८२। विष्णुः १४,४१,८३। विष्वक्सेनः २७। विस्तारः ५८। विहायसगतिः १०७। वीतभयः १११। वीरः ५३,८३। वीरबाहुः ६२। वीरहा ३१,८२,११२। वृक्षः ७२। वृद्धात्मा ५१। वृषः ४७। वृषकर्म्मा २५। वृषपर्व्वा ४१। वृषप्रियः ७६। वृषभः ४१। वृषभाक्षः ७६। वृषाकपिः २४। वृषाकृतिः २५। वृषाही ४१। वृषोदरः

Downloaded from https://www.holybooks.com

वेगवान् ५३। वेदः २७। वेदवित् २७। वेदाङ्गः २७। वेद्यः ३१। वेधाः ७२। वैकुण्ठः ५७। वैखानः ११९। वैद्यः ३१। व्यक्तरूपः ४६। व्यग्रः ९४। व्यवसायः ५५। व्यवस्थानः ५५। व्यादिशः ११३। व्यापी ६३। व्याप्तः ५७। व्यालः २३। व्यासः ७४।

श—शम्भुः १८। शक्तिमतां श्रेष्ठः ५६। शङ्खभृत् १२०। शतमूर्त्तिः ९०। शताननः ९०। शतानन्दः ७९। शतावर्त्तः ५०। शत्रुघ्नः ५७। शत्रुजित् १०१। शत्रुतापनः १०१। शब्दसहः ११०। शब्दातिगः ११०। शमः ७५। शरणम् २३। शरभः ५१। शरीरभूतभृत् ६६। शरीरभृत् ५१। शर्म्म २३। शर्व्वः १७। शर्व्वरीकरः ११०। शशविन्दुः ४४। शान्तः ७५। शान्तिः ७५। शान्तिदः ७०। शार्ङ्गधन्वा १२०। शाश्वतः २०। शाश्वतस्थाणुः २६। शाश्वतस्थिरः ८०। शास्ता ३५। शिखण्डी ४७। शिपिविष्टः ४२। शिवः १७,७७। शिशिरः ११०। शिष्टकृत् ४०। शिष्टेष्टः ४७। शुचिः ३०,४०। शुचिश्रवाः २६। शुभाङ्गः ७६,९७। शुभेक्षणः ५५। शून्यः ९२। शूरः ५०। शूरजनेश्वरः ८२। शूरसेनः ८८। शृङ्गी ९८। शोकनाशनः ८०। शौरिः ५०,८२। श्मशानः १०४। श्रीकरः ७८। श्रीगर्भः ५४। श्रीदः ७८। श्रीधरः ७८। श्रीनिधिः ७८। श्रीनिवासः २३,७८। श्रीपतिः ७७। श्रीमतां वरः ७७। श्रीमान् १६,२२,२७,७८। श्रीवत्सवक्षाः ७७। श्रीवासः ७७। श्रीविभावनः ७८। श्रीशः ७८। श्रुतिसागरः ४१। श्रेयः ७८। श्रेष्ठः २१।

स—सङ्कर्षणः ७२। संक्षेप्ता ७७। संग्रहः ३०। संधाता ३५। सन्धिमान् ३५। सन्न्यासकृत् ७५। सम्प्रमर्द्दनः ३८। सम्भवः १७। संवत्सरः २३,५८। संवृतः ३८। संस्थानः ५५। सत् ६४। सतां गतिः ३२,६१। सत्कर्त्ता ३९। सत्कीर्त्तिः ७९। सत्कृतः ३९। सत्कृतिः ८८। सत्ता ८८। सत्यम् ६१। सत्त्ववान् १०६। सत्त्वस्थः ६५। सत्पथाचारः ११५। सत्परायणः ८८। सत्यः २५,३६,१०६। सत्यधर्म्मपरायणः १०६। सत्यधर्म्मपराक्रमः ४४। सत्यधर्म्मा ६९। सत्यपराक्रमः ३६। सत्यमेधाः ९३। सत्यसन्धः ६७। सदामर्षी १०८। सदायोगी ३१। सद्गतिः ८८। सद्भूतिः ८८। सनात् १०९। सनातनतमः १०९। सन्तः ११२। सन्निवासः ८८। सप्तजिह्वः १०२। सप्तवाहनः। सप्तैधाः समः २५। समयज्ञः ५२। समात्मा २५। समावर्त्तः ९६। समितिञ्जयः ५२। समीरणः ३७। समीहनः ६०। सर्गः ३०। सर्व्वः १७। सर्व्वकामदः १०४। सर्व्वगः २७। सर्व्वज्ञः ६१,१००। सर्व्वतश्चक्षुः ८०। सर्व्वतोमुखः १००। सर्व्वदर्शनः २०। सर्व्वदर्शी ६१। सर्व्वदृक् ३५,७४। सर्व्व-दृग्व्यासः ७४। सर्व्वप्रहरणायुधः १२०। सर्व्वयोगविनिःसृतः २४। सर्व्वलक्षणलक्षण्यः ५२। सर्व्व-वागीश्वरेश्वरः ९९। सर्व्वविज्जयी ९८। सर्व्वविद्भानुः २७। सर्व्वशस्त्रभृतांवरः ९४। सर्व्वसहः १०५। सर्व्वादिः २४। सर्व्वासुनिलयः ८९। सर्व्वेश्वरः २४। सवः ९१। सविता १०७। सहः ५३। सहस्रजित् ४६। सहस्रपात् ३७। सहस्रमूर्द्धा ३७। सहस्रांशुः ६४। सहस्राक्षः ३७। सहस्रार्च्चिः १०२। सहिष्णुः २९,७३। साक्षी १५। सात्वतां पतिः ६७। सात्त्विकः १०६। साधुः ३९। साम ७५। सामगः ७५। सामगायनः ११९। सिंहः ३५,६५। सिद्धः २४,१०१। सिद्धसङ्कल्पः ४०। सिद्धार्थः ४०। सिद्धिः २४। सिद्धिदः ४०। सिद्धिसाधनः ४०। सुखदः ६२,१०८। सुघोषः ६२। सुतन्तुः ९७। सुतपाः ३४। सुदर्शनः ५८। सुधन्वा ७४। सुन्दः ९८। सुन्दरः ९८। सुपर्णः ३४,१०४। सुप्रसादः ३९। सुभुजः ४२। सुमुखः ६२। सुमेधाः ९३। सुयामुनः ८८। सुराध्यक्षः २८।

Downloaded from https://www.holybooks.com

सुरानन्दः ३३। सुरारिहा ३५। सुरुचिः १०७। सुरेशः २३। सुरेश्वरः ४४। सुलभः १०१। सुलोचनः ९८। सुवर्णविन्दुः ९९। सुवर्णवर्णः ९२। सुवीरः ११४। सुव्रतः ६२,१०१। सुषेणः ७१। सुहृत् ६२। सूक्ष्मः ६२। सूर्य्यः १०७। सोमः ६७। सोमपः ६७। स्कन्दः ४९। स्कन्दधरः ४९। स्तवप्रियः ८६। स्तव्यः ८६। स्तुतिः ८६। स्तोता ८६। स्तोत्रम् ८६। स्थविरो ध्रुवः १९। स्थविष्ठः १९,६०। स्थाणुः १७। स्थानदः ५५। स्थावरस्थाणुः ५९। स्थिरः ३५। स्थूलः १०३। स्पष्टाचरः ४३। स्रग्वी ३६। स्रष्टा ७६,११९। स्वचः ७९। स्वङ्गः ७९। स्वधृतः १०३। स्वयंजातः ११९। स्वयम्भुः १८। स्ववशः ६३। स्वस्ति १०९। स्वस्तिकृत् १०९। स्वस्तिदः १०९। स्वस्तिदक्षिणः १०९। स्वस्तिभुक् १०९। स्वाङ्गः ७२। स्वापनः ६३। स्वाभाव्यः ६०। स्वास्यः १०३।

ह—हंसः ३४। हरिः ८२। हलायुधः ७३। हविः ८७। हविर्हरिः ५२। हिरण्यगर्भः २१,५७। हिरण्यनाभः ३४। हुतभुक् १०७,१०८। हृषीकेशः १९। हेतुः ५३। हेमाङ्गः ९२।

---

Downloaded from https://www.holybooks.com

# शुद्धिपत्रम्

| पृष्ठायाम् | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ५ | ५ | साधवो ये | साधयत्य |
| ६ | १८।२१ | वभुव | वभूव |
| ७ | ४ | एवाग्निवहुधा | एवाग्निर्वहुधा |
| २१ | ७ | द्वादशादित्येषु | द्वादशादित्येषु |
| | १८ | मुद्धता | मुद्गता |
| २४ | ४ | पुण्डरिकाची | पुण्डरिकाची |
| २६ | ६ | व्यङ्गा | व्यङ्गो |
| ३१ | १५ | विक्रमणत् | विक्रमणात् |
| ३५ | २२ | हरिः | हविः |
| ३९ | २५ | स्वावात्मा | स्वासावात्मा |
| ४० | ७ | ददाभ्येतत् | ददाम्येतत् |
| ४८ | २५ | व्यधिका | भ्यधिका |
| ५३ | १९ | वसुदेव | वासुदेवस्त |
| ५६ | ३ | सप्तजिह्व: | सप्तजिह्वः |
| ६१ | २ | वीतमयः | वीतभयः |
| ६५ | १० | कूर्व्वन् | कुर्व्वन् |
| ६६ | २७ | विनस्यन्ति | विनश्यन्ति |

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

ॐ नमः सच्चिदानन्दविग्रहाय ।

# श्रीश्रीविष्णुसहस्रनामस्तोत्रम्

## शाङ्करभाष्योपेतम् ।

वैशम्पायन उवाच ।

श्रुत्वा धर्म्मानशेषेण पावनानि च सर्व्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाऽभ्यभाषत ॥ १ ॥

युधिष्ठिर उवाच ।

किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ।
स्तुवन्तः कं कमर्च्चन्तः प्राप्नुयुर्म्मानवाः शुभम् ॥ २ ॥

ॐ नमो भगवते वासुदेवाय ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
कृष्णद्वैपायनं व्यासं सर्व्वभूतहिते रतम् । वेदाब्जभास्करं वन्दे समाधिनिलयं मुनिम् ॥

सहस्रमूर्त्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ।
सहस्रनाम्नां स्तवनं प्रशस्तं निरूप्यते जन्मजरादिशान्त्यै ॥

वैशम्पायनः जन्मेजयं प्रत्युवाच। धर्म्मान् अभ्युदयनिःश्रेयसोत्पत्तिहेतुभूतान् चोदनालक्षणान् । अशेषेण कार्त्स्न्येन । पावनानि पापक्षयकराणि धर्म्मरहस्यानि च । सर्व्वशः सर्व्वैः प्रकारैः श्रुत्वा युधिष्ठिरः धर्म्मपुत्रः शान्तनवं शान्तनुसूनुं भीष्मं सकलपुरुषार्थसाधनं सुखसम्पाद्यम् अल्पप्रयासम् अनल्पफलम् अनुक्तमिति मत्वा पुनर्भूय एवाऽभ्यभाषत प्रश्नं कृतवान् ॥ १ ॥

किमेकं दैवतमिति । दैवतं देव इत्यर्थः । स्वार्थे तद्धितविधानात् । लोके लोकनहेतुभूते समस्तविद्यास्थाने उक्तमिति प्रथमः प्रश्नः । सर्व्वेषां किं वाप्येकं परायणम् अस्मिन् लोके एकं परायणञ्च किम् परमयनं प्राप्तव्यं परायणम् । यदाज्ञया प्रवर्त्तन्ते सर्व्वे यस्मिन्नधिगते हृदयग्रन्थिः भिद्यते ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि यस्मिन् दृष्टे परावरे ॥

Downloaded from https://www.holybooks.com

को धर्म्मः सर्व्वधर्म्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥३॥

श्रीभीष्म उवाच ।

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥४॥
तमेव चार्च्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥५॥

इति श्रुतेः। यस्य हि विज्ञानमात्रेणानन्दलक्षणो मोक्षः प्राप्यते। 'यद्विदित्वा न बिभेति कुतश्चन'। 'यत्प्रविष्टस्य न विद्यते पुनर्भवः'। 'यस्य वेदनात्तदेव भवति'। 'यद्विहायापरः पन्था नृणां नास्ति'। 'ब्रह्म वेद ब्रह्मैव भवति'। 'नान्यः पन्था विद्यतेऽयनाय' इति च श्रुतेः। तदुक्तम् एकं परायणम्। लोके तत् किमिति द्वितीयः प्रश्नः। कं कतमं देवं स्तुवन्तः गुणसङ्कीर्त्तनं कुर्व्वन्तः कं कतमं देवम् अर्चन्तः बाह्यमाभ्यन्तरं वाऽर्चनं बहुविधं कुर्व्वन्तः मानवाः मनुसुताः शुभं कल्याणं स्वर्गापवर्गादिफलं प्राप्नुयुर्लभेयुरिति पुनः प्रश्नद्वयम् ॥ २ ॥

को धर्मः पूर्व्वोक्तलक्षणः सर्व्वधर्म्माणां सर्व्वेषां धर्म्माणां मध्ये भवतः परमः प्रकृष्टो मतोऽभिप्रेत इति पञ्चमः प्रश्नः। किं जपन् उच्चोपांशुमानसलक्षणं जपं कुर्व्वन् जन्तुर्जननधर्म्मा। अनेन जन्तुशब्देन जपार्चनस्तवादिषु यथायोग्यं सर्व्वप्राणिनाम् अधिकारं सूचयति। जन्मसंसारबन्धनात् जन्माऽज्ञानविजृम्भितानामविद्याकार्य्याणामुपलक्षणम् संसारोऽविद्या ताभ्यां जन्मसंसाराभ्यां यद् बन्धनं तस्मात् मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः। जन्म संसारबन्धनादितीदमुपलक्षणम्। अन्येषां फलानामपि एतद्ग्रहणं तु मोक्षस्य प्राधान्यख्यापनार्थम् ॥ ३ ॥

षट्प्रश्नाः कथिताः। पाश्चात्योऽनन्तरो जप्यविषयः प्रश्नोऽनेन परिह्रीयते। भीष्म उवाच। सर्व्वेषां बहिरन्तःशत्रूणां भयहेतुर्भीष्मो मोक्षधर्म्मादीनां प्रवक्ता सर्व्वज्ञः। जगज्जङ्गमाजङ्गमात्मकं तस्य प्रभुः स्वामी तम्। देवदेवं देवानां देवम्। अनन्तं देशतः कालतो वस्तुतश्चापरिच्छिन्नम्। पुरुषोत्तमं क्षराक्षराभ्यां कार्य्यकारणाभ्यामुत्कृष्टम्। नामसहस्रेण स्तुवन्नाम्नां सहस्रेण स्तुवन् गुणान् सङ्कीर्त्तयन् सततोत्थितो निरन्तरमुद्युक्तः पुरुषः। पूर्णत्वात् पुरे शयनाद्वा पुरुषः। 'सर्व्वदुःखातिगो भवेत्' इति सर्व्वत्र संबध्यते। उत्तरेण श्लोकेन चतुर्थः प्रश्नः परिह्रीयते। तमेव चार्च्चयन् बाह्यमर्च्चनं कुर्व्वन्। नित्यं सर्व्वेषु कालेषु। भक्तिर्भजनतात्पर्य्यं तया। पुरुषमव्ययं विनाशविक्रियारहितम्। तमेव च ध्यायन् आभ्यन्तरार्चनं कुर्व्वन्। स्तुवन्

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



अनादिनिधनं विष्णुं सर्व्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्व्वदुःखातिगो भवेत् ॥६॥
ब्रह्मण्यं सर्व्वधर्म्मज्ञं लोकानां कीर्त्तिवर्द्धनम् ।
लोकनाथं महद्भूतं सर्व्वभूतभवोद्भवम् ॥७॥
एष मे सर्व्वधर्म्माणां धर्म्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा ॥८॥

पूर्वोक्तरीत्या भक्त्या । नमस्यन् नमस्कारं कुर्व्वन् । पूजाशेषभूतमुभयं स्तुतिनमस्कारलक्षणम् । यजमानः पूजकः फलभोक्ता । अथवाऽर्च्चयन्नित्यनेन उभयविधमर्च्चनमुच्यते । ध्यायंस्तुवन्नमस्यन्नित्यनेन मानसं वाचिकं कायिकञ्चोच्यते । तृतीयं प्रश्नं परिहरत्युत्तरैस्त्रिभिः पादैः ॥ ४ ॥ ५ ॥

अनादिनिधनं षड्भावविकाररहितम् । विष्णुं व्यापनशीलम् । सर्व्वस्य लोकस्य लोक्यत इति लोकः दृश्यवर्गो लोकस्तस्य नियन्तॄणां ब्रह्मादीनामपीश्वरत्वात् सर्व्वलोकमहेश्वरम् । लोकं दृश्यवर्गं स्वाभाविकेन बोधेन साक्षात् पश्यतीति लोकाध्यक्षस्तम् । स्तुवन्नित्यं निरन्तरं स्तुवन् सर्व्वदुःखातिगो भवेत् । इति त्रयाणां साधारणफलवचनम् । सर्व्वाण्याध्यात्मिकादिदुःखान्यतीत्य गच्छति सर्व्वदुःखातिगो भवेत् स्यात् ॥ ६ ॥

पुनरपि तमेव स्तुत्यं विशिनष्टि । ब्रह्मण्यं ब्रह्मणि स्रष्टे ब्राह्मणाय तपसे श्रुतये हितम् । सर्व्वान् धर्म्मान् जानातीति सर्व्वधर्म्मज्ञः तम् । लोकानां सर्व्वप्राणिनां कीर्त्तयो यशांसि ताः स्वशक्त्यनुप्रवेशेन वर्द्धयतीति तम् । लोकैर्नाथ्यते याच्यते लोकानुपैत्य शास्ति लोकानामिष्ट इति वा लोकनाथस्तम् । महत् ब्रह्म । विश्वोत्कर्षेण वर्त्तमानत्वात् । भूतं परमार्थसत्यम् । सर्व्वभूतानां भवः संसारो यत्सकाशादुद्भवति तं सर्व्वभूतभवोद्भवम् ॥ ७ ॥

पञ्चमः प्रश्नः परिक्रीयते । सर्व्वेषां वेदलक्षणानां धर्म्माणामेष वक्ष्यमाणो धर्म्मोऽधिकतमो मे मम मतोऽभिप्रेतः । यद्भक्त्या तात्पर्य्येण पुण्डरीकाक्षं हृदयपुण्डरीके प्रकाशमानं वासुदेवं स्तवैर्गुणसङ्कीर्त्तनलक्षणैः स्तुतिभिः सदाऽर्च्चेत् संस्कारपूर्व्वकमर्च्चनं करोति नरो मनुष्य इति यावत् । एष धर्म्म इति सम्बन्धः । अस्य स्तुतिलक्षणस्य धर्म्मस्याधिक्ये किं कारणम् । उच्यते । हिंसादि-पुरुषान्तर-द्रव्यान्तर -देशकालादि-नियमानपेक्षत्वमाधिक्ये कारणम् ।

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् । यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्त्य केशवम् ॥

इति श्रीविष्णुपुराणवचनम् । तथा मनुवचनञ्च ।

जपेनैव हि संसिद्ध्येद्ब्राह्मणो नात्र संशयः । कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥इति॥

जपस्तु सर्व्वधर्म्मेभ्यः परमो धर्म्म उच्यते । अहिंसया च भूतानां जपयज्ञः प्रवर्त्तते ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥९॥
पवित्राणां पवित्रं यो मङ्गलानाञ्च मङ्गलम् ।

इति महाभारते । 'यज्ञानां जपयज्ञोऽस्मि' इति गीतासु भगवद्वाक्यम् । एतत् सर्व्वमभिप्रेत्य 'एष मे सर्व्वधर्म्माणां धर्म्मोऽधिकतमो मतः' इत्युक्तम् ॥ ८ ॥

द्वितीयं प्रश्नं समाधत्ते परममिति । परमं प्रकृष्टं महत् बृहत्तेजः चैतन्यलक्षणं सर्व्वावभासकम् । 'येन सूर्य्यस्तपति तेजसेद्धः' । 'तं देवा ज्योतिषां ज्योतिः' । 'न तत्र सूर्य्यो भाति न चन्द्रतारकम्' इत्यादि श्रुतिः । परमन्तपस्तपत्याज्ञापयति इति तपः । 'य इमञ्च लोकं परं च लोकं सर्व्वाणि च भूतानि योऽन्तरा यमयति' इत्याद्यन्तर्यामिब्राह्मणे: सर्व्वनियन्तृत्वं श्रूयते । तपतीष्ट इति वा तपः । तस्यैश्वर्य्यमनवच्छिन्नमिति महत्त्वं । 'एष सर्व्वेश्वरः' इत्यादिश्रुतिः । परमं सत्यादिलक्षणं परमं ब्रह्म महनीयतया महत् । परमं प्रकृष्टं पुनरावृत्तिशङ्कारहितम् । परम् अयनं परायणम् । परमग्रहणात् सर्व्वचापरं तेज आदित्यादिकं व्यावर्त्त्यते । सर्व्वत्र यो देव इति विशिष्यते । यो देवः परमं तेजः परमं तपः परमं ब्रह्म परमं परायणम् स एकः सर्व्वभूतानां परायणमिति वाक्यार्थः ॥ ९ ॥

प्रथमप्रश्नस्योत्तरमाह पवित्राणामिति । पवित्राणां पावनानां तीर्थादीनां पवित्रम् । परमस्तु पुमान् ध्यातो दृष्टः कीर्त्तितः स्तुतः संपूजितः संस्मृतः प्रणतः सर्व्वान् पापानुन्मूलयति इति परमं पवित्रम् । संसारबन्धनहेतुकं पुण्यापुण्यात्मकं कर्म्म तत्कारणञ्चाऽज्ञानं सर्व्वं नाशयति । स्वयाथार्थ्यज्ञानेनेति वा पवित्राणां पवित्रम् ।

यन्नामकीर्त्तनं भक्त्या विलापनमनुत्तमम् । मैत्रेयाशेषपापानां धातूनामिव पावकः ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
ध्यायेन्नारायणं देवं दानादिषु च कर्म्मसु । प्रायश्चित्तं हि सर्व्वस्य दुष्कृतस्येति वै श्रुतिः ॥
संसारसर्पसंदष्टनष्टचेष्टैकभेषजम् । कृष्णेति वैष्णवं मन्त्रं श्रुत्वा मुक्तो भवेन्नरः ॥
सर्व्वदा सर्व्वकार्य्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो देवोऽसौ मङ्गलायतनं हरिः ॥
नित्यं संचिन्तयन्नेष योगयुक्तो जनार्द्दनम् । सास्य रक्षा परा मन्ये को हिनस्त्यच्युताश्रयम् ॥
रूपमारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतो नित्यमपवर्गप्रदो हरिः ॥
चिन्त्यमानः समस्तानां क्लेशानां हानिदो हि यः ।
समुत्सृज्याखिलं चिन्त्यं सोऽच्युतः किन्न चिन्त्यते ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु । यत्पापं विलयं याति स्मृते नश्यति तद्धरौ ॥

Downloaded from https://www.holybooks.com

## दैवतं देवतानाञ्च भूतानां योऽव्ययः पिता ॥ १० ॥

मुहूर्त्तमपि यो ध्यायेन्नारायणमतन्द्रितः। सोऽपि सिद्धिमवाप्नोति किं पुनस्तत्परायणः ॥
एकस्मिन्नप्यतिक्रान्ते मुहूर्त्ते ध्यानवर्ज्जिते। दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् ॥
जनार्द्दनं भूतपतिं जगद्गुरुं स्मरन्मनुष्यः सततं महामुने।
दुःखान्यशेषाण्यपहन्ति साधवो ये शेषकार्य्याणि च यान्यभीप्सति ॥
एवमेकाग्रचित्तः सन् संस्मरन् मधुसूदनम्। जन्ममृत्युजराग्राहं संसाराब्धिं तरिष्यति ॥
यथाग्निरुद्यतशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ॥
अतिपातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्। भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥
आलोड्य सर्व्वशास्त्राणि विचार्य्य च पुनः पुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः। ओमित्येवं सदा विप्राः पठत ध्यात केशवम् ॥
ध्यायन् कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन्। यदाप्नोति तदाप्नोति कलौ संकीर्त्त्य केशवम् ॥
हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥
ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्त्तनात्। तत्सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
यस्मिन् न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यत् चिन्तने
विघ्नो यत्र निवेसितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं तदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते ॥
शमायाऽलं जलं वह्नेस्तमसो भास्करोदयः। शान्तिः कलौ ह्यघौघस्य नामसंकीर्त्तनं हरेः ॥
हरेर्नामैव नामैव नामैव मम जीवनम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥
स्तुत्वा विष्णुं वासुदेवं विपापो जायते नरः। विष्णोः संपुजनान्नित्यं सर्व्वपापं प्रणश्यति ॥
कलिकल्मषमत्युग्रं नरकार्त्तिप्रदं नृणाम्। प्रयाति विलयं सद्यः सकृत् यस्यानुसंस्मृते ॥
सकृत् स्मृतोऽपि गोविन्दो नृणां जन्मशतैः कृतम्। पापराशिं दहत्याशु तुलराशिमिवानलः ॥
कलावत्रापि दोषाढ्ये विषयासक्तमानसः। कृत्वापि सकलं पापं गोविन्दं संस्मरन् शुचिः ॥
वासुदेवे मनो यस्य जपहोमार्च्चनादिषु। तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
लोकत्रयाधिपतिमप्रतिमप्रभावमिषत् प्रणम्य शिरसा प्रभविष्णुमीशम्।
जन्मान्तर प्रलयकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम् ॥
एकोऽपि कृष्णे सुकृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम्। ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



शाठ्येनापि नमस्कारः प्रयुक्तश्चक्रपाणये । संसारमूलबन्धानामुद्वेजनकरो हि सः ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥
इत्यादि श्रुतिस्मृतीतिहासपुराणवचनेभ्यः ।

मङ्गलानाञ्च मङ्गलं मङ्गलं सुखं तत्साधकं तज्ज्ञापकं च । तेषामपि परमानन्दलक्षणं परमं मङ्गलमिति मङ्गलानाञ्च मङ्गलम् । दैवतं देवतानां देवानाम् देवः द्योतनादि समुत्कर्षेण वर्त्तमानत्वात् । भूतानां यः अव्ययः व्ययरहितः पिता जनकः यो देवः स एकं दैवतम् लोके इति वाक्यार्थः ।

एको देवः सर्व्वभूतेषु गूढ़ः सर्व्वव्यापी सर्व्वभूतान्तरात्मा ।
कर्म्माध्यक्षः सर्व्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥
यो ब्रह्माणं विदधाति पूर्व्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

इति श्वेताश्वतराणां मन्त्रोपनिषदि । 'सेयं देवतैक्षत' 'एकमेवाद्वितीयम्' इति छान्दोग्ये । ननु कथमेको देवः । जीवपरमयोर्भेदात् । न । 'तत् सृष्ट्वा तदेवानुप्राविशत्' । 'स एव इह अनु प्रविष्ट आलोमभ्य आनखेभ्यः' इत्यादि श्रुतिभ्योऽविकृतस्य परस्य बुद्धितद्वृत्तिसाक्षित्वेन प्रवेशन-श्रवणादभेदः । प्रविष्टानामितरेतरभेदात् परात्मैकत्वं कथमिति चेन्न । 'एको देवो बहुधा सन्निविष्टः' । 'एकः सन् बहुधा विचारः' । 'त्वमेकोऽसि बहून् ननु प्रविष्टः' इत्येकस्यैव बहुधा प्रवेशश्रवनात् प्रविष्टानां परस्य च न भेदः । 'हिरण्यगर्भः' इत्यष्टौ मन्त्राः 'कस्मै देवाय' इत्यत्र एकारलोपेन एकदेवत्वप्रतिपादकाः । तैत्तिरीयके ।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभुव ।
एकस्तथा सर्व्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभुव ।
एकस्तथा सर्व्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
सूर्य्यो यथा सर्व्वभूतस्य चक्षुर्न लिप्यते चाक्षुषैर्ब्बाह्यदोषैः ।
एकस्तथा सर्व्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥
एको वशी सर्व्वभूतान्तरात्मा एकं बीजं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ इति कठवल्लीषु ।

'ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्' 'नान्योऽतोऽस्ति द्रष्टा' 'नान्य-दतोऽस्ति द्रष्टृ' इत्यादि बृहदारण्यके । 'अनेजदेकं मनसो जवीयो नैनं देवा आप्नुवन् पूर्व्व-

मर्षत्' । 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' इति ईशावास्ये । 'सर्वेषां भूतानामान्तरः पुरुषः स आत्मेति विद्यात्' । 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत्' । 'एकं सद्विप्रा बहुधा वदन्ति' । 'एकं सन्तं बहुधा कल्पयन्ति' । 'एको विममे त्रिभिरित्पदेभिः' 'एको दधार भुवनानि विश्वा' 'एक एवाग्निबहुधा समिद्धः' इति ऋग्वेदे । 'स देव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' इति छान्दोग्ये ।

सर्व्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्व्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥
अहमात्मा गुडाकेश सर्वभूताशये स्थितः । अहमादिश्च मध्यं च भूतानामन्त एव च ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोचयिष्यामि मा शुचः ॥
इति भगवद्गीतासु ।

हरिरेकः सदा ध्येयो भवद्भिस्तत्त्वसंस्थितैः । ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् ॥
आश्चर्य्यः खलु देवानामेकस्त्वं पुरुषोत्तमः । धन्यश्चासि महाबाहो लोके नान्योऽस्ति कश्चन ॥
इति श्रीहरिवंशे । मनुना चोक्तम् ।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । सम्पश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ॥ इति ॥
सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्द्दनः ॥

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचित् द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्म्मभेदात् विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥
ज्ञानं विशुद्धं विमलो विशोको निःशेषलोभादिनिरस्तसङ्गः ।
एकः सदैकः परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ॥

यदा समस्तदेहेषु पुमानेको व्यवस्थितः । तदा हि को भवान् सोऽहमित्येतद्विफलं वचः ॥
सितनीलादिभेदेन यथैकं दृश्यते नभः । भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥

एकः समस्तं यदिहास्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्व्वमेतदात्मस्वरूपं त्यज भेदमोहम् ।
इतोरितस्तेन स राजवर्य्यस्तत्याज भेदं परमात्मदृष्टिः ॥
सकलमिदमहञ्च वासुदेवः परमः पुमान् परमेश्वरः स एकः ।
इति मतिरमला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात् ॥

अथाह वसुधा सर्व्वं सत्यमेतद्दिवौकसः । अहं भवो भवन्तश्च सर्व्वं नारायणात्मकम् ॥
विभूतयश्च यास्तस्य तासामेव परस्परम् । आधिक्यन्यूनताबाध्यबाधकत्वेन वर्त्तते ॥

Downloaded from https://www.holybooks.com

भवानहञ्च विश्वात्मन्नेकमेव हि कारणम् । जगतोऽस्य जगत्यर्थे भेदेनाऽऽवां व्यवस्थितौ ॥
त्वया चैव हि यद्दत्तं तद्दत्तमखिलं मया । मत्तो विभिन्नमात्मानं द्रष्टुमर्हसि शङ्कर ॥
योऽहं स त्वं जगच्चेदं स देवासुरमानुषम् । अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ॥
इति वैष्णवे ।

विष्णोरन्यन्तु पश्यन्ति ये मां ब्रह्माणमेव च । कुतर्कमतयो मूढ़ाः पच्यन्ते नरकेष्वधः ॥
ये च मूढ़ा दुरात्मानो भिन्नं पश्यन्ति मां हरे । भ्रूणहत्या तथा तेषां ब्रह्महत्या समन्वघम् ॥
इति भविष्यपुराणे महेश्वरवाक्यम् ।

आदिस्त्वं सर्व्वभूतानां मध्यमन्तस्तथा भवान् । त्वत्तः समभवद्विश्वं त्वयि सर्व्वं प्रलीयते ॥
अहं त्वं सर्व्वगो देव त्वमेवाहं जनार्द्दन । आवयोरन्यः को नास्ति शब्दैरन्यैर्जगत्पते ॥
नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्य्या विचारणा ॥
त्वदुपास्ता जगन्नाथ सैवास्तु मम गोपते । यश्च त्वां द्विषते देव स मां द्वेष्टि न संशयः ॥
त्वद्विस्तारो यतो देव अहं भूतपतिस्ततः । न तदस्ति विना देव त्वया विरहितं क्वचित् ॥
यदासीद्वर्त्तते यच्च यच्च भावि जगत्पते । सर्व्वं त्वं देवदेवेश विना किञ्चित्त्वया न हि ॥
इति श्रीहरिवंशे महेश्वरवचनम् । अपि च ।

'आत्मेति तूपगच्छन्ति आत्मेति ग्राहयन्ति च ।'

आत्मेति शास्त्रोक्तविशेषणः परमात्मा प्रतिपत्तव्यः । तथाहि परमात्मप्रक्रियायां जावाला आत्मत्वेनैवेनमभ्युपगच्छन्ति । 'त्वं वाऽहमस्मि भगवो देवते अहं वै त्वमसि' इति । तथान्येऽपि । 'यदेवेह तदमुत्र यदमुत्र तदन्विह' । 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः' । 'तदात्मानमेवा वेदहं ब्रह्मास्मीति' 'तदेतद्ब्रह्मापूर्व्वमनपरमनन्तरमवाह्यमयमात्मा ब्रह्म' । 'स वा एष महानजः आत्मा अजरोऽमरोऽमृतोऽभयो ब्रह्म' इत्येवमादयः । आत्मत्वोपगमा द्रष्टव्याः । ग्राहयन्ति च बोधयन्ति चात्मत्वेनैवेश्वरं वेदान्तवाक्यानि । 'एष त आत्मा सर्व्वान्तर्य्याम्यमृतः'

यन्मनसा न मनुते येनाहुर्म्मनोमतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

'तत् सत्यं स आत्मा तत्त्वमसि' इत्येवमादीनि । ननु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति । तदयुक्तं गौणत्वप्रसङ्गात् वाक्यवैरूप्याच्च । यत्र प्रतीकदृष्टिरभिप्रेता सकृदेव तत्र वचनं भवति । यथा—'मनो ब्रह्म' । 'आदित्यो ब्रह्म' इति । इह पुनः 'त्वमहमस्मि अहं वै त्वमसि' इत्याह । अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिः । भेददृष्ट्यपवादाच्च । तथा हि—'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' ।

यथोदकं दुर्गे वृष्टं पर्व्वतेषु विधावति । एवं धर्म्मान् पृथक्पश्यंस्तानेवानुविधावति ॥

'द्वितीयाद्वै भयं भवति' । 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति ।

Downloaded from https://www.holybooks.com

तत्त्वेव भयं विदुषो मन्वानस्य'। 'सर्व्वं तं परादाद्योऽन्यत्रात्मनः सर्व्वं वेद' इत्येवमाद्या भूयसी श्रुतिर्भेददृष्टिमपवदति। तथा 'आत्मैवेदं सर्व्वम्'। 'आत्मनि विज्ञाते सर्व्वमिदं विज्ञातं भवति'। 'इदं सर्व्वं यदयमात्मा'। 'ब्रह्मैवेदं सर्व्वम्' इति श्रुतिः। तथा स्मृतिरपि

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव। येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ इति॥

क्षेत्रज्ञेश्वरैकत्वं सर्व्वोपनिषत्प्रसिद्धं द्रष्टव्यमित्यर्थः।

सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥

इति अद्वैतात्मज्ञानं सम्यग्दर्शनमित्युक्तं भगवतापि। तस्मादात्मन्येवेश्वरे मनो दधीत।

आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः। इति च।

अथवा बहुनैतेन किं ज्ञातेन तवार्ज्जुन। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥

इति च। अविद्योपाधिपक्षेऽपि प्रमाणवादः सन्ति।

एक एव महानात्मा सोऽहंकारोऽभिधीयते। स जीवः सोऽन्तरात्मेति गीयते तत्त्वचिन्तकैः॥

तथा श्रीविष्णुपुराणे।

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥

परात्मनो मनुष्येन्द्र विभागोऽज्ञानकल्पितः। क्षये तस्यात्मपरयोर्व्विभागोऽभाग एव हि॥ इति॥

विष्णुधर्म्मे च।

यथैकस्मिन् घटाकाशे रजो धूमादिभिर्युते। नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित्॥

तथा द्वन्द्वैरनेकैस्तु जीवे च मलिने कृते। एकस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित्॥ इति॥

ब्रह्मयाज्ञवल्क्ये।

आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथाऽऽत्मैकोऽप्यनेकेषु जलाधारेष्विवांशुमान्॥

'स्वात्मानावीशते देव एकः' इति श्वेताश्वतरे। छान्दोग्ये च 'स एकधा भवति' इत्यादि। 'स तत्र पर्य्येति'। 'स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते'। 'परो विज्ञत एवात्मा स्वात्मायं जीवः' इति श्रुतेः। 'स एष इह प्रविष्टः' इति बृहदारण्यक-श्रुतिः। 'आत्मेत्येवोपासीत' इति। 'तदेतद्ब्रह्मापूर्व्वम्' इत्यादि। 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाता' इत्यादि। 'स वा एष महानज आत्मा योऽयं विज्ञानमयः' इत्यादि। 'अथ योऽन्यां देवतामुपास्ते'। 'एतदात्म्यमिदं सर्व्वम्' इति। 'क्षेत्रज्ञं चापि मां विद्धि' इति। 'निश्चरन्ति यथा लोहपिण्डात्तप्तात् स्फुलिङ्गकाः। सकाशादात्मनस्तद्वत् प्रभवन्ति जगन्ति हि'॥

इति योगयाज्ञवल्क्ये। 'अजः शरीरग्रहणात् स जात इति कीर्त्यते' इति ब्राह्मे।

सर्पवद्रज्जुखण्डस्तु निशायां वेश्ममध्यगः। एको हि चन्द्रो द्वौ व्योम्नि तिमिराहतचक्षुषः॥

आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः। नित्योदितः स्वयंज्योतिः सर्व्वगः पुरुषः परः॥

अहंकाराविवेकेन कर्त्ताऽहमिति मन्यते। इति।



Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



'एवमेवायं पुरुषः प्राज्ञेनात्मना' इति । 'सता सोम्य तदा सम्पन्नो भवति' इति ।
स्वमायया स्वमात्मानं मोहयन्द्वैतमायया । गुणाहृतं स्वमात्मानं लभते च स्वयं हरिः ॥ इति ।

'उत्क्रामन्तं स्थितं वापि' इति । 'अज्ञानेनावृतं ज्ञानम्' इति । 'अव्यक्तादिविशेषान्तमविद्यालक्षणं स्मृतम्' । 'आसीदिदं तमोभूतम्' इति ।

'वाचारम्भणम् विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादि । 'यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति' । 'यत्र वा अस्य सर्व्वमात्मैवाभूत् तत् केन कं जिघ्रेत् तत् केन कं पश्येत्' ।

यस्मिन् सर्व्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

'यत्र नान्यत् पश्यति नान्यत्' इत्यादि । 'भेदोऽयमज्ञाननिबन्धनः' इति । 'नेह नानास्ति किंचन' । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति । 'विश्वतश्चक्षुः' इत्यादि । 'यो योनिमधितिष्ठत्येको विश्वानि रूपाणि योनिश्च सर्व्वाः' इति च । 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादि 'अजो ह्येको जुषमाणोऽनुशेते' । 'देवात्मशक्तिं विदधे' इति । 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इत्यादि । 'एक एव रुद्रो न द्वितीयाय तस्थे' ।

मनो विजृम्भितं चैतद्यत्किञ्चित्सचराचरम् । मनसो ह्यात्मनोभावे द्वैताभावात्तदाप्नुयात् ॥
यद्यद्द्वैतं प्रपञ्चस्य तन्निवर्त्त्यं हि चेतसा । मनोहृत्तिमयं द्वैतमद्वैतं परमार्थतः ॥
यथा स्वप्ने द्वयाभासं चित्तं चलति मायया । तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥

इत्यादि गौड़पादे ।

तर्केणापि प्रपञ्चस्य मनोमात्रत्वमिष्यताम् । दृश्यत्वात् सर्व्वभूतानां स्वप्नादिविषयो यथा ॥

'द्वितीयाद्वै भयं भवति' इति च । 'ज्ञाते त्वात्मनि नास्त्येतत् कार्य्यकारणतात्मनः' इति च । 'एको देवः सर्व्वभूतेषु गूढः' इति । 'असङ्गो ह्ययं पुरुषः' इति च ।

विस्तारः सर्व्वभूतस्य विष्णोः सर्व्वमिदं जगत् । द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥
सर्व्वत्र दैत्याः समतामुपेत्य समत्वमाराधनमच्युतस्य ॥
सर्व्वभूतात्मके तात जगन्नाथे जगन्मये । परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥

'तत्त्वमसि' । 'अहं ब्रह्मास्मि' । 'इदं सर्व्वं यदयमात्मा' । 'अयमात्मा ब्रह्म' । 'तरति शोकमात्मवित्' इत्यादि श्रुतिस्मृतीतिहासपुराणलौकिकेभ्यश्च ।

सिद्धे आत्मतत्त्वेऽपि वेदस्य प्रामाण्यमिष्टव्यम् । 'स्वपक्षसाधनैरकार्य्यमर्थजातमाह चेत् । तथा परोऽपि वेद चेच्छ्रुतिः परात्मटङ्न किम् ।' इत्यभियुक्तैरुक्तम् । अन्यान्वितस्वार्थे पदानां सामर्थ्यं न कार्य्यान्वितस्वार्थे तथा सत्यर्थवादानामनन्वयप्रसङ्गात् अन्वयबुद्धेः स्तुतित्वात् । न हि भवति 'वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता' इति । रागस्यैव प्रवर्त्तकत्वम् न विरागस्य । तथा च श्रुतिः । 'अथो खल्वाहुः काममय एवायं पुरुषः इति स यथाकामो

भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म्म कुरुते यत्कर्म्म तदभिसंपद्यते'। तथा च स्मृतिरपि—

अकामतः क्रिया काचिद् दृश्यते नेह कस्यचित्। यद्यद्धि कुरुते कर्म्म तत्तत्कामस्य चेष्टितम्॥

इति। 'काम एष क्रोध एषः' इति। अन्यपराणामपि मन्त्रार्थवादानां प्रामाण्यमङ्गीकर्त्तव्यम्। तेषामप्रामाण्यकथनेन उरगत्वं गतवान्नहुषः। तत्कथम्।

ऋषयस्तु परिश्रान्ता वाह्यमाना दुरात्मना। देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः॥
पप्रच्छुः संशयं ते तु नहुषं पापचेतसम्। य इमे ब्रह्मणा प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम्॥
एते प्रमाणं भवत उताहो नेति वासव। नहुषो नेति तानाह सहसा मूढ़चेतनः॥

ऋषय ऊचुः।

अधर्म्मे संप्रवृत्तस्त्वं धर्म्मं च विजिहृक्षसि। प्रमाणमेतदस्माकं पूर्व्वं प्रोक्तं महर्षिभिः॥

अगस्त्य उवाच।

ततो विवदमानः सन् ऋषिभिः सह पार्थिवः। अथ मामस्पृशन्मूर्ध्नि पादेनाऽधर्म्मपीड़ितः॥
तेनाऽभूद्धततेजाश्च निःश्रीकश्च शचीपते। ततस्तमहमुद्विग्नमवोचं भयपीड़ितम्॥
यस्मात् पूर्व्वैः कृतं मार्गं महर्षिभिरनुष्ठितम्। अदूष्यं दूषयसि वै यच्च मूर्द्ध्न्यस्पृशः पदा॥
यच्चापि त्वमृषीन् सर्व्वान् ब्रह्मकल्पान् दुरासदान्। वाहान् कृत्वा वाहयसि तेन स्वर्गाद्धतप्रभः॥
ब्रह्मशापपरिग्रस्तः क्षीणपुण्यो महीपते। दशवर्षसहस्राणि सर्परूपधरो महीम्॥
विचरिष्यसि तीर्णश्च पुनः स्वर्गमवाप्स्यसि। दृष्ट्वा युधिष्ठिरं नाम तव वंशसमुद्भवम्॥

इति महाभारते। अतः श्रद्धेयमात्ममन्त्रानम्।

अश्रद्दधानाः पुरुषा धर्म्मस्यास्य परन्तप। अप्राप्य मां निवर्त्तन्ते मृत्युसंसारवर्त्मनि॥

इति भगवताऽप्युक्तम्। ऐतरेयके च। 'एष पन्था एतत् कर्म्म एतद्ब्रह्म एतत् सत्यं तस्मान्न प्रमाद्येतएतन्नातीयात् न ह्यत्यायन् पूर्व्वे येऽत्यायंस्ते पराबभूवुः'। तदुक्तमृषिणा

प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेश॥ इति॥

'प्रजा ह तिस्रोऽत्यायमीयनिति या वै ता इमाः प्रजास्तिस्रोऽत्यायमीयंस्तानीमानि वयांसि वंगा[?]अवगाधाश्चेरपादाः' इति श्रुतिः। वंगा वनगा वृक्षा अवगाधा ओषधय इरपादा उरःपादाः सर्पादयः। तथा च ईशावास्ये अविद्वन्निन्दार्थौ मन्त्रः।

असूर्य्या नाम ते लोका अन्धेन तमसा वृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चाऽऽत्महनो जनाः॥

इति॥ 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति तैत्तिरीयके। तथा शकुन्तलोपाख्याने।

Downloaded from https://www.holybooks.com

**यतः सर्व्वाणि भूतानि भवन्त्यादियुगागमे।**
**यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥ ११॥**
**तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।**
**विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥ १२॥**

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा॥ इति॥
सहस्रनामजपस्य अनुरूपं मानसस्नानमुच्यते।
यस्मिन् देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम्। व्रजेत्तन्मानसं तीर्थं यत्र स्नात्वाऽमृती भवेत्॥
ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे। यः स्नाति मानसे तीर्थे स याति परमां गतिम्॥
सरस्वती रजोरूपा तमोरूपा कलिन्दजा। सत्त्वरूपा च गङ्गा च न यान्ति ब्रह्म निर्गुणम्॥
आत्मा नदी संयमतोयपूर्णा सत्यह्रदा शीलतटा दयोर्म्मिः।
तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुद्ध्यति चान्तरात्मा॥ इति महाभारते॥
'मानसं स्नानं विष्णुचिन्तनम्' इति विष्णुस्मृतौ।
जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते॥
इति मानववचनम्।
जपस्तु सर्व्वधर्म्मेभ्यः परमो धर्म्म उच्यते। अहिंसया च भूतानां जपयज्ञः प्रवर्त्तते॥ इति॥
'यज्ञानां जपयज्ञोऽस्मि' इति भगवद्गीतासु।
अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥ इत्यादि॥ १०॥

यदेकं दैवतं प्रस्तुतं तस्योपलक्षणमुच्यते। यतः यस्मात् सर्व्वाणि भूतानि भवन्ति उद्भवन्ति आदियुगागमे। यस्मिंश्च प्रलयं विनाशं यान्ति। पुनर्भूय एवेत्यवधारणार्थो नान्यस्मिन्नित्यर्थः। युगक्षये महाप्रलये। चकारात् मध्येऽपि यस्मिन् तिष्ठन्ति। 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिः॥ ११॥

तस्य एवं लक्षणलक्षितस्य एकस्य देवस्य लोकप्रधानस्य लोकनहेतुभिः विद्यास्थानैः प्रतिपाद्यमानस्य। जगन्नाथस्य जगतां नाथः स्वामी मायाशवलः परमात्मा निर्लेपश्च तस्य। भूपते महीपाल। विष्णोः व्यापनशीलस्य नाम्नां सहस्रं पापञ्च भयञ्चापहन्तीति पापभयापहं मे मत्तः त्वं शृणु एकाग्रमना भूत्वा अवधारय।
**एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम। नाम्नां सहस्रं लोकानामुपकारकरं खलु॥**
**निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात्। विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम॥**

Downloaded from https://www.holybooks.com

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १३ ॥
ॐ विश्वं विष्णुर्व्वषट्कारो भूतभव्यभवत्प्रभुः ।

यच्छक्तिर्नाम यत्तस्य तत्तस्मिन्नेव वस्तुनि । साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुषु ॥

इति विष्णुधर्म्मे । यद्यपि परस्य ब्रह्मणः षष्टिगुणक्रियाजातिरूढ़ीनां शब्दप्रवृत्तिहेतुभूतानां निमित्तशक्तीनामसम्भवः तथापि सगुणे ब्रह्मणि सविकारे च सर्व्वात्मकत्वात्तेषां शब्दप्रवृत्तिहेतूनां सम्भवात् सर्व्वे शब्दाः परस्मिन् पुंसि प्रवर्त्तन्ते ॥ १२ ॥

यानि नामानि गौणानि गुणयोगात् प्रवृत्तानि तेषु यानि विख्यातानि प्रसिद्धानि ऋषिभिर्म्मन्त्रैः तद्द्रष्टृभिश्च परिगीतानि परितः समन्ततः परमेश्वराख्यानेषु तत्र तत्र गीतानि । महांश्चासावात्मा चेति ।

यच्चाप्नोति यदादत्ते यदत्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्त्यते ॥

इति वचनादयमेव महात्मेति । तस्याचिन्त्यप्रभावस्य तानि वक्ष्यामि । भूतये पुरुषार्थचतुष्टयसाधनार्थं पुरुषार्थचतुष्टयार्थिनामिति । अत्र नामसहस्रे आदित्यादिशब्दानामर्थान्तरे प्रसिद्धानामादित्याद्यर्थानां तत्तद्विभूतित्वेन तदभेदात्तस्यैव स्तुतिरिति प्रसिद्धार्थग्रहणेऽपि स्तुतित्वम् ।

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥

ज्योतींषि विष्णुर्भुवनानि विष्णुर्व्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्व्वं यदस्ति यन्नास्ति च विप्रवर्य्य ॥ इति विष्णुपुराणे ।

'आदित्यानामहं विष्णुः' इत्यारभ्य 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्यन्तं गीतोपनिषदि भगवतैवोक्तम् । 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' । 'पुरुष एवेदं विश्वं कर्म्म तपो ब्रह्म परामृतम्' इत्यादि श्रुतिः । विष्ण्वादिशब्दानां पौनरुक्त्यमपि वृत्तिभेदेनार्थभेदाच्च पौनरुक्त्यम् । 'श्रीपतिः माधवः' इत्यादीनां वृत्त्येकत्वेऽपि शब्दभेदान्न पौनरुक्त्यम् । अर्थैकत्वेऽपि पौनरुक्त्यं न दोषाय । 'नाम्नां सहस्रस्य किमेकं दैवतम्' इति पृष्टेः एकदेवताविषयत्वात् । यत्र पुंलिङ्गशब्दप्रयोगस्तत्र विष्णुर्व्विशेष्यः । यत्र स्त्रीलिङ्गशब्दप्रयोगस्तत्र देवता विशेष्या । यत्र नपुंसकलिङ्गशब्दप्रयोगस्तत्र ब्रह्म विशेषणीयम् ॥ १३ ॥

'यतः सर्व्वाणि भूतानि' इत्यारभ्य जगदुत्पत्तिस्थितिलयकरस्य ब्रह्मण एकदैवतत्वेनाभिहितत्वादादावुभयविधं ब्रह्म विश्वशब्देनोच्यते । विश्वस्य जगतः कारणत्वेन विश्वमित्युच्यते ब्रह्म । आदौ तु विश्वमिति कार्य्यभूतविश्वशब्देन कारणग्रहणं कार्य्यभूतविरिञ्च्यादिनामभिरुपपन्ना स्तुतिर्व्विष्णोरिति दर्शयितुम् । यद्वा परस्मात् पुरुषात् न भिन्नमिदं विश्वं परमार्थतः तेन विश्व-

Downloaded from https://www.holybooks.com

## भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १-६ ॥ १४ ॥

मित्यभिधीयते ब्रह्म। 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्'। 'विश्वमेवेदम्'। 'पुरुषः एवेदं विश्वम्' इत्यादि श्रुतिभ्यः। तद्भिन्नं न किञ्चित् परमार्थतः सदस्ति। अथवा विशतीति विश्वं ब्रह्म। 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः। किञ्च संहृती विशन्ति भूतानि विश्वानि अस्मिन्निति विश्वं ब्रह्म। 'यत् प्रयन्ति अभिसंविशन्ति' इति श्रुतेः। तथाहि सकलं जगत् कार्य्यभूतमेष विशति अत्राखिलं विश्वं विशतीत्युभयथापि विश्वं ब्रह्मेति श्रुतेः। 'अन्यत्र धर्म्मात्' इत्यारभ्य

सर्व्वे वेदा यत्पदमामनन्ति तपांसि सर्व्वाणि च यद्वदन्ति।

यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि॥ ओमित्येतत्।

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥ इति काठके।

'एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कार' इत्युपक्रम्य 'यः पुनरेतत् त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इति प्रश्नोपनिषदि। 'ओमिति ब्रह्म ओमितीदं सर्व्वम्' इति तैत्तीरीयके। 'तद्यथा शङ्कुना सर्व्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्व्वा वाक् संतृण्णा। ओङ्कार एवेदं सर्व्वम्' इति छान्दोग्ये। 'ओमित्येतदक्षरम्' इत्युपक्रम्य

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः। अपूर्व्वोऽनन्तरो बाह्यो न परः प्रणवोऽव्ययः॥

सर्वस्य प्रणवो ह्यादिर्म्मध्यमन्तस्तथैव च। एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥

प्रणवं ह्मीश्वरं विन्द्यात् सर्व्वस्य हृदये स्थितम्। सर्व्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति॥

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः। ओङ्कारो विदितो येन स मुनिर्न्नेतरो जनः॥

इत्यादि गौड़पादाचार्य्यैः। 'ओं तद्ब्रह्म। ओं तद्वायुः। ओं तदात्मा। ओं तत्सत्यम्। ओं तत्सर्व्वम्' इत्यादि श्रुतिभ्यः।

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।

यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत् ते पदं संग्रहेण प्रवक्ष्ये॥

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्य्ययोः। प्रणवः सर्व्ववेदेषु शब्दः खे पौरुषं नृषु॥

महर्षीणां भृगुरहं गिरामप्येकमक्षरम्।

आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। एकाक्षरं परं ब्रह्म प्राणायामः परं तपः॥ इति

'ओंकारः स्वर्गद्वारं तस्माद् ब्रह्माध्येष्यमाणेः एतदादिप्रतिपद्यते'। 'विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्त्तते ब्रह्म'।

प्रणवाद्यास्तथा वेदाः प्रणवे पर्य्यवस्थिताः। वाङ्मयं प्रणवः सर्व्वं तस्मात् प्रणवमभ्यसेत्॥

Downloaded from https://www.holybooks.com

इत्यादि श्रुतिभिश्च विश्वशब्देनोङ्कारोऽप्यभिधीयते। वाच्यवाचकयोः अत्यन्तभेदाभावात् विश्वम् इति ओङ्कार एव ब्रह्म इत्यर्थः। 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति। एतदुक्तं भवति। यस्मात् सर्व्वमिदं विकारजातं ब्रह्म तज्जत्वात् तल्लत्वात् तदनत्वाच्च। न च सर्व्वस्यैकात्मत्वे रागादयः सम्भवन्ति। 'तस्माच्छान्त उपासीत' इत्यादि श्रुतिः।

श्रूयतां धर्म्मसर्व्वस्वं श्रुत्वा चैवावधार्य्यताम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्ज्जुन। सुखं वा यदि वा दुःखं स योगी परमो मतः ॥
निर्गुणः परमात्माऽत्र देहान्तर्व्याप्य तिष्ठति। तमहं ज्ञानविज्ञेयं नाऽवमन्ये न लङ्घये ॥
यद्यागमैर्न विन्देयं तमहं भूतभावनम्। क्रमेयं त्वां गिरिच्छिन्नं हनुमानिव सागरम् ॥
बद्धवैराणि भूतानि द्वेषं कुर्व्वन्ति चेत्ततः। शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणाम्।
एते भिन्नदृशां दैत्या विकल्पाः कथिता मया ॥
कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम। विस्तारः सर्व्वभूतस्य विष्णोः सर्व्वमिदं जगत्।
द्रष्टव्यमात्मवत् तस्मात्तदभेदेन विचक्षणैः ॥
समुत्सृज्यासुरं भावं तस्माद् यूयं तथा वयम्। तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् ॥
सर्व्वत्र दैत्याः समतामुपेताः समत्वमाराधनमच्युतस्य ॥
न मन्त्रादिकृतस्तात न च नैसर्गिको मम। प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि ॥
अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा। तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥
कर्म्मणा मनसा वाचा परपीड़ां करोति यः।
तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् ॥
सोऽहं न पापमिच्छामि न करोमि वदामि च। चिन्तयन् सर्व्वभूतस्थमात्मन्यपि च केशवम् ॥
शारीरं मानसं वाग्जं दैवं भूतभवं तथा। सर्व्वत्र समचित्तस्य तस्य मे जायते कुतः ॥
एवं सर्व्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्त्तव्या पण्डितैर्ज्ञात्वा सर्व्वभूतमयं हरिम् ॥
साम चोपप्रदानञ्च भेददण्डौ तथापरौ। उपायाः कथिता ह्येते मित्रादीनाञ्च साधने ॥
तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः। साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥
सर्व्वभूतात्मके तात जगन्नाथे जगन्मये। परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥
जड़ानामविवेकानामसुराणामपि प्रभो। भाग्यभोग्यानि बाह्यानि सन्त्यनीतिमतामपि ॥
तस्माद् यज्ञेषु पुण्येषु य इच्छेन्महतीं श्रियम्। यतितव्यं समत्वेन निर्व्वाणमपि चेच्छता ॥
देवा मनुष्याः पशवः पक्षिकीटसरीसृपाः। रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥
एतद्विजानता सर्व्वं जगत् स्थावरजङ्गमम्। द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥
एवं ज्ञाते स भगवाननादिः पुरुषोत्तमः। प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंचयः ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः ॥

Downloaded from https://www.holybooks.com

इत्यादिवचनैश्च हिंसादिरहितेन स्तुतिनमस्कारादिकं कर्त्तव्यमिति दर्शयितुं विश्वशब्देन ब्रह्माऽभिधीयत इति वा। शङ्करहिरण्यगर्भौ हरेर्भिन्नाविति न मन्तव्यौ।

विष्णोरन्यन्तु पश्यन्ति ये च ब्रह्माणमेव च। कुतर्कमतयः पापाः पच्यन्ते नरकेष्वधः॥
ये च मूढ़ा दुरात्मानो भिन्नं पश्यन्ति मां हरेः। ब्रह्माणञ्च तथा तेषां ब्रूणहत्यासमं त्वघम्॥

इति भविष्यपुराणे महेश्वरवचनात्।

मत्कर्म्मकृन्मत्परमो मद्भक्तः सङ्गवर्ज्जितः। निर्व्वैरः सर्व्वभूतेषु यः स मामेति पाण्डव॥ इति॥

न चलति निजवर्णधर्म्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः स्थिरमनसं तमवेहि विष्णुभक्तम्॥
विमलमतिरमत्सरः प्रशान्तः शुचिचरितोऽखिलसत्त्वमित्रभूतः।
प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः।
क्षितिरसमतिरम्यमात्मनोऽन्तः कथयति चारुतयैव सालपोतः॥
सकलमिदमहञ्च वासुदेवः परमपुमान् परमेश्वरः स एकः।
इति मतिरमला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥
यमनियमविधूतकल्मषाणामनुदिनमच्युतसक्तमानसानाम्।
अपगतमदमानमत्सराणां व्रज भट दूरतरेण मानवानाम्॥

इत्यादिवचनैर्वैष्णवलक्षणस्य एवंप्रकारत्वाच्च हिंसादिरहितेन विष्णौ स्तुतिनमस्कारादि कर्त्तव्यमिति। 'श्रद्धया देयमश्रद्धया न देयम्'। 'श्रद्धयाऽग्निः समिध्यते' इत्यादिश्रुतेः।

श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत्। इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः॥
अश्रोत्रियं श्राद्धमनधीतवेदमदक्षिणं यज्ञमनृत्विजा हुतम्।
अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षड़ेते तव दैत्यसत्तम॥
पुण्यं मद्द्वेषिणां यच्च मद्भक्तद्वेषिणां तथा। क्रयविक्रयसक्तानां पुण्यं यच्चाग्निहोत्रिणाम्॥
अश्रद्धया च यद्दानं यजतां ददतां तथा। तत्सर्व्वं तव दैत्येन्द्र मत्प्रसादाद्भविष्यति॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥

इति स्मृतिभिः श्रद्धया स्तुतिनमस्कारादि कर्त्तव्यम्। नाश्रद्धया। "ॐ तत् सत् इति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति भगवद्वचनात् स्तुतिनमस्कारादिकं कर्म्माऽसात्त्विकं विगुणमपि श्रद्धापूर्व्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संप्रतिपादितं भवति। आत्मानं विष्णुं ध्यात्वा अर्च्चनस्तुतिनमस्कारादि कर्त्तव्यमिति।

नाविष्णुः कीर्त्तयेद्विष्णुं नाविष्णुर्व्विष्णुमर्च्चयेत्।
नाविष्णुः संस्मरेत् विष्णुं नाविष्णुर्व्विष्णुमाप्नुयात्॥ इति महाभारते कर्म्मकाण्डे।

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



सर्व्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ । एवमेतानि नामानि देवदेवस्य कीर्त्तयेत् ॥
यं यं काममभिध्यायेत् तं तमाप्नोत्यसंशयम् । सर्व्वान् कामानवाप्नोति समाराध्य जगद्गुरुम् ॥
तन्मयत्वेन गोविन्दमित्येतद् दाल्भ्य नान्यथा । तन्मयो वाञ्छितान् कामान् पदमाप्नोति मानवः ॥

इति विष्णुधर्म्मे । तत्र कर्त्तव्यमश्रद्धया स्तुतिनमस्कारादिकमिति ।

सर्व्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्व्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥
इति भगवद्गीतासु ।

अहं हरिः सर्व्वमिदं जनार्द्दनो नान्यत्ततः कारणकार्य्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्ति ॥ इति विष्णुपुराणे ।

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते । तत्र कर्णौ पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
'तस्माद्ब्रह्मैवाऽऽचार्य्यरूपेण च तिष्ठति' इति व्यासस्मृतेः ।
वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥

इति कात्यायनवचनाच्च । यत्र देशे वासुदेवनिन्दा श्रेयोऽर्थिना तत्र वासो न कर्त्तव्यः ।
यदुक्तं भवति ।

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इति श्वेताश्वतरोपनिषन्मन्त्रवर्णात् हरौ गुरौ च परा भक्तिः कार्य्या इति ।

अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
अज्ञानतो ज्ञानतो वा वासुदेवस्य कीर्त्तनात् । तत्सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कलिकल्मषमत्युग्रं नरकार्त्तिप्रदं नृणाम् । प्रयाति विलयं सद्यः सकृद् यत्रानुसंस्मृते ॥
सकृत् स्मृतोपि गोविन्दो नृणां जन्मशतैः कृतम् । पापराशिं दहत्याशु तूलराशिमिवानलः ॥
सेयं वदनवल्मीकवासिनी रसनोरगी । या न गोविन्द गोविन्द गोविन्देति प्रभाषते ॥
पापवल्मीमुखे तस्य जिह्वारूपेण तिष्ठति । या न वक्ति दिवारात्रौ गुणान् गोविन्दसम्भवान् ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥

एको हि कृष्णस्य सकृत्प्रणामो दशाश्वमेधो न च याति तुल्यम् ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥

एवमादिवचनैः श्रद्धाभक्त्योरभावेऽपि नामसंकीर्त्तनं समस्तदुरितं नाशयतीति । 'मनसा चाथ सङ्कल्पयति अथ वाचा व्यवहरति' 'यद्धि मनसा ध्यायति यद्वाचा वदति' इति श्रुतिभ्यां स्मरणं ध्यानञ्च नामसङ्कीर्त्तनेऽन्तर्भूतम् ।

यस्मिन्न्यस्तमतिर्न्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ।

Downloaded from https://www.holybooks.com



मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राऽच्युते कीर्त्तिते ॥

इत्येवं श्रीविष्णुपुराणान्ते श्रीपराशरेणोपसंहृतम् ।

आलोक्य सर्व्वशास्त्राणि विचार्य्य च पुनः पुनः । इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥

इति महाभारतान्ते भगवता श्रीवेदव्यासेन चोपसंहृतम् ।

हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः । ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् ।

इति श्रीहरिवंशे कैलासयात्रायां हरिरेको ध्यातव्य इत्युक्तं महेश्वरेणापि । एतत् सर्व्वमभिप्रेत्य 'एष मे सर्व्वधर्म्माणां धर्म्मोऽधिकतमो मतः' इत्याधिक्यमुक्तम् । 'किमेकं दैवतं लोके किं वाप्येकं परायणम्' इत्यारभ्य 'किं जपन् मुच्यते जन्तुः' इति षट्प्रश्नेषु 'यतः सर्व्वाणि' इतिप्रश्नोत्तराभ्यां यद्ब्रह्मोक्तं तद्विश्वशब्देनोच्यत इति व्याख्यातं विश्वम् । तत् किमित्याकाङ्क्षायामाह विष्णुः इति । ऋग्वेदे च 'आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे' इत्यादिवाक्यैर्व्विष्णोर्नाम सङ्कीर्त्तनं सम्यक् ज्ञानप्राप्तये विहितम् । विषेर्व्याप्त्यभिधायिनो नुक्प्रत्ययान्तस्य रूपं विष्णुरिति देशकालवस्तुपरिच्छेदशून्य इत्यर्थः । 'अन्तर्व्वहिश्च तत् सर्व्वं व्याप्य नारायणः स्थितः' इति व्याप्तिः श्रुतिः । विशतेर्व्वा णुक्प्रत्ययान्तस्य रूपं विष्णुरिति ।

व्याप्ते मे रोदसी पार्थ कान्तिश्चाप्यधिका स्थिता । क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ॥

इति महाभारते ।

यस्माद्विष्टमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्माद्विष्णुरिति ख्यातो विशेर्धातोः प्रवेशनात् ॥ इति विष्णुपुराणे ।

यदुद्देशेन अध्वरे वषट् क्रियते स वषट्कारः । यस्मिन् यज्ञे वषट्क्रिया वा । 'यज्ञो वै विष्णुः' । 'अहं यज्ञोऽहं वषट्कारः' इति श्रुतिः । येन वषट्कारादिमन्त्रात्मना देवान् प्रीणयतीति स वषट्कारः । 'प्रजापतिश्च वषट्कारः' इति देवता वा । भूतञ्च भव्यञ्च भवच्च भूतभव्यभवन्ति तेषां प्रभुः भूतभव्यभवत्प्रभुः । कालभेदमनादृत्य सन्मात्रप्रतियोगिकमैश्वर्य्यं तस्येति प्रभुत्वम् । रजोगुणं समाश्रित्य विरिञ्चिरूपेण भूतानि करोतीति भूतकृत् कथ्यते हरिः । तमोगुणमधिष्ठाय रुद्रात्मना छन्तति हिनस्तीति वा भूतकृत् । सत्त्वगुणमधिष्ठाय भूतानि बिभर्त्ति पाति धारयति पोषयतीति वा भूतभृत् । भूतप्रपञ्चरूपेण भवतीति केवलं भवतीति वा भावः । भवनं भावः सत्तात्मको वा । भूतात्मा भूतानामात्माऽन्तर्यामी । 'एष त आत्मा अन्तर्याम्यमृतः' इति श्रुतेः । भूतानि भावयति जनयति वर्द्धयतीति वा भूतभावनः भूतकृदित्यादिभिः प्राप्तं गुणतन्त्रत्वम् उत्तरश्लोके प्रतिषिध्यते ॥ १४ ॥

Downloaded from https://www.holybooks.com



**पूतात्मा परमात्मा च मुक्तानां परमा गतिः।**
**अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १०-१७ ॥ १५ ॥**
**योगो योगविदां नेता प्रधानपुरुषेश्वरः।**
**नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ १८-२४ ॥ १६ ॥**

पूतात्मेति। पूत आत्मा यस्य स पूतात्मा। कर्म्मधारयो वा। 'केवलो निर्गुणश्च' इति श्रुतेः। गुणोपरागः स्वेच्छातः पुरुषस्येति कल्प्यते विकल्पनाम्नानि। परमश्चासावात्मा चेति परमात्मा कार्य्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावः। मुक्तानां परमा प्रकृष्टा गतिर्गन्तव्या देवता पुनरावृत्त्यसम्भवात्तद्गतस्येति मुक्तानां परमा गतिः। 'मामुपेत्य तु कौन्तेय पुनर्ज्जन्म न विद्यते' इति भगवद्गीतायाम्। अव्यय इति नास्य व्ययो विनाशो विकारो वा विद्यत इत्यव्ययः। 'अजरोऽमरोऽव्ययः' इत्यादि श्रुतेः। पुरं शरीरं तस्मिन् शेते इति पुरुषः।

नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम्। व्याप्य शेते यतश्चात्मा तस्मात् पुरुष उच्यते ॥

इति महाभारते। यद्वा अस्येर्व्वंसर्व्वस्माच्चरयोगेन आसीत् पुरः पूर्व्वमेवेति विग्रहं कृत्वा व्युत्पादितः पुरुषः। 'पूर्व्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्' इति श्रुतेः। अथवा पुरुषु उत्कर्षशालोषु सीदति इति। पुरूणि फलानि सनोति ददाति इति वा। पुरूणि भुवनानि संहारसमये स्यति अन्तं करोति इति वा। पुराणात् सदनात् वा ईच्यते पुरुषः। 'पुराणात् सदनाच्चैव ततोऽपि पुरुषो मतः' इति पञ्चमवेदे। साक्षादव्यवधानेन स्वरूपबोधेन। पश्यति सर्व्वमिति साक्षी। 'साक्षाद्द्रष्टरि संज्ञायाम्' इति पाणिनिस्मरणान्निनिः। क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः। 'आतोऽनुपसर्गे कः' इति कप्रत्ययः। 'क्षेत्रज्ञं चापि मां विद्धि' इति भगवद्वचनात्।

क्षेत्राख्यानि शरीराणि तेषां चैव यथासुखम्। तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते ॥

इति ब्रह्मपुराणे। अतएव न क्षरतीत्यक्षरः परमात्मा। अश्नोतेः सरप्रत्ययान्तस्य रूपमक्षर इति। एवकारात् क्षेत्रज्ञाक्षरयोरभेदः परमार्थतः। 'तत्त्वमसि' इति श्रुतेः। चकारात् व्यवहारिको भेदः प्रसिद्धेरपरमार्थत्वात् ॥ १५ ॥

ज्ञानेन्द्रियाणि सर्व्वाणि निगृह्य मनसा सह। एकत्वभावना योगः क्षेत्रज्ञपरमात्मनोः ॥

तदवाप्यतया योगः इति योगविदो विदुः। योगं विदन्तीति योगविदस्तेषां नेता ज्ञानिनां योगक्षेमवहनादिना योगविदां नेता। 'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इति भगवद्वचनात्। प्रधानं प्रकृतिर्म्मायाया पुरुषो जीवस्तयोरीश्वरः प्रधानपुरुषेश्वरः। नारसिंहवपुः नरस्यावयवाः सिंहस्यावयवाः यस्मिन् लक्ष्यन्ते तद्वपुर्य्यस्य स नारसिंहवपुः। यस्य

सर्व्वं शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥ २५-३७ ॥ १७ ॥
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ३८-४६ ॥ १८ ॥

वक्षसि नित्यं वसति श्रीः स श्रीमान् । अभिरूपाः केशा यस्य स केशवः । 'केशाद्वोऽन्यतरस्याम्' इति वप्रत्ययः प्रशंसायाम् । यद्वा कश्च अश्च ईशश्च त्रिमूर्त्तयः केशाः ते यद्वशे वर्त्तन्ते सः केशवः । के जाताः केशाः पृषोदरादित्वात् साधुत्वम् । केशिवधाद्वा केशवः । विष्णुपुराणे विष्णुं प्रति नारदवचनम् ।
यस्मात्त्वयैव दुष्टात्मा हतः केशी जनार्द्दन । तस्मात् केशवनाम्ना त्वं लोके ज्ञेयो भविष्यसि ॥इति ।
पुरुषाणामुत्तमः पुरुषोत्तमः तत्र 'न निर्द्धारणे' इति षष्ठीसमासप्रतिषेधो न भवतीति जात्याद्यनपेक्षया समर्थत्वात् । यत्र पुनर्ज्जातिगुणक्रियापेक्षया पृथक् क्रियते तत्रासमर्थत्वान्निषेधः प्रवर्त्तते । यथा मनुष्याणां क्षत्रियः शूरतमः । गवां कृष्णा सम्पन्नक्षीरतमा । अध्वगानां धावन् शीघ्रतम इत्येतेषु । अथवा पञ्चमीसमासः । तथा च भगवद्वचनम् ।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । ततोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
इति ॥ १६ ॥
असतश्च सतश्चैव सर्व्वस्य प्रभवाप्ययात् । सर्व्वस्य सर्व्वदा ज्ञानात् सर्व्वमेनं प्रचक्षते ॥
इति भगवद्व्यासवचनात् सर्व्वः । शृणाति संहारसमये संहरति संहारयति सकलाः प्रजाः इति शर्व्वः । निस्त्रैगुण्यतया शुद्धत्वाच्छिवः । 'स ब्रह्मा स शिवः' इत्यभेदोपदेशात् शिवादिनामभिर्हरिरेव स्तूयते । स्थिरत्वात् स्थाणुः । भूतानामादिकारणत्वेन भूतादिः । प्रलयकालेऽस्मिन् सर्व्वं निधीयते इति निधिः । 'कर्म्मण्यधिकरणे च' इति किप्रत्ययः । स एव निधिर्व्विशिष्यते । अव्ययः अनश्वरो निधिरित्यर्थः । स्वेच्छया समीचीनं भवनं यस्य स सम्भवः । 'धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे' इत्यादि भगवद्वचनात् ।
अथ दुष्टविनाशाय साधूनां रक्षणाय च । स्वेच्छया सम्भवाम्येवं गर्भदुःखविवर्ज्जितः ॥ इति च ।
सर्व्वेषां भोक्तॄणां फलानि भावयतीति भावनः । सर्व्वफलदातृत्वम् 'फलमत उपपत्तेः' इत्यत्र प्रतिपादितम् । प्रपञ्चस्याधिष्ठानत्वेन भरणात् भर्त्ता । प्रकर्षेण महाभूतान्यस्माज्जायन्त इति प्रभवः । प्रकृष्टो भवो जन्म यस्येति वा प्रभवः । सर्व्वासु क्रियासु सामर्थ्यातिशयात् प्रभुः । निरुपाधिकमैश्वर्य्यं यस्य स ईश्वरः । 'एष सर्व्वेश्वरः' इति श्रुतिः ॥ १७ ॥
स्वयमेव भवति नापरो भावयतीति स्वयम्भूः । 'स एव स्वयमुद्बभौ' इति मानवं वचनम् ।

Downloaded from https://www.holybooks.com

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥४७-५६॥१९॥

सर्व्वेषाम् उपरि भवति स्वयं भवति इति वा स्वयम्भूः। येषामुपरि भवति यश्चोपरि भवति तदुभयात्मना स्वयमेव भवतीति वा स्वयम्भूः। 'परिभूः स्वयम्भूः' इति मन्त्रवर्णात्। अथवा स्वयम्भूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति न परतन्त्र इति। 'पराञ्चि खानि व्यतृणत् स्वयम्भूः' इति मन्त्रवर्णात्। शं सुखं भक्तानां भावयतीति शम्भुः। आदित्यमण्डलान्तःस्थो हिरण्मयः पुरुषः आदित्यः। द्वादशादित्येषु विष्णुर्वा। 'आदित्यानामहं विष्णुः' इत्युक्तः। अदितेरखण्डितायाः मह्याः अयं पतिरिति वा। 'इयं वा अदितिः'। 'मह्लीं देवीं विष्णुपत्नीम्' इति श्रुतेः। यथा आदित्य एक एव भिन्नेषु जलभाजनेषु भिन्नवत् प्रभासते एवमनेकेषु शरीरेषु एक एव आत्मा भिन्नवत् प्रतिभासते इत्यादित्यसाधर्म्म्याद्वा आदित्यः। पुष्करोपमे अक्षिणी यस्य स पुष्कराक्षः। महान् पूजितः स्वनो नादो वा श्रुतिलक्षणो वा यस्य स महास्वनः। 'सन्महत्' इत्यादिना समासे कृते 'आन्महतः समानाधिकरणजातीययोः' इत्यात्वम्। 'अस्य महतो भूतस्य निःश्वसितमेतत् यत् ऋग्वेदो यजुर्व्वेदः' इति श्रुतेः। आदिर्जन्म निधनं विनाशः। तद्द्वयं न विद्यते यस्य सोऽनादिनिधनः। अनन्तादिरूपेण विश्वं बिभर्त्तीति धाता। कर्म्मणां तत्फलानाञ्च कर्त्ता विधाता। अनन्तादीन् विधारकान् विशेषेण धारयतीति वा विधाता। धातुरुत्तम इति नामैकं सविशेषणं सामानाधिकरण्येन। सर्व्वधातुभ्यः पृथिव्यादिभ्य उत्कृष्टः चित्धातुरित्यर्थः। धातुः विरिञ्चादिति वा। नामद्वयं वा। कार्य्यकारणप्रपञ्चधारणात् चिदेव धातुरुक्तः॥ सर्व्वेषामुच्चतानामतिशयेनोन्नतत्वादुत्तमः ॥ १८ ॥

शब्दादिरहितत्वान्न प्रत्यक्षगम्यः। नाप्यनुमानगम्यः। तद्व्याप्यलिङ्गाभावात्। नाप्युपमानसिद्धः। निर्भागत्वेन सादृश्याभावात्। नाप्यर्थापत्तिग्राह्यः। तद्विनाऽनुपपद्यमानस्यासम्भवात्। नाप्यभावगोचरः। भावरूपत्वात् अभावसाक्षित्वाच्च। नापि शास्त्रप्रमाणवेद्यः। प्रमाणजन्यातिशयाभावात्। यद्येवं शास्त्रयोनित्वं कथम्। उच्यते। प्रमाणादिसाक्षित्वेन प्रकाशरूपस्य प्रमाणाविषयत्वेऽधस्तात्तद्रूपनिर्व्वर्त्तकत्वेन शास्त्रप्रमाणकत्वमित्यप्रमेयः। हृषीकाणीन्द्रियाणि तेषामीशः क्षेत्रज्ञरूपभाक्। यद्वा इन्द्रियाणि यस्य वशे वर्त्तन्ते स परमात्मा हृषीकेशः। यस्य वा सूर्य्यरूपस्य चन्द्ररूपस्य च जगत्प्रीतिकरा हृष्टाः केशा इव रश्मयः स हृषीकेशः। 'सूर्य्यरश्मिर्हरिकेशः पुरस्तात्' इति श्रुतेः। पृषोदरादित्वात् साधुत्वम्। तथा चोक्तं मोक्षधर्म्मे।

सूर्य्याचन्द्रमसोः शश्वदंशुभिः केशसंज्ञितैः। बोधयन् स्वापयंश्चैव जगदुत्तिष्ठते पृथक्॥
बोधनात् स्वापनाच्चैव जगतो हर्षणं भवेत्। अग्नीषोमकृतैरवं कर्म्मभिः पाण्डुनन्दन॥
हृषीकेशोऽहमीशानो वरदो लोकभावनः॥ इति ॥

Downloaded from https://www.holybooks.com

**अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्द्दनः ।**
**प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥५७-६४ ॥ २० ॥**
**ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।**
**हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥६५-७३ ॥ २१ ॥**

सर्व्वजगत्कारणं पद्मं नाभौ यस्य स पद्मनाभः । 'अजस्य नाभावध्येकमर्पितम्' इति श्रुतेः । अमराणां प्रभुः अमरप्रभुः । विश्वं कर्म्म क्रिया यस्य सः विश्वकर्म्मा । क्रियते इति जगत् कर्म्म विश्वं कर्म्म यस्येति वा विचित्रनिर्म्माणशक्तिमत्त्वाद्वा विश्वकर्म्मा । त्वष्टा साहश्याद्वा । मननात् मनुः । 'नान्योऽतोऽस्ति मन्ता' इति श्रुतेः । मन्त्रो वा प्रजापतिर्वा मनुः । संहारसमये सर्व्वभूततनूकरणात् त्वष्टा । त्वचतेस्तनूकरणार्थात् तृच् प्रत्ययः । अतिशयेन स्थूलः स्थविष्ठः । स्थूलदूरादिसूत्रेण स्थूलशब्दस्य इष्ठः । स्थविरः पुराणः । 'एष ह्यस्य स्थविरस्य नाम' इति बह्वृचाः । वयोवचनो वा । स्थिरत्वात् ध्रुव इत्येकं नाम सविशेषणम् ॥ १९ ॥

इन्द्रियैर्न गृह्यत इत्यग्राह्यः । 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह' इति श्रुतेः । शश्वत् सर्व्वकालेषु भवतीति शाश्वतः । 'शाश्वतं शिवमच्युतम्' इति श्रुतेः । सच्चिदानन्दात्मकः कृष्णः ।

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ॥

इति व्यासवचनात् । कृष्णवर्णात्मकत्वात् वा ॥ 'कृष्णो वर्णश्च मे यस्मात्तस्मात् कृष्णोऽहमर्ज्जुन' इति महाभारते । लोहिते अक्षिणी यस्य स लोहिताक्षः । 'स मा वृषभो लोहिताक्षः' इति मन्त्रवर्णात् । प्रलये भूतानि प्रतर्द्दयति हिनस्तीति प्रतर्द्दनः । ज्ञानैश्वर्य्यादिभिर्गुणैः सम्पन्नः प्रभूतः । ऊर्द्ध्वाधोमध्यभेदेन तिसृणामपि ककुभां धामेति त्रिककुब्धाम इत्येकं नाम । येन पुनाति यो वा ऋषिर्द्देवता वा पुनाति तत् पवित्रम् । 'पुवः संज्ञायाम्' 'कर्त्तरि ऋषिदेवतयोः' इति पाणिनिस्मरणादित्रप्रत्ययः ।

अशुभानि निराचष्टे तनोति शुभसन्ततिम् । स्मृतिमात्रेण यत् पुंसां ब्रह्म तन्मङ्गलं विदुः ॥

इति वैष्णवपुराणवचनात् कल्याणरूपत्वान्मङ्गलम् । सर्व्वभूतेभ्यः उत्कर्षात् परं ब्रह्म । मङ्गलं परम् इत्येकम् इदं नाम सविशेषणम् ॥ २० ॥

सर्व्वभूतनियन्तृत्वादीशानः । प्राणान् ददाति चेष्टयतीति प्राणदः । 'को ह्येवान्यात् कः प्राण्याद्' इति श्रुतेः । यद्वा प्राणान् कालात्मना द्यति खण्डयतीति प्राणदः । प्राणान् दापयति शोधयतीति दाति लुनातीति वा प्राणदः । प्राणितीति प्राणः क्षेत्रज्ञः परमात्मा वा । 'प्राणस्य प्राणम्' इति श्रुतेः । मुख्यप्राणो वा । वृद्धतमो ज्येष्ठः । 'ज्य चेत्यधिकारे वृद्धस्य च' इति वृद्धशब्दस्य ज्यादेशविधानात् । प्रशस्यतमः श्रेष्ठः । 'प्रशस्यस्य श्रः' इति आदेशविधानात् ।

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।**
**अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ७४-८४ ॥ २२ ॥**
**सुरेशः शरणं शर्म्म विश्वरेताः प्रजाभवः ।**
**अहः सम्वत्सरो व्यालः प्रत्ययः सर्व्वदर्शनः ॥ ८५-९४ ॥ २३ ॥**

'प्राणो वा ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतेः। मुख्यप्राणो वा। ज्येष्ठस्येत्यधिकरणसिद्धत्वात् सर्व्व-कारणत्वाद्वा ज्येष्ठः। सर्व्वातिशयत्वाद्वा श्रेष्ठः। ईश्वरत्वेन सर्व्वासां प्रजानां पतिः प्रजापतिः। हिरण्मयाण्डान्तर्व्वर्त्तित्वाद्धिरण्यगर्भः ब्रह्मा विरिञ्चिरात्मा। 'हिरण्यगर्भः समवर्त्तताग्रे' इति मन्त्रवर्णात्। भूः गर्भे यस्य स भूगर्भः। मायाः श्रियो धवः पतिः माधवः। मधुविद्यावबोध्य-त्वाद्वा। 'मौनात् ध्यानाच्च योगाच्च विद्धि भारत माधवम्' इति व्यासवचनाद्वा माधवः। मधुनामानमसुरं सूदितवानिति मधुसूदनः। तथा च महाभारते।

कर्णमिश्रोद्भवं चापि मधुनाममहासुरम्। ब्रह्मणोऽपचितिं कुर्व्वन् जघान पुरुषोत्तमः॥
तस्य तात वधादेव देवदानवमानवाः। मधुसूदन इत्याहुर्ऋषयश्च जनार्द्दनम्॥ इति ॥२१॥

सर्व्वशक्तिमत्तयेश्वरः। विक्रमः शौर्य्यं तद्योगाद्विक्रमी। धनुरस्यास्तीति धन्वी। व्रीह्यादित्वादिनिः। 'रामः शस्त्रभृतामहम्' इति भगवद्वचनात्। मेधा बह्वर्थधारणसामर्थ्यं सा यस्यास्ति स मेधावी। 'अस्मायामेधास्रजो विनिः' इतिवचनात् विनिप्रत्ययः। विक्रमते जगद्विश्वं तेन स विक्रमः। विना पक्षिणा गरुड़ेन क्रमात् क्रमणात् विक्रमः। क्रमणात् क्रम-हेतुतया वा क्रमः। 'क्रान्ते विष्णुम्' इति मनुवचनात्। अविद्यमान उत्तमो यस्मात् सोऽनुत्तमः। 'यस्मात् परं नापरमस्ति किञ्चित्' इति श्रुतेः। 'न तत् समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति स्मृतेश्च। दैत्यादिभिर्धर्षयितुं न शक्यत इति दुराधर्षः। प्राणिनां पुण्यापुण्यात्मकं कर्म्म कृतं जानातीति कृतज्ञः। पत्रपुष्पादिकमपि प्रयच्छतो मोक्षं ददातीति वा कृतज्ञः। स्वमहिम-पुरुषप्रयत्नः क्रिया वा कृतिः। सर्व्वात्मकत्वात्तदाधारतया लक्ष्यते कृत्येति वा कृतिः। स्वमहिम-प्रतिष्ठितत्वादात्मवान्। 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' इति श्रुतेः ॥ २२ ॥

सुराणां देवानामीशः सुरेशः। आर्त्तानामार्त्तिहरणात् शरणम्। परमानन्दरूपत्वात् शर्म्म। विश्वस्य कारणत्वाद्विश्वरेताः। सर्व्वाः प्रजा यत्सकाशादुद्भवन्ति स प्रजाभवः। प्रकाशरूपत्वादहः। कालात्मना स्थितो विष्णुः संवत्सर इत्युक्तः। दुराधर्षोऽजगरवद् गृहीतुमशक्यत्वात् इति व्यालः। प्रतीतिः प्रज्ञा प्रत्ययः। 'प्रज्ञानं ब्रह्म' इति श्रुतेः। सर्व्वाणि दर्शनीयानि प्रत्यक्षाणि यस्य स सर्व्वदर्शनः। सर्व्वात्मकत्वात्। 'विश्वतश्चक्षुः' 'विश्वाक्षम्' इति श्रुतेः ॥ २३ ॥

Downloaded from https://www.holybooks.com



अजः सर्व्वेश्वरः सिद्धः सिद्धिः सर्व्वादिरच्युतः।
वृषाकपिरमेयात्मा सर्व्वयोगविनिःसृतः॥ ९५-१०३ ॥ २४ ॥
वसुर्व्वसुमनाः सत्यः समात्माऽसम्मितः समः।
अमोघः पुण्डरीकाक्षो वृषकर्म्मा वृषाकृतिः॥ १०४-११३ ॥२५॥

न जायत इत्यजः। 'न जायते न जनिष्यते' इति श्रुतेः।

न जातो न च जायेयं न जनिष्ये कदाचन। क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः॥

इति महाभारते। सर्व्वेषामीश्वराणामपीश्वरत्वात् सर्व्वेश्वरः। 'एष सर्व्वेश्वरः' इति श्रुतेः। नित्यनिष्पन्नरूपत्वात् सिद्धः। सर्व्ववस्तुषु चिद्रूपत्वात् सिद्धिः। निरतिशयफलरूपत्वाद्वा सिद्धिः। स्वर्गादीनां विनाशित्वादफलत्वम्। सर्व्वभूतानां कारणत्वात् सर्व्वादिः। स्वरूपसामर्थ्यात् न च्युतो न च्यवते न चविष्यते सोऽच्युतः। 'शाश्वतं शिवमच्युतम्' इति श्रुतेः। तथा च भगवद्वचनम्। 'यस्मान् न च्युतपूर्व्वोऽहमच्युतस्तेन कर्म्मणा।' वर्षणात् सर्व्वकामानां धर्म्मो वृषः। कात् तोयाद्भूमिमुत्पाद्य रक्षितवान् कपिर्वराहः वृषाकपिः वृषरूपत्वात् कपिरूपत्वात्।

कपिर्व्वराहः श्रेष्ठश्च धर्म्मश्च वृष उच्यते। तस्माद्वृषाकपिं प्राह काश्यपो मां प्रजापतिः॥

इति व्यासवचनम्। इयानिति मातुं परिच्छेत्तुं न शक्यते आत्मा यस्य सोऽमेयात्मा। सर्व्वसम्बन्धविनिर्गतः सर्व्वयोगविनिःसृतः। 'असङ्गो ह्ययं पुरुषः' इति श्रुतेः। नानाशास्त्रोक्त योगबलादपगतत्वाद्वा सर्व्वयोगविनिःसृतः॥ २४॥

वसन्ति सर्व्वभूतानि अत्र तेषु अयमपि वसतीति वा वसुः। 'वसूनां पावकश्चास्मि' इत्युक्तो वा वसुः। वसुशब्देन धनवाचिना प्राशस्त्यं लक्ष्यते। प्रशस्तं मनो यस्य स वसुमनाः। रागद्वेषादिभिः क्लेशैर्म्मदादिभिरुपक्लेशैः यतो न कलुषितं चित्तं ततस्तन्मनः प्रशस्तम्। अवितथरूपत्वात् परमात्मा सत्यः। 'सत्यं ज्ञानमनन्तम् ब्रह्म' इति श्रुतेः। मूर्त्तामूर्त्तात्मकत्वाद्वा। 'सच्च त्यच्चाभवत्' इति श्रुतेः। सदिति प्राणः तीति अन्नं यमिति आदित्यः तेन प्राणान्नादित्यरूपत्वाद्वा सत्यः। 'सदिति प्राणास्तीत्यन्नं यमित्यसावादित्यः' इति श्रुतेः। सत्सु साधुत्वाद्वा सत्यः। सम आत्मा मनो यस्य रागद्वेषादिभिरदूषितः सर्व्वभूतेषु सम एक आत्मा वा समात्मा। 'सम आत्मेति विद्यात्' इति श्रुतेः। सर्व्वैरपरिच्छिन्नोऽमितोऽसम्मितः। सर्व्वैरप्यर्थजातैः परिच्छिन्नो मितः सम्मितो वा। सर्व्वकालेषु सर्व्वविकाररहितत्वात् समः। मया लक्ष्म्या सह वर्त्तत इति वा समः। पूजितः स्तुतः संस्मृतो वा सर्व्वफलं ददाति न वृथा करोतीति अमोघः। अवितथसङ्कल्पत्वाद्वा। 'सत्यकामः सत्यसङ्कल्पः' इति श्रुतेः। हृदयाख्यपुण्डरीकमश्नुते व्याप्नोति तत्रोपलभ्यत इति पुण्डरीकाक्षः। 'यत् पुण्डरीकं पुरमध्यसंस्थम्' इति श्रुतेः।

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥११४-१२२॥२६॥
सर्व्वगः सर्व्वविद्भानुर्विष्वक्सेनो जनार्द्दनः।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥१२३-१३३॥२७॥

अक्षिणी पुण्डरीकाभे यस्येति वा। धर्म्मलक्षणं कर्म्म यस्य स वृषकर्म्मा। धर्म्मार्थम् आकृतिः शरीरं यस्य स वृषाकृतिः।'धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे' इति भगवद्वचनात् ॥ २५ ॥

संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः। रुदन् राति ददातीति वा। रु दुःखं दुःखकारणं वा द्रावयतीति वा रुद्रः। रोदनाद्द्रावणात् वापि रुद्र इत्युच्यते।
रुर्दुःखं दुःखहेतुं वा विद्रावयति स प्रभुः। रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥ इति ॥

बहूनि शिरांसि यस्य स बहुशिराः। 'सहस्रशीर्षा पुरुषः' इति श्रुतेः। बिभर्त्ति लोकानिति बभ्रुः। विश्वकारणत्वेन विश्वयोनिः। शुचीनि श्रवांसि नामानि श्रवणीयान्यस्येति शुचिश्रवाः। न विद्यते मृतं मरणं यस्य सोऽमृतः। 'अजरोऽमरः' इति श्रुतेः। शाश्वतश्चासौ स्थाणुश्चेति स शाश्वतस्थाणुः। वर आरोहोऽङ्कं यस्येति वरारोहः। वरमारोहणं यस्मिन्निति वा। आरूढानां पुनरावृत्त्यसम्भवात्। 'न च पुनः आवर्त्तते' इति श्रुतेः। 'यं प्राप्य न निवर्त्तन्ते' इति वचनाच्च। महत् सत्यविषयं सृष्टिविषयं वा तपः ज्ञानं यस्य स महातपाः। 'यस्य ज्ञानमयं तपः' इति मन्त्रवर्णात्। ऐश्वर्य्यं प्रतापो वा तपो महदस्येति वा महातपाः ॥ २६ ॥

सर्व्वत्र गच्छतीति सर्व्वगः। कारणत्वेन व्याप्तत्वात् सर्व्वत्र। सर्व्वं वेत्ति विन्दति इति वा सर्व्ववित्। भातीति भानुः। 'तमेवभान्तमनुभाति सर्व्वम्' इति श्रुतेः। 'यदादित्यगतं तेजः' इति स्मृतेश्च। सर्व्ववित्चासौ भानुश्चेति सर्व्वविद्भानुः। विश्वमञ्चति पलायते दैत्यसेना यस्य रणोद्योगमात्रेणेति विश्वक्सेनः। जनान् दुर्ज्जनानर्द्दयति हिनस्ति नरकादीन् गमयति इति वा जनार्द्दनः। जनैः पुरुषार्थम् अभ्युदयापवर्गलक्षणं याच्यते इति वा जनार्द्दनः। वेदयतीति वेदः।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
इति भगवद्वचनात्। यथावद्वेदार्थं वेत्तीति वेदवित्। 'वेदकृद्वेदविदेव चाहम्' इति भगवद्वचनात्।

सर्व्वे वेदाः सर्व्वविद्याः सशास्त्राः सर्व्वे यज्ञाः सर्व्व इज्याश्च कृष्णः।
विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्व्वयज्ञाः समाप्ताः ॥ इति महाभारते।



Downloaded from https://www.holybooks.com

लोकाध्यक्षः सुराध्यक्षो धर्म्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥१३४-१४१॥२८॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्व्वसुः ॥ १४२-१५० ॥ २९ ॥
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्ज्जितः ।

अव्यङ्गो ज्ञानादिभिः परिपूर्णोऽविकल उच्यते । व्यङ्गा व्यक्तिर्न विद्यते वा अव्यङ्गः ॥ 'अव्यक्तोऽयम्' इति भगवद्वचनात् । वेदा अङ्गभूता यस्येति वेदाङ्गः। वेदान् वेत्ति विचारयतीति वेदवित् । क्रान्तदर्शी कविः सर्व्वदृक । 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुतेः । 'कविर्मनीषी' इति मन्त्रवर्णात् ॥२७॥

लोकानध्यक्षयतीति लोकाध्यक्षः सर्व्वेषां लोकानां प्राधान्येनोपद्रष्टा । लोकपालादिसुराणामध्यक्षः सुराध्यक्षः । धर्म्माधर्म्मौ साक्षादीक्षते अनुरूपं फलं दातुं तस्माद्धर्म्माध्यक्ष. । कार्य्यरूपेण कृतः कारणरूपेणाऽकृतश्च कृताकृतः । सर्गादिषु पृथग्विभूतयः चतस्रः आत्मानः यस्य स चतुरात्मा ।

ब्रह्मा दक्षादयः कालस्तथैवाऽखिलजन्तवः । विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥
विष्णुर्मन्वादयः कालः सर्व्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥
रुद्रः कालोऽन्तकालश्च समस्ताश्चैव जन्तवः । चतुर्द्धा प्रलयायैता जनार्द्दनविभूतयः ॥
इति विष्णुपुराणे ।

व्यूह्यात्मानं चतुर्द्धा तु वासुदेवादिमूर्त्तिभिः । सृष्ट्यादीनि करोतीति चतुर्व्यूह उदाहृतः ॥
इति व्यासवचनात् ॥ दंष्ट्राश्चतस्रो यस्य स चतुर्दंष्ट्रो नृसिंहविग्रहः । शृङ्गसादृश्याद्वा शृङ्गं दंष्ट्रेत्युच्यते । 'चत्वारि शृङ्गा' इति श्रुतेः । चत्वारो भुजा यस्य स चतुर्भुजः ॥२८॥

प्रकाशैकरसत्वाद् भ्राजिष्णुः । भोज्यरूपतया प्रकृतिर्म्मायां भोजनमित्युच्यते । पुरुषरूपेण तां भुङ्क्ते इति भोक्ता । हिरण्याक्षादीन् सहते अभिभवतीति सहिष्णुः । हिरण्यगर्भरूपेण जगदादावुत्पद्यते स्वयमिति जगदादिजः । न विद्यतेऽघो यस्येत्यनघः । 'अपहतपाप्मा' इति श्रुतेः । विजयते ज्ञानवैराग्यादिभिर्गुणैर्विश्वमिति विजयः । यतोऽतिशेते सर्व्वभूतानि स्वभावतोऽतो जेता । विश्वं योनिरस्य विश्वश्चासौ योनिश्चेति वा स विश्वयोनिः । पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति पुनर्व्वसुः ॥ २९ ॥

इन्द्रमुपगतोऽनुजत्वेनेति उपेन्द्रः । यद्वा उपरि इन्द्रः उपेन्द्रः ।
ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः । उपेन्द्र इति कृष्ण त्वां गास्यन्ति भुवि देवताः ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥१५१-१६२ ॥ ३० ॥**

**वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।**

**अतीन्द्रियो महामायो महोत्साहो महाबलः ॥१६३-१७२॥३१॥**

**महाबुद्धिर्महावीर्य्यो महाशक्तिर्महाद्युतिः ।**

इति श्रीहरिवंशवचनात् । बलिं वामनरूपेण याचितवानिति वामनः । संभजनीय इति वा । 'मध्ये वामनमासीनं विश्वे देवा उपासते' इति मन्त्रवर्णात् । स एव जगत्त्रयं क्रममाणः प्रांशुरभूदिति प्रांशुः ।

तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्व्वदेवमयं रूपं दर्शयामास वै प्रभुः ॥

भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी ।

इत्यादि विश्वरूपं दर्शयित्वा ।

तस्य विक्रमतो भूमिश्चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य नाभ्यां तौ समवस्थितौ ॥

दिवमाक्रममाणस्य जानुमूले व्यवस्थितौ ।

इत्यादिना प्रांशुत्वं दर्शितं श्रीहरिवंशे ।

न मोघं चेष्टितं यस्य सोऽमोघः । स्मरतां स्तुवतां शृण्वतामर्च्चयतां पावनत्वात् शुचिः । 'अस्पर्शश्च महाशुचिः' इति मन्त्रवर्णात् । बलप्रकर्षशालित्वादूर्ज्जितः । अतीत्येन्द्रं स्थितो ज्ञानैश्वर्य्यादिभिः स्वभावसिद्धैरिति अतीन्द्रः । सर्व्वेषां प्रतिसंग्रहात् संग्रहः । सृज्यरूपतया सर्गहेतुत्वात् सर्गः । एकरूपेण जन्मादिरहिततया धृतोऽवस्थित आत्मा येन स धृतात्मा । स्वेषु स्वेष्वधिकारेषु प्रजा नियमयतीति नियमः । अन्तर्यच्छतीति यमः ॥ ३० ॥

निःश्रेयसार्थिभिः वेदनार्हत्वाद्वेद्यः । सर्व्वविद्यानां वेदितृत्वात् वैद्यः । सदा आविर्भूतस्वरूपत्वात् सदायोगी । धर्म्मत्राणायाऽसुरादीन् वीरान् वीर्य्यवतो हन्तीति वीरहा । मायाः विद्यायाः पतिः माधवः ।

मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् ।

तस्मान्माधवनामाऽसि धवः स्वामीति शब्दितः ॥

इति श्रीहरिवंशे । यद्वा मा लक्ष्मीः धीः सरस्वती ते अवतीति माधवः । निपातनादीकारलोपः । यथा मधु परां प्रीतिमुत्पादयति तथैवाऽयमिति मधुः । 'अशब्दमस्पर्शम्' इत्यादि श्रुतेः शब्दादिरहितत्वात् इन्द्रियाणामविषयः अतीन्द्रियः । विना मायामपि मायाकारित्वात् महामायः । 'मम माया दुरत्यया' इति भगवद्वचनात् । जगदुत्पत्तिस्थितिलयकरणे सोत्साहत्वात् महोत्साहः । बलिनामपि बलवत्त्वान्महाबलः ॥ ३१ ॥

बुद्धिमतामपि बुद्धिमत्त्वान्महाबुद्धिः । महदुत्पत्तिकारणम् अविद्यालक्षणं वीर्य्यमस्येति महा-

**अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥१७३-१८०॥३२॥**

**महेष्वासो महीभर्त्ता श्रीनिवासः सतां गतिः ।**

**अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥१८१-१८८॥३३॥**

**मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।**

**हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥१८९-१९७॥३४॥**

वीर्य्यः । महती शक्तिः सामर्थ्यमस्येति महाशक्तिः । महती द्युतिः बाह्याभ्यन्तरीया चास्येति महाद्युतिः । 'स्वयं ज्योतिः' 'ज्योतिषां ज्योतिः' इति च श्रुतेः । इयानिति निर्देष्टुं यन्न शक्यते परस्मै स्वसंवेद्यत्वात् तदनिर्देश्यं वपुर्यस्य इत्यनिर्देश्यवपुः । ऐश्वर्य्यलक्षणा समग्रा श्रीर्यस्य स श्रीमान् । सर्व्वैः प्राणिभिरमेया बुद्धिरात्मा यस्य सोऽमेयात्मा । महान्तमद्रिं मन्दरं गोवर्द्धनञ्च अमृतमथने गोरक्षणे च धृतवानिति महाद्रिधृक् ॥ ३२ ॥

महानिष्वास इषुक्षेपो धनुर्वा यस्य स महेष्वासः । एकोऽर्णवाप्लुतां महीं बभारेति महीभर्त्ता । यस्य वक्षस्यनपायिनी श्रीर्निवसति स श्रीनिवासः । सतां वैदिकानां साधूनां पुरुषार्थावाप्ति-हेतुः सतां गतिः । न केनापि प्रादुर्भावेषु निरुद्ध इत्यनिरुद्धः । सुरान् आनन्दयति इति सुरानन्दः ।

नष्टां वै धरणीं पूर्व्वमविन्दं वै गुहागताम् । गोविन्द इति तेनाऽहं देवैर्व्वाग्भिरभिष्टुतः ॥

इति मोक्षधर्म्मवचनात् गोविन्दः ।

अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः ।
गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम् ॥

गौरेषा तथा वाणी ताञ्च यद्विन्दते भवान् । गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवान् ॥

इति श्रीहरिवंशे । गां वाणीं विन्दतीति गोविदः तेषां पतिः विशेषेणेति गोविदां पतिः ॥ ३३ ॥

तेजस्विनामपि मरीचित्वात् तेजस्त्वान्मरीचिः । 'तेजस्तेजस्विनामहम्' इति भगवद्वचनात् । स्वाधिकारात् प्रमाद्यतीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण स दमनः । अहं स इति तादात्म्येन भावितः संसारबन्धं हन्तीति हंसः । पृषोदरादित्वात् साधुत्वम् । हन्ति गच्छतीति सर्व्वशरीरेष्विति वा । 'हंसः शुचिषत्' इति मन्त्रवर्णात् । शोभनपर्णत्वात् सुपर्णः । 'द्वा सुपर्णा' इति श्रुतिः । भुजेन गच्छताम् उत्तमो भुजगोत्तमः । हिरण्यमिव कल्याणी नाभिरस्य हितरमणीयनाभित्वाद्वा हिरण्यनाभः । वदरिकाश्रमे नरनारायणरूपेण शोभनं तपश्चरतीति सुतपाः । 'मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमन्तपः' इति स्मरणात् । पद्ममिव नाभिरस्य इति

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**अमृत्युः सर्व्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।**
**अजो दुर्म्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥१९८-२०८॥३५॥**
**गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।**
**निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥२०९-२१८॥३६॥**
**अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।**
**सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥२१९-२२६॥३७॥**

हृत्पद्मस्य नाभौ मध्ये प्रकाशमानाद्वा पद्मनाभः। पृषोदरादित्वात् साधुत्वम्। प्रजानां पतिः प्रजापतिः ॥ ३४ ॥

यतो मृत्युः विनाशस्तद्धेतुर्वा न वर्त्तते अस्य इत्यमृत्युः। प्राणिनां कृताकृतं सर्व्वं पश्यति स्वाभाविकेन बोधेनेति सर्व्वदृक्। हिनस्तीति सिंहः। पृषोदरादित्वात् साधुत्वम्। कर्म्मफलैः पुरुषान् सन्धत्ते इति सन्धाता। फलभोक्ता च स एवेति सन्धिमान्। सदैकरूपत्वात् स्थिरः। अजति गच्छति क्षिपति इति वा अजः। मर्षितुं सोढुं दानवादिभिः न शक्येत इति दुर्म्मर्षणः। श्रुतिस्मृत्यादिभिः सर्व्वेषामनुशिष्टिं करोतीति शास्ता। विशिष्टेन श्रुतः सत्यज्ञानादिलक्षण आत्मा अतो विश्रुतात्मा। सुरारीणां निहन्तृत्वात् सुरारिहा ॥३५॥

सर्व्वविद्यानामुपदेष्टृत्वात् सर्व्वेषां जनकत्वाद्वा गुरुः। विरिञ्चादीनामपि ब्रह्मविद्याप्रदायकत्वाद् गुरुतमः। 'यो ब्रह्माणम्' इति मन्त्रवर्णात्। धाम ज्योतिः। 'नारायणः परं ज्योतिः' इति मन्त्रवर्णात्। सर्व्वलोकानामास्पदत्वाद्वा धाम। 'परं ब्रह्म परं धाम' इति श्रुतेः। सत्यवचनलक्षणधर्म्मरूपत्वात् सत्यः। 'तस्मात् सत्यं परमं वदन्ति' इति श्रुतेः। सत्योऽवितथः सत्यस्य सत्यमिति वा सत्यः। 'प्राणा वै सत्यं तेषामेव सत्यम्' इति श्रुतेः। सत्योऽवितथः पराक्रमो यस्य सः सत्यपराक्रमः। निमीलिते यतो नेत्रे योगनिद्रारतस्याऽतो निमिषः। नित्यप्रबुद्धस्वभावत्वात् अनिमिषः मत्स्यरूपतया आत्मरूपतया वा। वैजयन्त्याख्यां भूततन्मात्ररूपां स्रजं नित्यं बिभर्त्तीति स्रग्वी। वाचस्पतिरुदारधीरिति पदद्वयमेकं नाम। वाचो विद्यायाः पतिर्व्वाचस्पतिः। सर्व्वार्थविषया धीः बुद्धिरस्येति उदारधीः ॥३६॥

अग्रं प्रकृष्टं पदं नयति मुमुक्षूनिति अग्रणीः। भूतग्रामस्य नेतृत्वात् ग्रामणीः। श्रीः कान्तिः सर्व्वातिशायिनी अस्येति श्रीमान्। प्रमाणानुग्राहकोऽभेदकारकः तर्को न्यायः। जगद्यन्त्रनिर्व्वाहकत्वान्नेता। श्वसनरूपेण भूतानि चेष्टयतीति समीरणः। सहस्राणि मूर्द्धानोऽस्येति सहस्रमूर्द्धा। विश्वस्यात्मा विश्वात्मा। सहस्राण्यक्षीण्यस्येति सहस्राक्षः। सहस्राणि पादा अस्येति सहस्रपात्। 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इति मन्त्रवर्णात् ॥३७॥

Downloaded from https://www.holybooks.com



**आवर्त्तनो निवृत्तात्मा संवृतः संप्रमर्द्दनः।**
**अहःसंवर्त्तको वह्निरनिलो धरणीधरः ॥२२७-२३५॥३८॥**
**सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः।**
**सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥२३६-२४६॥३९॥**

आवर्त्तयितुं संसारचक्रं शीलमस्येति आवर्त्तनः। शरीरबन्धनान्निवृत्त आत्मा स्वरूपमस्येति निवृत्तात्मा। आच्छादिकया अविद्यया संवृतत्वात् संवृतः। सम्यक्प्रमर्द्दयति रुद्रकालाद्याभिः विभूतिभिरिति संप्रमर्द्दनः। सम्यगह्नां प्रवर्त्तनात् सूर्य्यः अहः संवर्त्तकः सम्यक्वर्त्तकः। वहनाद्वह्निः। अनादितः अनिलयो वाऽनिलः। अनादानाद्वा अननाद्वा अनिलः। शेषरूपेण वराहरूपेण वा धरणीं धत्ते इति धरणीधरः ॥३८॥

शोभनः प्रसादोऽस्य अपकारवतामपि शिशुपालप्रभृतीनां मोक्षं प्रयच्छतीति सुप्रसादः। रजस्तमोभ्यामकलुषितम् अन्तःकरणमात्मा यस्येति प्रसन्नात्मा। यद्वा प्रसन्नस्वभावः कारुणिक इत्यर्थः। अवाप्तसर्व्वकामत्वाद्वा करुणार्द्रस्वभावत्वाद्वा प्रसन्नात्मा। विश्वं धृष्णातीति विश्वधृक्। ञि धृषा प्रागल्भ्ये। विश्वं भुङ्क्ते भुनक्ति पालयतीति वा विश्वभुक्। हिरण्यगर्भादिरूपेण विविधो भवतीति विभुः। 'नित्यं विभुम्' इति मन्त्रवर्णात्। सत्करोति पूजयतीति सत्कर्त्ता। पूजितैरपि पूजितः सत्कृतः। न्यायेऽनुवृत्तितया साधयतीति साधुः। साध्यभेदानुपादानात् साध्यमात्रसाधको वा। जनान् संहारसमयेऽपह्नुतेऽपनयतीति जह्नुः। अथवा जहाति अविदुषो भक्तान्नयति परं पदमिति जह्नुः। नर आत्मा ततो जातान्याकाशादीनि नाराणि तानि कार्य्याण्ययं कारणात्मना व्याप्नोत्यतश्च तान्यायतनमस्येति नारायणः।

यच्च किञ्चिज्जगत् सर्व्वं दृश्यते श्रूयतेऽपि वा। अन्तर्ब्बहिश्च तत्सर्व्वं व्याप्य नारायणः स्थितः॥

इति मन्त्रवर्णात्।

नराज्जातानि तत्त्वानि नाराणीति ततो विदुः। तान्येव चायनं तस्य तेन नारायणः स्मृतः॥

इति श्रीहरिवंशे। नाराणां जीवानाम् अयनत्वात् प्रलये इति वा। 'यत् प्रयन्ति अभिसंविशन्ति' इति श्रुतेः।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः॥

इति (मनु)व्यासवचनाद्वा नारायणः।

नारायणाय नमः इत्ययमेव सत्यं संसारघोरविषसंहरणाय मन्त्रः।
शृण्वन्तु भव्यमतयो यतयोऽस्तरागा उच्चैस्तरामुपदिशाम्यहमूर्द्ध्वबाहुः॥

इति श्रीनृसिंहपुराणे। 'नयतीति नयः प्रोक्तः परमात्मा सनातनः' इति व्यासवचनम् ॥३९॥

Downloaded from https://www.holybooks.com



असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥२४७-२५६॥४०॥
वृषाही वृषभो विष्णुर्वृषपर्व्वा वृषोदरः ।
वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ॥२४९-२६४॥४१॥
सुभुजो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो वृहद्रूपः शिपिविष्टः प्रकाशनः ॥२५४-२७४॥४२॥

यस्मिन् संख्यानामरूपभेदादिः न विद्यते सोऽसंख्येयः । अप्रमेय आत्मा स्वरूपं यस्येति अप्रमेयात्मा । अतिशेते सर्व्वम् अतो विशिष्टः । 'विश्वतः परमम्' इति श्रुतेः । शिष्टं शासनं करोतीति शिष्टकृत् । शिष्टान् करोति पालयति इति वा । सामान्यवचनो धातुः विशिष्टवचनो दृष्टः कुरु काष्ठानीत्याहरणे यथा तद्वदिति वा । शुचिः निरञ्जनः । सिद्धो निवृत्तोऽर्थ्यमानः अर्थोऽस्येति सिद्धार्थः । 'सत्यकामः' इति श्रुतेः । सिद्धो निष्पन्नः सङ्कल्पोऽस्येति सिद्धसङ्कल्पः । 'सत्यसङ्कल्पः' इति श्रुतेः । सिद्धानि फलानि कर्त्तृभ्यः स्वाधिकारानुरूपतो ददातीति सिद्धिदः । सिद्धेः साधकत्वात् सिद्धिसाधनः ॥४०॥

वृषो धर्म्मः पुण्यं तदेव अहः प्रकाशसाधर्म्यात् द्वादशाहादिः क्रतुः वृषाहः । स यस्यास्ति स वृषाही । वर्षत्येष भक्तेभ्यः कामानिति वृषभः । यास्केनोक्तम् । विष्णुः 'विष्णुः विक्रमणत्' इति व्यासेनोक्तम् । वृषरूपाणि सोपानपर्व्वाणि परं धामारुरुक्षोर्भवतीति वृषपर्व्वा । प्रजाः वर्षत्युदरं यस्य स वृषोदरः । वर्द्धयतीति वर्द्धनः । प्रपञ्चरूपेण वर्द्धते इति वर्द्धमानः । इत्थं वर्द्धमानोऽपि पृथगवतिष्ठतीति विविक्तः । श्रुतयः सागरा इवात्र निधीयन्त इति श्रुतिसागरः ॥ ४१ ॥

शोभना भुजा जगद्रक्षाकारका अस्येति सुभुजः । पृथिव्यादीनि लोकधारकाणि धारयन् अन्यैः धारयितुमशक्यत्वात् न केनापि धारयितुं शक्यत इति दुर्द्धरः । दुःखेन ध्यानसमये मुमुक्षुभिः हृदयेन धार्य्यत इति वा दुर्द्धरः । यतो निःसृता ब्रह्ममयी वाक तस्माद्वाग्मी । महांश्चासाविन्द्रश्चेति महेन्द्रः । ईश्वराणामपीश्वरः । वसु धनं ददातीति वसुदः । 'अन्नादो वसुदानः' इति श्रुतेः । आच्छादयत्यात्मनः स्वरूपं माययेति वा वसुः । अन्तरिक्ष एव वसति नान्यत्रेत्यसाधारणेन वसनेन वा वसुः । 'वसुरन्तरिक्षसत्' इति श्रुतेः । एकं रूपमस्य न विद्यत इति नैकरूपः । 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः । 'ज्योतींषि विष्णुर्भुवनानि विष्णुः' इति श्रीविष्णुपुराणे । वृहन्महत् वराहादिरूपेण वसुधातलं बिभ्रद्वराहरूपमस्येति वृहद्रूपः । शिपयः पशवः तेषु विशति प्रतितिष्ठति यज्ञरूपेणेति शिपिविष्टो यज्ञमूर्त्तिः । 'यज्ञो

**ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।**
**ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥२७५-२८२॥४३॥**
**अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।**
**औषधं जगतः सेतुः सत्यधर्म्मपराक्रमः ॥२८३-२८९॥४४॥**
**भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।**
**कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥२९०-२९९॥४५॥**

वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति' इति श्रुतेः । शिपयो रश्मयस्तेषु निविष्ट इति वा ।

शैत्याच्छयनयोगाच्च शीति वारि प्रचक्षते । तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः ॥
तेषु प्रवेशाद्विश्वेशः शिपिविष्ट इहोच्यते । इति ॥

सर्व्वेषां प्रकाशनशीलत्वात् प्रकाशनः ॥ ४२ ॥

ओजः प्राणबलम् तेजः शौर्य्यादयो गुणाः द्युतिः दीप्तिस्ता धारयतीति ओजस्तेजोद्युतिधरः । अथवा ओजस्तेज इति नामद्वयम् । 'बलं बलवतामस्मि तेजस्तेजस्विनामहम्' इति भगवद्वचनात् । द्युतिं ज्ञानलक्षणां दीप्तिं धारयतीति द्युतिधरः । प्रकाशलक्षणः आत्मा यस्य सः प्रकाशात्मा । सवित्रादिभिर्व्विभूतिभिर्व्विश्वं प्रतापयतीति प्रतापनः । धर्म्मज्ञानवैराग्यैश्वर्य्यादिभिः उपेतत्वात् ऋद्धः । स्पष्टम् उदात्तम् ओङ्कारलक्षणम् अक्षरमस्येति स्पष्टाक्षरः । ऋगयजुःसामलक्षणो मन्त्रः । मन्त्रबोध्यत्वाद्वा मन्त्रः । संसारदुःखतिग्मांशुतापत्रयतापितचेतसां चन्द्रांशुरिवाऽऽह्लादकारकत्वाच्चन्द्रांशुः । भास्करद्युतिसाधर्म्म्यात् भास्करद्युतिः ॥४३॥

मथ्यमाने पयोनिधौ अमृतांशोश्चन्द्रस्योद्भवो यस्मात् सः अमृतांशूद्भवः । भातीति भानुः । 'तमेवभान्तमनुभाति सर्व्वम्' इति श्रुतेः । शश इव बिन्दुर्लाञ्छनं यस्य स शशबिन्दुश्चन्द्रः तद्वत् प्रजाः पुष्णातीति शशबिन्दुः । 'पुष्णामि चौषधीः सर्व्वाः सोमो भूत्वा रसात्मकः' इति भगवद्वचनात् । सुराणां शोभनदातॄणां देवानां वा ईश्वरः सुरेश्वरः । संसाररोगभेषजत्वात् औषधम् । जगतां समुद्धरणहेतुत्वात् असम्भेदकरत्वाद्वा सेतुवत् वर्णाश्रमादीनाम् जगतः सेतुः । 'एष सेतुर्व्विधरण एषां लोकानामसम्भेदाय' इति श्रुतेः । सत्या अवितथा धर्म्मज्ञानादयो गुणाः पराक्रमश्च यस्य स सत्यधर्म्मपराक्रमः ॥४४॥

भूतभव्यभवतां भूतग्रामाणां नाथः । तैः याच्यते तान् उपतपत्याशास्ते तेषामिष्टे इति भूतभव्यभवन्नाथः । पवत इति पवनः । 'पवनः पवतामस्मि' इति भगवद्वचनात् । पावयतीति पावनः । 'भीषास्माद्वातः पवते' इति श्रुतेः । अनान् प्राणान् आत्मत्वेन लाति करोतीति

Downloaded from https://www.holybooks.com

**युगादिकृद् युगावर्त्तो नैकमायो महाशनः ।**
**अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥३००-३०७॥४६॥**
**इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।**
**क्रोधहा क्रोधकृत्कर्त्ता विश्ववाहुर्महीधरः ॥३०८-३१८॥४७॥**
**अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।**

जीवः अनलः । अनान् लातीति वा नलतेर्गन्धवाचिनो नञ्पूर्व्वाद्वा । 'अगन्धमरसम्' इति श्रुतेः । अलं पर्य्याप्तमस्य न विद्यत इति वा अनलः । कामान् हन्ति सुमुक्षूणां भक्तानां हिंसकानाञ्चेति कामहा । सात्त्विकानां कामिनां कामान् करोतीति कामकृत् । कामस्य प्रद्युम्नस्य जनकत्वाद्वा कामकृत् । अभिरूपतमः कान्तः । काम्यते पुरुषार्थकाङ्क्षिभिरिति कामः । भक्तेभ्यः कामान् प्रकर्षेण ददाति इति कामप्रदः । प्रकर्षेण भवनात् प्रभुः ॥ ४५ ॥

युगादेः कालभेदस्य कर्त्तृत्वात् युगादिकृत् । युगानामादिमारम्भं करोतीति वा । युगानि कृतादीनि आवर्त्तयति कालात्मनेति युगावर्त्तः । एका माया न विद्यते वह्वीः माया वहतीति नैकमायः । 'न लोपो नञः' इति नकारलोपो न भवति । ञकारानुबन्धरहितस्यापि नकारस्य प्रतिषेधवाचिनो विद्यमानत्वात् । कल्पान्ते सर्व्वग्रसनात् महदशनमस्येति महाशनः । सर्व्वेषाम् बुद्धीन्द्रियाणामगम्योऽदृश्यः । स्थूलरूपेण वर्त्तते इति स्थूलः । व्यक्तं रूपमस्येति स्वयंप्रकाशकत्वात् योगिनां व्यक्तरूपः इति वा । सहस्राणि सुरारीणां युद्धे जयतीति सहस्रजित् । सर्व्वाणि भूतानि युद्धक्रीड़ादिषु सर्व्वत्राचिन्त्यशक्तितया जयतीति अनन्तजित् ॥ ४६ ॥

परमानन्दात्मकत्वेन प्रियः इष्टः । यज्ञेन पूजित इति वा । सर्व्वेषामन्तर्यामित्वेन अविशिष्टः । शिष्टानां विदुषामिष्ट इति शिष्टेष्टः । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति भगवद्वचनात् । शिष्टैरिष्टः पूजित इति वा शिष्टेष्टः । शिखण्डः कलापोऽलङ्कारोऽस्यास्तीति शिखण्डी गोपवेशधरः । यतो नह्यति भूतानि माययाऽतो नहुषः । कामानां वर्षणात् धर्म्मरूपत्वाद् वृषः धर्म्मः ।

वृषो हि भगवान् धर्म्मः स्मृतो लोकेषु भारत । नैघण्टुकपदाख्यानैर्विद्धि मां वृष इत्युत ॥

इति महाभारते । साधूनां क्रोधं हन्तीति क्रोधहा । असाधुषु क्रोधं करोतीति क्रोधकृत् । क्रियत इति जगत् कर्म्मजातं तस्य कर्त्ता । 'य एतेषां पुरुषाणां कर्त्ता यस्य वै तत् कर्म्म स वै वेदितव्यः' इति श्रुतेः । क्रोधकृतां दैत्यादीनां कर्त्ता छेदक इत्येकं वा नाम । विश्वेषामालम्बनत्वेन विश्वे वाहवोऽस्येति विश्ववाहुः । 'विश्वतो वाहुः' इति श्रुतेः । महीं पूजां धरणीं वा धरतीति महीधरः ॥ ४७ ॥

अच्युत इति जायतेऽस्ति वर्द्धते परिणमते अपक्षीयते विनश्यतीति षड्भावविकाररहितत्वाद-



Downloaded from https://www.holybooks.com

**अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥३१९-३२७॥४८॥**

**स्कन्दः स्कन्दधरो धुर्य्यो वरदो वायुवाहनः।**

**वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥३२८-३३६॥४९॥**

**अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।**

**अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ॥३३७-३४६॥५०॥**

च्युतः। 'शाश्वतं शिवमच्युतम्' इति श्रुतेः। जगदुत्पत्त्यादिकर्म्मभिः प्रथ्यते इति प्रथितः। सूत्रात्मना प्रजाः प्राणयतीति प्राणः। 'प्राणोऽहमस्मि' इति बह्वृचाः। सुराणामसुराणाञ्च यथासंख्यं प्राणं बलं ददाति द्यति वेति प्राणदः। अदित्यां कश्यपाद्वासवास्यानुजो जात इति वासवानुजः। आपो यत्र निधीयन्ते सोऽपां निधिः। 'सरसामस्मि सागरः' इति गीतासु। अधितिष्ठन्ति भूतानि उपादानकारणत्वेन ब्रह्मेत्यधिष्ठानं। 'मत्स्थानि सर्व्वभूतानि' इति भगवद्वचनात्। अधिकारिभ्यः फलं कर्म्मानुरूपतः प्रयच्छन् न प्रमाद्यतीति अप्रमत्तः। स्वे महिम्नि स्थितः प्रतिष्ठितः। 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' इति श्रुतेः ॥४८॥

स्कन्दत्यमृतरूपेण स्रवति वायुरूपेण शोषयतीति वा स्कन्दः। स्कन्दं धर्म्मपथं धारयति इति वा स्कन्दधरः। धुरं वहति समस्तभूतजन्मादिलक्षणामिति धुर्य्यः। अभिमतान् वरान् ददातीति वरदः। वरं दक्षिणां वा ददाति यजमानाकारेणेति वा। 'गौः वै वरदः' इति श्रुतेः। वहतः सप्त आवहादीन् वाहयतीति वायुवाहनः। वसति वासयत्याच्छादयति स्वयं सर्व्वमिति वा वासुः। दीव्यति क्रीड़ते विजिगीषते व्यवहरति द्योतते स्तूयते कामयते गच्छतीति वा देवः वासुश्चासौ देवश्चेति वासुदेवः।

छादयामि जगद्विश्वं भूत्वा सूर्य्य इवांशुभिः। सर्व्वभूताधिवासश्च वासुदेवस्ततः स्मृतः॥
वसनात् सर्व्वभूतानां वसुत्वाद्देवयोनितः। वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः॥

इति उद्योगपर्व्वणि।

सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः। ततः स वासुदेवेति विद्वद्भिः परिपठ्यते॥
सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि। भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः॥

इति विष्णुपुराणे।

बृहन्तो भानवो यस्य चन्द्रसूर्य्यातिगामिनः। विश्वं जगद्भासयन्ति स बृहद्भानुरुच्यते॥

आदिः कारणं स चासौ देवश्चेति आदिदेवः। द्योतनादिगुणवान् देवः। सुरशत्रूणां पुरदारणात् पुरन्दरः। 'वाचंयमपुरन्दरौ च' इति पाणिनि वचनात् ॥४९॥

शोकादिषडूर्म्मिवर्ज्जितोऽशोकः। संसारसागरात्तारयतीति तारणः। गर्भजन्मजरामृत्युलक्षणात् भयात् तारयतीति तारः। विक्रमवत्त्वया शूरः। शूरस्याऽपत्यं वसुदेवस्य सुतः शौरिः।

Downloaded from https://www.holybooks.com

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुड़ध्वजः ॥३४७-३५५॥५१॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्व्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥३५६-३६४॥५२॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।

जनानां जन्तूनामीश्वरो जनेश्वरः । आत्मत्वेन हि सर्व्वेषाम् अनुकूलः । न हि स्वस्मिन् प्रातिकूल्यं स्वयमाचरति । धर्म्मत्राणाय शतमावर्त्तनानि प्रादुर्भावा अस्येति शतावर्त्तः । नाड़ीशते प्राणरूपेण वर्त्तत इति वा शतावर्त्तः । पद्मं हस्ते विद्यतेऽस्येति पद्मी । पद्मनिभे ईक्षणे दृश्यावस्येति पद्मनिभेक्षणः ॥५०॥

पद्मस्य नाभौ कार्णिकायां स्थितः पद्मनाभः । अरविन्दोपमाक्षित्वादरविन्दाक्षः । पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः । योऽयं पञ्चप्राणरूपेण अन्नरूपेण वा शरीरिणां शरीराणि धारयतीति शरीरभृत् । स्वमायया शरीराणि बिभर्त्तीति वा शरीरभृत् । महती ऋद्धिः विभूतिरस्येति महर्द्धिः । प्रपञ्चरूपेण वर्द्धमानत्वात् ऋद्धः । वृद्धः पुरातन आत्मा यस्येति वृद्धात्मा । महती अक्षिणी महान्त्यक्षीण्यस्येति वा महाक्षः । गरुड़ाङ्को ध्वजोऽस्येति गरुड़ध्वजः ॥५१॥

तुला उपमा न विद्यतेऽस्येत्यतुलः । 'न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः' इति श्रुतेः । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति गीतासु । शराः शरीराणि शीर्य्यमाणतया तेषु प्रत्यगात्मतया भातीति शरभः । पाषण्डानां भयहेतुत्वाद्भीमः । 'भीमादयोऽपादाने' इति पाणिनिस्मृतेः । सन्मार्गवर्त्तिनाम् अभीमः इति वा । सृष्टिस्थितिसंहारकालवित् षट्समयान् जानातीति वा समयज्ञः । यजनं सर्व्वभूतेषु सममस्येति वा । 'समत्वमाराधनमच्युतस्य' इति प्रह्लादवचनात् । हविर्भागं यज्ञेषु हरतीति हविर्हरिः । 'अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च' इति श्रीभगवद्वचनात् । अथवा ह्रयते हविः मांसं हविषाऽसाविति वा हरिः । 'अवघ्नन् पुरुषं पशुम्' इति हविष्टं श्रूयते । स्मृतिमात्रेण पुंसां पापं संसारं वा हरतीति वा । हरितवर्णत्वाद्वा हरिः ।

हराम्यघं हि स्मर्त्तृणां हविर्भागं क्रतुष्वहम् । वर्णश्च मे हरिर्वेति तस्माद्धरिरहं स्मृतः ॥

इति भगवद्वचनात् । सर्व्वैर्लक्षणैः प्रमाणैः लक्षणं ज्ञानं दर्शनं वा जायते यत्तद्धिनिर्द्दिष्टं सर्व्वलक्षणलक्षणम् । तत्र साधुः सर्व्वलक्षणलक्षण्यः । तस्यैव परमार्थत्वात् । लक्ष्मीरस्य वक्षसि नित्यं वसतीति लक्ष्मीवान् । समितिं युद्धं जयतीति समितिञ्जयः ॥५२॥

विगतः क्षरो विनाशोऽस्येति विक्षरः । स्वच्छन्दतया रोहितां मूर्त्तिं मत्स्यमूर्त्तिं वा वहन्

Downloaded from https://www.holybooks.com

**महीधरो महाभागो वेगवानमिताशनः ॥३६५-३७४॥५३॥**

**उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।**

**करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ॥३७५-३८५॥५४॥**

**व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।**

**परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥३८६-३९५॥५५॥**

रोहितः। मुमुक्षवस्तं देवं मार्गयन्ति इति मार्गः। परमानन्दो येन प्राप्यत इति वा मार्गः। उपादानं निमित्तञ्च कारणं स एवेति हेतुः। दमादिसाधनेन उदारा उत्कृष्टा मतिर्या तया गम्यत इति दामोदरः। 'दमाद्दामोदरं विदुः' इति भगवद्वचनात्। यशोदया दाम्नोदरे बद्ध इति वा दामोदरः।

तयोर्मध्यगतं बद्धं दाम्ना गाढ़ं तयोदरे। ततश्च दामोदरतां स ययौ दामबन्धनात्॥ इति।
दामानि लोकनामानि तानि यस्योदरान्तरे। तेन दामोदरो देवः श्रीधरस्तु समाश्रितः॥

इति व्यासवचनाद्वा। सर्व्वानभिभवति क्षमत इति वा सहः। महीं गिरिरूपेण धरति इति महीधरः। 'वनानि विष्णुर्गिरयो दिशश्च' इति श्रीविष्णुपुराणे। स्वेच्छया धारयन् देहं महान्ति उत्कृष्टानि भोजनानि भुङ्क्ते इति महाभोगः। महान् भागः भाग्यमस्यावतारेष्विति वा महाभागः। वेगो जवः तद्वान् वेगवान्। 'अनेजदेकं मनसो जवीयः' इति श्रुतेः। संहार-समये विश्वमश्नातीत्यमिताशनः॥५३॥

प्रपञ्चोत्पत्त्युपादानत्वादुद्भवः। उद्भूतो भवात् संसारादिति वा उद्भवः। सर्गकाले प्रकृतिं पुरुषञ्च प्रविश्य क्षोभयामासेति क्षोभणः।

प्रकृतिं पुरुषञ्चैव प्रविश्यात्मेच्छया हरिः। क्षोभयामास भगवान् सर्गकाले व्ययाव्ययौ॥

इति विष्णुपुराणे। यतो दीव्यति क्रीड़ति सर्गादिभिः विजिगीषते असुरान् व्यवहरति सर्व्वभूतेषु आत्मतया द्योतते स्तूयते स्तुत्यैः सर्व्वत्र गच्छति तस्मात् देवः। 'एको देवः' इति मन्त्रवर्णात्। श्रीः विभूतिः जगद्रूपा यस्योदरे स श्रीगर्भः। परमश्चासावीश्वरश्चेति परमेश्वरः। 'समं सर्व्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्' इति भगवद्वचनात्। जगदुत्पत्तौ साधकतमं करणम्। उपादानं निमित्तञ्च कारणम्। कर्त्ता स्वतन्त्रः। विचित्रं भुवनं करोतीति विकर्त्ता स एव भगवान् विष्णुः। स्वरूपं सामर्थ्यं चेष्टितं यस्य ज्ञातुं न शक्यते इति गहनः। गूहते संवृणोति स्वरूपादीनि निजमायया इति गुहः॥५४॥

सच्चिन्मयस्वरूपत्वाद्व्यवसायः। यस्मिन्नवस्थितः सर्व्वः स व्यवस्थानः। लोकपालाद्य-धिकारजरायुजाण्डजस्वेदजोद्भिज्ज-ब्राह्मणक्षत्रियवैश्यशूद्रावान्तरवर्णब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थ-

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



रामो विरामो विरतो मार्गो नेयो नयोऽनयः।
वीरः शक्तिमतां श्रेष्ठो धर्म्मो धर्म्मविदुत्तमः ॥३९६-४०४॥५६॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४०५-४१५॥५७॥

सद्यासलक्षणासमतद्धर्म्मादिकान् विभज्य करोतीति वा व्यवस्थानः। 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणात् कर्त्तरि ल्युट्प्रत्ययः। अत्र भूतानां संस्थितिः प्रलयात्मिका समीचीनं स्थानमस्येति वा संस्थानः। ध्रुवादीनां कर्म्मानुरूपेण स्थानानि ददातीति स्थानदः। अविनाशित्वात् ध्रुवः। परा ऋद्धिः विभूतिरस्येति परर्द्धिः। परा मा शोभा अस्येति परमः। सर्व्वोत्कृष्टा वा अनन्याधीनसिद्धित्वात् सच्चिदात्मतया स्पष्टः परमस्पष्टः। परमानन्दैकरूपत्वात् तुष्टः। सर्व्वदा सर्व्वसंपूर्णत्वात् पुष्टः। ईक्षणं दर्शनं यस्य शुभं शुभकरं मुमुक्षूणां मोक्षदं भोगार्थिणां भोगदं सर्व्वसन्देहविच्छेदकारणं पापिनाम् पावनं हृदयग्रन्थेः विच्छेदकरं सर्व्वकर्म्मणां क्षपणम् नराणां रक्षणकरणम् अविद्यानिवर्त्तकं स शुभेक्षणः। 'भिद्यते हृदयग्रन्थिः' इत्यादि श्रुतेः ॥५५॥

नित्यानन्दलक्षणे अस्मिन् योगिनो रमन्त इति रामः।

रमन्ते योगिनोऽनन्ते स(नि)त्यानन्दे चिदात्मनि। इति रामपदेनैतत् परंब्रह्माऽभिधीयते ॥ इति ॥

स्वेच्छया रमणीयं वपुः वहन् वा दाशरथी रामः। विरामोऽवसानं प्राणिनां यस्मिन् स विरामः। विगतं रतमस्य विषयसेवायामिति विरतः। यं विदित्वाऽमृतत्वाय कल्पन्ते योगिनो मुमुक्षवः स एव पन्था मार्गः। 'नान्यः पन्था विद्यते अयनाय' इति श्रुतेः। मार्गेण सम्यग्ज्ञानेन जीवं परमात्मतया नीयत इति नेयः। नयतीति नयो नेता। मार्गो नेयो नय इति त्रिरूपः परिकल्प्यते। नास्य नेता विद्यत इत्यनयः। विक्रमशालित्वाद्वीरः। शक्तिमतां विरिञ्च्यादीनामपि शक्तिमत्त्वात् शक्तिमतां श्रेष्ठः। सर्व्वभूतानां धारणाद्धर्म्मः। 'अणुरेष धर्म्मः' इति श्रुतेः। धर्म्मेणाराध्यत इति वा धर्म्मः। श्रुतयः स्मृतयश्च यस्याज्ञाभूताः स एव धर्म्मविदुत्तमः ॥ ५६ ॥

विविधा कुण्ठा गतिः प्रतिहतिः विकुण्ठा विकुण्ठायाः कर्त्तेति वैकुण्ठः। जगदारम्भे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रतिबध्नाति।

मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना। वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम ॥

इति शान्तिपर्व्वणि। सर्व्वस्मात् पुरा सदनात् सर्व्वपापस्य सादनात् वा पुरुषः। 'स यत् पूर्व्वस्मात् सर्व्वान् पाप्मन औषत् तस्मात् पुरुषः' इति श्रुतेः। पुरि शयनाद्वा पुरुषः। 'स वा अयं पुरुषः सर्व्वासु पुर्षु पुरि शयः' इति श्रुतेः। प्राणिति चेत्रज्ञरूपेण प्राणात्मना चेष्ट-

**ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।**
**उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥४१६-४२५॥५८॥**
**विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।**
**अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥४२६-४३४॥५९॥**

यन् वा प्राणः । 'चेष्टां करोति श्वसनस्वरूपी' इति विष्णुपुराणे । खण्डयति प्राणिनां प्राणान् प्रलयादिष्विति प्राणदः । प्रणौति इति प्रणवः । 'तस्मादोमिति प्रणौति' इत्यादि श्रुतेः । प्रणम्यते इति वा प्रणवः । 'प्रणमन्तीह यं वेदास्तस्मात् प्रणव उच्यते' इति सनत्कुमारवचनात् । प्रपञ्चरूपेण विस्तृतत्वात् पृथुः । हिरण्यगर्भसंभूतिकारणं हिरण्मयमण्डं यद्वीर्य्यसंभूतं तदस्य गर्भं इति हिरण्यगर्भः । त्रिदशशत्रून् हन्तीति शत्रुघ्नः । कारणत्वेन सर्व्वकार्य्याणां व्यापनाद्व्याप्तः । वाति गन्धं करोतीति वायुः । 'पुण्यो गन्धः पृथिव्याञ्च' इति भगवद्वचनात् ।

अधो न क्षीयते जातु (जायते जन्तुः) यस्मात्तस्मादधोक्षजः । इत्युद्योगपर्व्वणि ।

* द्यौरक्षम् पृथिवी चाधस्तयोरस्मादजायत । मध्ये वैराजरूपेण इति वाधोक्षजः स्मृतः ॥

अधोभूते ह्यक्षगणे प्रत्यग्रूप प्रवाहिते । जायते तस्य वै ज्ञानं तेन अधोक्षज उच्यते ॥ इति ॥५७॥

कालात्मना ऋतुशब्देन लक्ष्यत इति ऋतुः । शोभनं निर्व्वाणफलं दर्शनं ज्ञानमस्येति शुभे दर्शने ईक्षणे पद्मपत्रायते स्वेच्छया देहवतः इति सुखेन दृश्यते भक्तैरिति वा सुदर्शनः । कलयति सर्व्वमिति कालः । 'कालः कलयतामहम्' इति भगवद्वचनात् । परमे उत्कृष्टे स्वमहिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी । 'परमेष्ठी विभ्राजते' इति मन्त्रवर्णात् । शरणार्थिभिः परितो गृह्यते सर्व्वगतत्वात् परितो ज्ञायत इति वा । पुष्पादिकं भक्तैरर्पितं परिगृह्णाति इति वा परिग्रहः । उग्रः सूर्य्यादीनामपि भयहेतुत्वात् । 'भीषास्माद्वातः पवते भीषोदेति सूर्य्यः' इति श्रुतेः । संवसन्ति भूतान्यस्मिन्निति संवत्सरः । जगद्रूपेण प्रवर्त्तमानत्वात् सर्व्वकर्म्माणि क्षिप्रं करोतीति वा दक्षः । संसारसागरे क्षुत्पिपासादिभिः षड्भिरूर्म्मिभिस्तरङ्गिते अविद्याद्यैः महाक्लेशैर्मदादिभिरुपक्लेशैश्च वशीकृतानां विश्रान्तिकाङ्क्षिणां विश्रामं मोक्षं करोतीति विश्रामः । विश्वस्माद्दक्षिणः शक्तः । विश्वेषु कर्म्मसु दाक्षिण्याद्वा विश्वदक्षिणः ॥५८॥

विस्तीर्य्यन्ते समस्तानि जगन्त्यस्मिन्निति विस्तारः । स्थितिशीलत्वात् स्थावरः स्थितिशीलानि पृथिव्यादीनि तस्मिन् तिष्ठन्तीति स्थाणुः स्थावरश्चासौ स्थाणुश्चेति स्थावरस्थाणुः । संविदात्मना प्रमाणम् प्रत्यक्षादिप्रमाणं वा । अन्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययम् । सविशेषणमेकं नाम । सुखरूपत्वात् सर्व्वैरर्थ्यत इति अर्थः । न विद्यते प्रयोजनमाप्तकामत्वात्

* 'द्यौरन्तरीक्षं पृथिवी च तयोर्यस्मादजायत' इति वा पाठः ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**अनिर्व्विण्णः स्थविष्ठोऽभूर्धर्म्मयूपो महामखः ।**
**नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥४३५-४४४॥६०॥**
**यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।**
**सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम् ॥४४५-४५४॥६१॥**

अस्येति अनर्थः । महान्तः कोशा अन्नमयादयः आच्छादका अस्येति महाकोशः । महान् भोगः सुखरूपमस्येति महाभोगः । महद्भोगसाधनलक्षणं धनम् अस्येति महाधनः ॥ ५८ ॥

अवाप्तसर्व्वकाम(त)त्वात् निर्व्वेदोऽस्य न विद्यते इति अनिर्व्विण्णः । वैराजरूपेण स्थितः स्थविष्ठः । 'अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ' इति श्रुतेः । अजन्मा अभूः अथवा 'भूः सत्तायाम्' इत्यस्य सम्पदादित्वात् क्विप् । मही वा । यूपे पशुवत् तत्समाधारणात्मका धर्म्मास्तत्र वध्यन्त इति धर्म्मयूपः । यस्मिन्नर्पिता मखा यज्ञा ज्ञाननिर्व्वाणलक्षणं फलं प्रयच्छन्तो महान्तो जायन्ते स महामखः ।

नक्षत्रैस्तारकैः सार्द्धं चन्द्रसूर्य्यादयो ग्रहाः । वायुपाशमयैर्बन्धैर्न्निबद्धा ध्रुवसंज्ञिते ॥

स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे व्यवस्थितो ध्रुवः । तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तकः स्थितो विष्णुरिति नक्षत्रनेमिः । शिशुमारवर्णने 'विष्णुः हृदयम्' इति श्रूयते स्वाध्यायब्राह्मणे । चन्द्ररूपेण नक्षत्री । 'नक्षत्राणामहं शशी' इति भगवद्वचनात् । सर्व्वकार्य्येषु समर्थः क्षमः क्षमत इति वा क्षमः । 'क्षमया पृथिवी समः' इति वाल्मिकिवचनात् । सर्व्वविकारेषु क्षयितेषु स्वात्मनावस्थितः क्षामः । 'क्षायो मः' इति निष्ठायां मकारादेशः । सृष्ट्याद्यर्थं सम्यगीहत इति समीहनः ॥६०॥

सर्व्वयज्ञस्वरूपत्वात् यज्ञः । सर्व्वेषां देवानां तुष्टिकारको यज्ञाकारेण प्रवर्त्तत इति वा । 'यज्ञो वै विष्णुः' इति श्रुतेः । यष्टव्योऽप्ययमेवेति इज्यः ।

ये यजन्ति मखैः पुण्यैर्द्देवतानि पितॄनपि । आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते ॥

इति श्रीहरिवंशे । सर्व्वासु देवतासु यष्टव्यासु प्रकर्षेणाऽयमेव यष्टव्यो मोक्षफलदातृत्वादिति महेज्यः । यूपसहितो यज्ञः अयूपः क्रतुः ॥ *असनोपचायिचोदनालक्षणं सत्रम् । सतस्त्रायत इति वा । सतां मुमुक्षूणां सामान्या गतिरिति सतां गतिः । सर्व्वेषां प्राणिनां कृताकृतं सर्व्वं पश्यति स्वाभाविकेन बोधेनेति सर्व्वदर्शी । स्वभावेन विमुक्त आत्मा यस्य इति विमुक्तश्चावात्मा चेति वा विमुक्तात्मा । 'विमुक्तश्च विमुच्यते' इति श्रुतेः । सर्व्वश्चासौ ज्ञश्चेति सर्व्वज्ञः । 'इदं सर्व्वं यदयमात्मा' इति श्रुतेः । ज्ञानमुत्तममिति सविशेषणमेकं नाम । ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्व्वस्य साधकमिति ज्ञानमुत्तमं ब्रह्म । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः ॥६१॥

---

* चासत्युपेति ।

Downloaded from https://www.holybooks.com



**सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।**
**मनोहरोजितक्रोधो वीरवाहुर्विदारणः ॥४५५-४६४॥६२॥**
**स्वापनः स्ववशो व्यापी नैकात्मा नैककर्म्मकृत् ।**
**वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥४६५-४७४॥६३॥**
**धर्म्मगुप् धर्म्मकृद्धर्म्मी सदसत्चरमक्षरम् ।**

शोभनं व्रतमस्येति सुव्रतः ।

सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्व्वथा तस्मै ददाम्येतद्व्रतं मम ॥

इति श्रीरामायणे रामवचनम् । शोभनं मुखमस्येति सुमुखः । 'प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम्' इति श्रीविष्णुपुराणे । वनवासेऽपि सुमुखत्वात् दाशरथी रामः सुमुखः ।

स्वपितुर्व्वचनं श्रीमानभिषेकात् परं प्रियम् । मनसा पूर्व्वमासाद्य वाचा प्रतिगृहीतवान् ॥
इमानि तु महारण्ये विहृत्य नव पञ्च च । वर्षाणि परमप्रीतः स्थास्यामि वचने तव ॥
वनन्तु गन्तुकामस्य त्यजतश्च वसुन्धराम् । सर्व्वलोकातिगस्येव मनस्तस्य न विव्यथे ॥

इति श्रीरामायणे महाभारते च । सर्व्वविद्योपदेशेन वा सुमुखः । 'यो ब्रह्माणं विदधाति पूर्व्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः । शब्दादिस्थूलकारणरहितत्वात् शब्दादयो ह्याकाशादीनाम् उत्तरोत्तरस्थूलकारणानि तदभावात् सुसूक्ष्मः । 'सर्व्वगतं सूक्ष्मम्' इति श्रुतेः । शोभनो घोषो वेदात्मकोऽस्य मेघगम्भीरनिर्घोषत्वाद्वा सुघोषः । सद्वृत्तानां सुखं ददाति असद्वृत्तानां सुखं द्यति खण्डयतीति सुखदः । प्रत्युपकारनिरपेक्षतयोपकारित्वात् सुहृत् । निरतिशयानन्दरूपत्वात् मनो हरतीति मनोहरः । 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुतेः । जितः क्रोधो येन स जितक्रोधः वेदमर्य्यादां स्थापनार्थं सुरारीन् हन्ति न तु क्रोधवशादिति । विदशशत्रून् निघ्नन् वेदमर्य्यादां स्थापयन् विक्रमशाली वाहुरस्येति वीरवाहुः । अधार्म्मिकान् विदारयतीति विदारणः ॥६२॥

प्राणिनः स्वापयन् आत्मसंबोधविमुखान् मायया कुर्व्वन् स्वापनः । स्वतन्त्रः स्ववशः । जगदुत्पत्तिस्थितिलयहेतुत्वात् । आकाशवत् सर्व्वगतत्वात् व्यापी । 'आकाशवत् सर्व्वगतश्च नित्यः' इति श्रुतेः । कारणत्वेन सर्व्वकार्य्याणां व्यापनाद्वा व्यापी । जगदुत्पत्त्यादिषु आविर्भूत निमित्त शक्तिभिः विभूतिभिरनेकधा तिष्ठन् नैकात्मा । जगदुत्पत्तिसम्पत्तिविपत्तिप्रभृतिकर्म्माणि करोतीति नैककर्म्मकृत् । वसत्यत्राखिलमिति वत्सरः । भक्तस्नेहित्वाद्वत्सलः । 'वत्सांसाभ्यां कामवले' इति लप्रत्ययविधानात् । वत्सानां पालकत्वाद्वत्सी । जगत्पितुस्तस्य वत्सभूता प्रजा इति वा वत्सी । रत्नानि गर्भभूतान्यस्येति समुद्रो रत्नगर्भः । धनानामीश्वरो धनेश्वरः ॥६३॥

धर्म्मान् गोपयतीति धर्म्मगुप् । 'धर्म्मसंस्थापनार्थाय संभवामि युगे युगे' इति भगवद्वचनात् ।

Downloaded from https://www.holybooks.com



**अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥४७५-४८५॥६४॥**
**गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।**
**आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥४८६-४९३॥६५॥**
**उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।**
**शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥४९४-५०२॥६६॥**

धर्म्माधर्म्मविहीनोऽपि धर्म्ममर्य्यादां स्थापयन् धर्म्ममेव करोतीति धर्म्मकृत्। धर्म्मान् धारयति इति धर्म्मी। धर्म्माधारतया इति वा। अवितथं परं ब्रह्म सत्। 'सदेव सोम्येदमग्र आसीत्' इति श्रुतेः। अपरं ब्रह्म असत्। 'वाचारम्भणं विकारो नामधेयम्' इति श्रुतेः। क्षरम् सर्व्वाणि भूतानि। कूटस्थः अक्षरम्।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

इति भगवद्वचनात्। आत्मनि कर्त्तृत्वादिविकल्पविज्ञानं कल्पितमिति तद्वासनयाऽवगुण्ठितो जीवो विज्ञाता। तद्विलक्षणो विष्णुः अविज्ञाता। स विज्ञात्मेति पाठे कर्त्तृत्वं विज्ञाने कल्पितमिति विज्ञात्मा। आदित्यादिगता अंशवोऽस्येत्ययमेव मुख्यः सहस्रांशुः। 'येन सूर्य्यस्तपति तेजसेद्धः' इति श्रुतेः। 'यदादित्यगतं तेजः' इति स्मृतेश्च। विशेषेण * शेषदिग्गजरूपेण समस्तभूतानि दधातीति विधाता। नित्यनिष्पन्नचैतन्यलक्षणत्वात् कृतलक्षणः। कृतानि लक्षणानि शास्त्राण्यनेनेति वा कृतलक्षणः। 'वेदाः शास्त्राणि विज्ञानमेतत् सर्व्वं जनार्द्दनात्' इत्यत्रैव। सजातीयविजातीयव्यवच्छेदलक्षणं सर्व्वभावानां कृतमनेनेति वा। आत्मनः श्रीवत्सलक्षणं वक्षसि येन कृतमिति वा कृतलक्षणः ॥ ६४ ॥

गभस्तिचक्रस्य मध्ये सूर्य्यात्मना स्थितो गभस्तिनेमिः। सत्त्वं गुणं प्रकाशकं प्राधान्येनाधितिष्ठति सर्व्वप्राणिषु तिष्ठतीति वा सत्त्वस्थः। विक्रमशालित्वात् सिंहवत् सिंहः। नृशब्दलोपेन 'सत्यभामा भामा' इतिवद्वा नृसिंहः सिंहः। भूतानां महानीश्वरः भूतेन सत्त्वेन स एव परमो महानीश्वर इति वा भूतमहेश्वरः। सर्व्वभूतान्यादीयन्ते अनेन इति आदिः। आदिश्चासौ देवश्चेत्यादिदेवः। सर्व्वान् भावान् परित्यज्य आत्मज्ञानयोगैश्वर्य्ये महति महीयते तस्मादुच्यते महादेव इति। प्राधान्येन देवानामीशो देवेशः। देवान् विभर्त्तीति देवभृत् शक्रस्तस्यापि शासितेति देवभृद्गुरुः। देवानां भरणात् सर्व्वविद्यानाञ्च निगरणाद्वा ॥ ६५ ॥

जन्मसंसारबन्धनादुत्तरतीत्युत्तरः। सर्व्वोत्कृष्ट इति वा उत्तरः। 'विश्वस्मादिन्द्र उत्तरः,' इति श्रुतेः। गवां पालनाद्गोपवेशधरो गोपतिः। गोर्म्मही तस्याः पतिर्वा गोपतिः। समस्त-

* 'शेषदिग्गजभूधरान् सर्व्वभूतानां धातृन्' इत्यपि पाठः।

सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः ।
नयो जयः सत्यसन्धो दाशार्हः सात्त्वतां पतिः ॥५०३-५१२॥६७॥
जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥५१३-५२१॥६८॥

भूतानि पालयन् रक्षको जगतः इति गोप्ता । न कर्म्मणा न ज्ञानकर्म्मभ्यां वा गम्यते ज्ञानेनैव गम्यत इति ज्ञानगम्यः । कालेनापरिच्छिन्नत्वात् पुरापि भवतीति पुरातनः । शरीरारम्भकभूतानां भरणात् प्राणरूपधरः शरीरभूतभृत् । पालको भोक्ता । परमानन्दसन्दोहसम्भोगाद्वा । कपिर्वराहः कपिश्चासौ इन्द्रश्चेति वाराहं वपुरास्थितः कपीन्द्रः । कपीनां वानराणां वा इन्द्रः राघवः कपीन्द्रः । भूरयो यज्ञदक्षिणाः धर्म्ममर्य्यादां दर्शयतो यज्ञं कुर्व्वतोऽस्य विद्यन्त इति भूरिदक्षिणः ॥ ६६ ॥

सोमं पिवति सर्व्वयज्ञेषु यष्टव्यदेवतारूपेण इति सोमपः । धर्म्ममर्य्यादां दर्शयन् यजमानरूपेणेति वा सोमपः । स्वात्मामृतरसं पिवन्नमृतपः । मथितम् अमृतमसुरैः ह्रियमाणं रक्षित्वा देवान् पाययित्वा स्वयमप्यपिवदिति वा अमृतपः । सोमरूपेणौषधीः पोषयन् सोमः । उमया सह वर्त्तत इतीश्वरो वा सोमः । पुरून् बहून् जयतीति पुरुजित् । विश्वरूपत्वात् पुरुः । उत्कृष्टत्वाच्च सत्तमः पुरुश्चासौ सत्तमश्चेति पुरुसत्तमः । नयं दण्डं दुष्टानां करोतीति नयः । सर्व्वाणि भूतानि जयतीति जयः । सत्या सन्धा सङ्कल्पोऽस्येति सत्यसन्धः । 'सत्यसङ्कल्पः' इति श्रुतेः । दाशो दानं तमर्हतीति दाशार्हः । 'दाशदान' इति धातुपाठः । दशार्हकुलोद्भवाद्वा । सात्त्वतं नाम तन्त्रं 'तत् करोति तदाचष्टे' इति णिचि कृते क्विप्प्रत्यये णिच्लोपे च कृते पदं सात्त्वत् तेषां पतिर्योगक्षेमकर इति सात्त्वतां पतिः ॥६७॥

प्राणान् क्षेत्रज्ञरूपेण धारयतीति जीवः । विनयित्वं विनयिता तां च साक्षात् पश्यति प्रजानामिति विनयितासाक्षी । अथवा नयतेर्गतिवाचिनो रूपं विनयिता । असाक्षी असाक्षात् द्रष्टा आत्मातिरिक्तं वस्तु न पश्यतीति असाक्षी । मुकुं मुक्तिं ददातीति मुकुन्दः । पृषोदरादित्वात् साधुत्वम् । अक्षरसाम्यात् निरुक्तिवचनात् नैरुक्तानां मुकुन्द इति निरुक्तिः । अमिता अपरिच्छिन्ना विक्रमास्त्रयः पादविक्षेपा अस्य अमितविक्रमः । अमितं विक्रमणं शौर्य्यमस्येति वा अमितविक्रमः । देवादयः अम्भांस्यस्मिन्निधीयन्त इति अम्भोनिधिः । 'तानि वा एतानि चत्वार्य्यम्भांसि देवा मनुष्याः पितरोऽसुराः' इति श्रुतेः । सागरो वा । 'सरसामस्मि सागरः' इति भगवद्वचनात् । देशतः कालतो वस्तुतश्चापरिच्छिन्नस्वरूपत्वात् अनन्तात्मा । संहृत्य सर्व्वभूतान्येकार्णवं जगत्कृत्वाऽधिशेते महोदधिमिति महोदधिशयः । अन्तं करोति

Downloaded from https://www.holybooks.com

**अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।**

**आनन्दो नन्दनो नन्दः सत्यधर्म्मा त्रिविक्रमः ॥५२२-५३०॥६९॥**

**महर्षिः कपिलाचार्य्यः कृतज्ञो मेदिनीपतिः ।**

**त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥५३१-५३८॥७०॥**

**महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।**

भूतानामित्यन्तकः । अन्तोपपदात् करोतेर्डप्रत्ययेन रूपम् । 'तत् करोति तदाचष्टे' इति णिचि कृते ण्वुलि अकारादेशः ॥ ६८ ॥

विष्णोर्जन्मरहितत्वादजः । आत् विष्णोः अजायत इति कामः अजः । महः पूजा तदर्हत्वान्महार्हः । स्वभावेनैवाभाव्यो नित्यनिष्पन्नरूपत्वात् स्वाभाव्यः । जिता अमित्रा अन्तर्वर्त्तिनो रागद्वेषादयो बाह्या रावणकुम्भकर्णशिशुपालादयः येनासौ जितामित्रः । स्वात्मामृतरसास्वादनान्नित्यं प्रमोदते ध्यायिनां ध्यानमात्रेण प्रमोदं कुर्व्वत इति वा प्रमोदनः । आनन्दः स्वरूपमस्येत्यानन्दः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । नन्दयतीति नन्दनः । सर्व्वाभिरुपपत्तिभिः समृद्धो नन्दः । सुखं वैषयिकं नास्य विद्यत इति अनन्दः । 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुतेः । सत्या धर्म्मज्ञानादयो ऽस्येति सत्यधर्म्मा । त्रयो विक्रमास्त्रिषु लोकेषु क्रान्ता यस्य सः त्रिविक्रमः । 'त्रीणि पदा विचक्रमे' इति श्रुतेः । त्रयो लोकाः क्रान्ता येनेति वा त्रिविक्रमः ।

त्रिरित्येवं त्रयो लोकाः कीर्त्तिता मुनिसत्तमैः ।

क्रमते तांस्त्रिधा सर्व्वांस्त्रिक्रमोऽसि जनार्द्दन ॥ इति श्रीहरिवंशे ॥ ६९ ॥

महर्षिः कपिलाचार्य्य इति सविशेषणमेकं नाम । महांश्चासावृषिश्चेति महर्षिः । कृत्स्नस्य वेदस्य दर्शनात् । अन्ये तु वेदैकदेशदर्शनात् ऋषयः । कपिलश्चासौ सांख्यस्य शुद्धात्मतत्त्वविज्ञानस्याचार्य्यश्चेति कपिलाचार्य्यः । 'शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते' इति व्यासस्मृतेः । 'ऋषिं प्रसूतं कपिलं महान्तम्' इति श्रुतेः । 'सिद्धानां कपिलो मुनिः' इति स्मृतेश्च । कृतं कार्य्यं जगत् । ज्ञ आत्मा । कृतञ्च तत् ज्ञश्चेति कृतज्ञः । मेदिन्या भूम्याः पतिर्मेदिनीपतिः । त्रीणि पदान्यस्येति त्रिपदः । 'त्रीणि पदा विचक्रमे' इति मन्त्रवर्णात् । गुणावेशेन सञ्जाता-स्तिस्रो दशा अवस्था जाग्रदादयः तासामध्यक्ष इति त्रिदशाध्यक्षः । मत्स्यरूपी महति शृङ्गे प्रलयाम्भोधौ नावं बद्ध्वा चिक्रीड़ इति महाशृङ्गः । कृतस्यान्तं संहारं करोतीति कृतान्तकृत् । कृतान्तं मृत्युं कृन्ततीति वा कृतान्तकृत् ॥ ७० ॥

महांश्चासौ वराहश्चेति महावराहः । महावरान् हिरण्याक्षादीन् हतवानिति वा ।

Downloaded from https://www.holybooks.com

गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥५३९-५४७॥७१॥
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥५४८-५५८॥७२॥
भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥५५९-५६७॥७३॥

गोभिर्वाणीभिर्विन्दति वेत्ति वेदान्तवाक्यैरिति वा गोविन्दः । 'गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः' इति श्रीविष्णुतिलके । शोभना सेना गणात्मिका यस्य स सुषेणः । कणकनिर्म्मितमङ्गदं कणकाङ्गदं तान्यस्य विद्यन्त इति कणकाङ्गदी । रहस्योपनिषद्वेद्यत्वात् गुहायां हृदयाकाशे निहित इति वा गुह्यः । ज्ञानैश्वर्य्यवलवीर्य्यादिभिर्गम्भीरो गभीरः । दुष्प्रवेश्यत्वात् गहनः । अवस्थात्रयभावाभावसाक्षित्वाद्वा गहनः । वाङ्मनसयोरगोचरत्वाद् गुप्तः । 'एष सर्व्वेषु भूतेषु गूढ़ आत्मा न प्रकाशते' इति श्रुतेः । 'मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदां' जगद्रक्षार्थं धरतीति चक्रगदाधरः ॥ ७१ ॥

विदधाति सृजतीति विधाता वेधाः । पृषोदरादित्वात् साधुत्वम् । स्वयमेव कार्य्यस्य करणे अङ्गं सहकारी इति स्वाङ्गः । न केनाप्यवतारेषु जित इत्यजितः । कृष्णद्वैपायनः कृष्णः ।

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥

इति विष्णुपुराणवचनात् । स्वरूपसामर्थ्यादेः प्रच्युत्यभावात् दृढः । संहारसमये युगपत् प्रजाः सङ्कर्षतीति सङ्कर्षणः । न च्योतति स्वरूपात् इति अच्युतः । सङ्कर्षणोऽच्युत इति नामैकं सविशेषणम् । स्वरश्मिसंवरणात् सायंगत आदित्यो वरुणः । 'इमं मे वरुण श्रुधी हवम्" इति श्रुतेः । वरुणस्यापत्यं वशिष्ठोऽगस्त्यो वा वारुणः । वृक्ष इव अचलतया स्थित इति वृक्षः । 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इति श्रुतेः । व्याप्त्यर्थादक्षतेर्धातोः पुरस्करोपपदादणिप्रत्यये सति पुष्कराक्षः । हृदयपुण्डरीके चिन्तितः स्वरूपेण प्रकाशत इति वा पुष्कराक्षः । सृष्टिस्थित्यन्तकर्म्माणि मनसैव करोतीति महामनाः । 'मनसैव जगत्सृष्टिं संहारं च करोति यः' इति विष्णुपुराणे ॥ ७२ ॥

ऐश्वर्य्यस्य समग्रस्य धर्म्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा ॥
स यस्यास्ति स भगवान् ।
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥

इति विष्णुपुराणे । ऐश्वर्य्यादिकं संहारकाले हन्तीति भगहा । सुखस्वरूपत्वात् आनन्दी । सर्व्वाभिः सम्पद्भिः समृद्धत्वाद्वाऽऽनन्दी । भूततन्मात्ररूपां वैजयन्त्याख्यां वनमालां वहन्

Downloaded from https://www.holybooks.com

**सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।**

**दिवःस्पृक् सर्व्वदृग्व्यासो वाचस्पतिरयोनिजः ॥५६८-५७६॥७४॥**

**त्रिसामा सामगः साम निर्व्वाणं भेषजं भिषक् ।**

**सन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥५७७-४८४॥७५॥**

वनमाली । हलम् आयुधमस्येति हलायुधो बलभद्राकृतिः । अदित्यां कश्यपाज्जातो वामनरूपेणेति आदित्यः । ज्योतिषि सवितृमण्डले स्थितो ज्योतिरादित्यः । द्वन्द्वानि शीतोष्णादीनि सहते सहिष्णुः । गतिश्चासौ सत्तमश्चेति गतिसत्तमः ॥७३॥

शोभनमिन्द्रियादिमयं शार्ङ्गं धनुरस्येति सुधन्वा । शत्रूणां खण्डनात् खण्डः परशुरस्य जामदग्न्याकृतेरिति खण्डपरशुः । अखण्डः परशुरस्येति वा । सन्मार्गविरोधिनां दारुणत्वात् दारुणः । द्रविणं वाञ्छितं भक्तेभ्यः प्रददातीति द्रविणप्रदः । दिवःस्पर्शनात् दिवःस्पृक् । सर्व्वदृशां सर्व्वज्ञानानां विस्तारकृद्व्यासः सर्व्वदृग्व्यासः । अथवा सर्व्वा च सा दृक् चेति सर्व्वदृक् सर्व्वाकारं ज्ञानम् । सर्व्वस्य दृष्टित्वाद्वा सर्व्वेषां दर्शीति वा सर्व्वदृक् । ऋग्वेदादिविभागेन चतुर्द्धा वेदाः व्यस्ता कृताः । आद्यो वेद एकविंशतिधा कृतः । द्वितीय एकोत्तरशतधा कृतः । तृतीयः सहस्रधा । अथर्व्ववेदो नवधा शाखाभेदेनैव कृतः । एवमन्यानि च पुराणानि व्यस्तान्यनेनेति व्यासः । अन्यानि ज्ञानानि व्यस्तानीति वा व्यासो ब्रह्मा । वाचो विद्यायाः पतिः वाचस्पतिः । योन्यां जनन्यां न जायत इत्ययोनिजः । वाचस्पतिरयोनिज इति सविशेषणमेकं नाम ॥७४॥

देवव्रतसमाख्यातैः त्रिभिः सामभिः सामगैः स्तुत इति त्रिसामा । साम गायतीति सामगः । 'वेदानां सामवेदोऽस्मि' इति भगवद्वचनात् । सामवेदः साम । सर्व्वदुःखोपशमनलक्षणं परमानन्दरूपं निर्व्वाणम् । संसाररोगस्यौषधं भेषजम् । * संसाररोगनिर्म्मोचकाङ्क्षिणां परां विद्यामुपदिशति गीतास्विति भिषक् । 'भिषक्तमं त्वां भेषजाः शृणोमि' इति श्रुतेः । मोक्षार्थं चतुर्थमाश्रमं कृतवानिति सन्यासकृत् । सन्यासिनां प्राधान्येन ज्ञानसाधनं शममाचष्ट इति शमः ।

यतीनां प्रशमो धर्म्मो नियमो वनवासिनाम् । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् ॥

इति स्मृतेः । 'तत्करोति तदाचष्टे' इति णिचि कृते पचाद्यचि रूपं शम इति । सर्व्वभूतानां शमयितेति वा शमः । विषयसुखेष्वसङ्गतया शान्तः । 'निष्कलं निष्क्रियं शान्तम्' इति श्रुतेः । प्रलयकाले नितरां तत्रैव तिष्ठन्ति भूतानीति निष्ठा । समस्ताविद्यानिवृत्तिः शान्तिः । सा ब्रह्मैव परमुत्कृष्टमयनं स्थानं पुनरावृत्तिशङ्कारहितम् इति परायणम् । पुंलिङ्गपक्षे बहुव्रीहिः ॥७५॥

---

* संसाररोगनिर्म्मोचकारिणीमित्यपि ।

Downloaded from https://www.holybooks.com

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥५८६-५९५॥७६॥
अनिवर्त्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥५९६-६०४॥७७॥
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ॥६०५-६१४॥७८॥

सुन्दरां तनुं धारयन् शुभाङ्गः। अरागद्वेषादिभिः मुमुक्षूणां शान्तिलक्षणां शान्तिं ददातीति शान्तिदः। सर्गादौ सर्व्वभूतानि ससर्ज्जेति स्रष्टा। कौ भूम्यां मोदते कुमुदः। कोः क्षितेर्वलनात् संसरणात् कुवलं जलम् तस्मिन् शेते इति कुवलेशयः। 'शयवासवासिष्वकालात्' इति अलुक् सप्तम्याः। कौ भूम्यां बलते संस्रयते इति सर्पाणाम् उदरं कुवलम् तस्मिन् शेषोदरे शेते कुवलेशयः। कुवलं वदरीफलं तन्मध्ये शेते तक्षकः सोऽपि तस्य विभूतिरिति वा हरिः कुवलेशयः। गवां वृद्ध्यर्थं गोवर्द्धनं धृतवानिति गोभ्यो हितः गोहितः। गोः भूमेर्भारावतरणेच्छया शरीरग्रहणं कुर्व्वन् वा गोहितः। गोः भूम्यादेः पतिर्गोपतिः। रक्षको जगतः इति गोप्ता। आत्मानं स्वमायया संवृणोतीति वा। सकलान् कामान् वर्षुके अक्षिणी यस्य स वृषभाक्षः। वृषो धर्म्मो दृष्टिरस्येति वा। वृषो धर्म्मः प्रियो यस्य स वृषप्रियः। 'वा प्रियस्य' इति पूर्व्वनिपातस्य विकल्पविधानात् परनिपातः। वृषश्चासौ प्रियश्चेति वा ॥ ७६ ॥

देवासुरादिसंग्रामान्न निवर्त्तत इत्यनिवर्त्ती। वृषप्रियत्वात् धर्म्मान्न निवर्त्तत इति वा। स्वभावतो विषयेभ्यो निवृत्त आत्मा यस्येति निवृत्तात्मा। संहारकाले विस्तृतं जगत् सूक्ष्मरूपेण संक्षिपन् संक्षेप्ता। तापार्त्तस्य रक्षणं क्षेमं करोतीति क्षेमकृत्। स्वनामस्मृतिमात्रेण कल्याणकरत्वात् शिवः। श्रीवत्सलक्षणं चिह्नम् अस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः। अस्य वक्षसि श्रीरनपायिनी वसतीति श्रीवासः। अमृतमन्थने सर्व्वान् सुरासुरादीन् विहाय श्रीः एनं पतित्वेन वरयामासेति श्रीपतिः। श्रीः पराशक्तिस्तस्याः पतिरिति वा श्रीपतिः। 'परास्य शक्तिर्व्विविधैव श्रूयते स्वाभाविकी ज्ञानवलक्रिया च' इति श्रुतेः। विरिञ्चादीनां श्रीमतां ऋग्यजुःसामलक्षणा श्रीः सा येषां तेषां वा प्रधानभूत इति श्रीमतां वरः। 'ऋचः सामानि यजुंषि सा हि श्रीरमृता सताम्' इति श्रुतेः ।७७॥

श्रियं भक्तानां ददातीति श्रीदः। श्रिय ईशः श्रीशः। श्रीमत्सु नित्यं वशतीति श्रीनिवासः। श्रीशब्देन श्रीमन्तो लक्ष्यन्ते। सर्व्वशक्तिमये अस्मिन् अखिलाः श्रियो निधीयन्त इति श्रीनिधिः।

Downloaded from https://www.holybooks.com

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।
विजितात्माऽविधेयात्मा सत्कीर्त्तिश्छिन्नसंशयः ॥६१५-६२३॥७६॥
उदीर्णः सर्व्वतश्चक्षुरनीशः शाश्वतस्थिरः।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥६२४-६३२॥८०॥
अर्च्चिष्मानर्च्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥६३३-६४१॥८१॥

कर्म्मानुरूपेण विविधाः श्रियः सर्व्वभूतानां विभावयतीति श्रीविभावनः। सर्व्वभूतानां जननीमीश्वरीं श्रियं वक्षसि वहन् श्रीधरः। स्मरतां कीर्त्तयतां स्तुवतां अर्च्चयतां भक्तानां श्रियं करोतीति श्रीकरः। अनपायि अनवाप्तसुखावाप्तिलक्षणं श्रेयः तच्च परस्यैव रूपमिति श्रेयः। श्रियोऽस्य सन्तीति श्रीमान्। त्रयाणां लोकानामाश्रयत्वात् लोकत्रयाश्रयः ॥७८॥

शोभने पुण्डरीकाभे अक्षिणी यस्य स स्वक्षः। शोभनान्यङ्गान्यस्येति स्वङ्गः। एक एव परमानन्द उपाधिभेदात् शतधा भिद्यत इति शतानन्दः। 'एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। परमानन्दविग्रहो नन्दिः। ज्योतिर्गणानामीश्वरः ज्योतिर्गणेश्वरः। 'तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति' इति श्रुतेः। 'यदादित्य गतं तेजः' इति स्मृतेश्च। विजित आत्मा मनो येन स विजितात्मा। न केनापि विधेय आत्मा स्वरूपमस्य इति अविधेयात्मा। सतो अवितथा कीर्त्तिरस्येति सत्कीर्त्तिः। करतलामलकवत् सर्व्वं साक्षात् कृतवतः क्वापि संशयो नास्तीति छिन्नसंशयः ॥७९॥

सर्व्वभूतेभ्यः समुद्रिक्तत्वात् उदीर्णः। सर्व्वतः सर्व्वं स्वचैतन्येन पश्यतीति सर्व्वतश्चक्षुः। 'विश्वतश्चक्षुः' इति श्रुतेः। न विद्यते यस्येशः सोऽनीशः। 'न तस्येशः कश्चन' इति श्रुतेः। शश्वद्भवन्नपि न विक्रियां कदाचिदुपैतीति शाश्वतस्थिरः इति नामैकम्। लङ्कां प्रति मार्गमन्विष्यमाणः सागरोपान्ते भूमौ शेत इति भूशयः। स्वेच्छयाऽवतारैर्बहुभिर्भूमिं भूषयन् भूषणः। भूतिः भवनं सत्ता विभूतिरिति वा समस्तविभूतीनां कारणत्वाद्वा भूतिः। विगतः शोकोऽस्य परमानन्दैकरूपत्वादिति विशोकः। स्मरणमात्रेण भक्तानां शोकं नाशयतीति शोकनाशनः ॥८०॥

यदीयेनार्च्चिषा चन्द्रसूर्य्यादयो ज्योतिष्मन्तः स एव मुख्योऽर्च्चिष्मान्। सर्व्वलोकार्च्चितैर्व्विरिञ्चादिभिरर्च्चितः इत्यर्च्चितः। कुम्भवत्तस्मिन् सर्व्वं प्रतिष्ठितमिति कुम्भः। गुणत्रयातीततया विशुद्धश्चासावात्मेति विशुद्धात्मा। स्मृतिमात्रेण पापानां क्षपणात् विशोधनः। चतुर्व्यूहेषु चतुर्थो व्यूहः अनिरुद्धः। न निरुद्ध्यते शत्रुभिः कदाचित् इति वा। प्रतिरथः प्रति-

Downloaded from https://www.holybooks.com

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥६४२-६५०॥८२॥
कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्द्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥६५१-६६०॥८३॥

पन्तोऽस्य न विद्यत इत्यप्रतिरथः । प्रकृष्टं द्युम्नं द्रविणमस्येति प्रद्युम्नः । चतुर्व्यूहात्मा वा । अहिंसितविक्रमोऽमितविक्रमः । अमितः अतुलितो विक्रमोऽस्य इति वा ॥ ८१॥

कालनेमिनामानमसुरं निजघानेति कालनेमिनिहा । वीरः शूरः । शूरकुलोद्भवत्वात् शौरिः । शूरजनानां वासवादीनां शौर्य्यातिशयेनेष्टे शूरजनेश्वरः । त्रयाणां लोकानामन्तर्य्यामितया आत्मा इति त्रिलोकात्मा । त्रयो लोका अस्मात् परमार्थतो न भिद्यन्ते इति वा त्रिलोकात्मा । त्रयो लोकास्तदाज्ञया: स्वेषु स्वेषु कर्म्मसु वर्त्तन्त इति त्रिलोकेशः । केशसंज्ञिताः सूर्य्यादि-संक्रान्ता अंशवस्तद्वत्तया केशवः ।

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्व्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः ॥

इति महाभारते । ब्रह्मविष्णुशिवाख्याः शक्तयः केशसंज्ञिताः तद्वत्तया वा केशवः । 'त्रयः केशिनः' इति श्रुतेः । 'मत्केशौ वसुधा तले' इत्यादौ केशशब्दः शक्तिपर्य्यायत्वेन प्रयुक्तः ।

को ब्रह्मेति समाख्यात ईशोऽहं सर्व्वदेहिनाम् । आवां तवांशसम्भूतौ ततः केशवनामवान् ॥

इति श्रीहरिवंशे । केशिनामानं असुरं हतवान् इति केशिहा । सहेतुकसंसारहरणात् हरिः ॥ ८२ ॥

धर्म्मादिपुरुषार्थचतुष्टयं वाञ्छद्भिः काम्यत इति कामः । कामश्चासौ देवश्चेति कामदेवः । कामिनां कामान् पालयतीति कामपालः । पूर्णकामस्वभावत्वात् कामी । कामोऽस्यास्तीति वा कामी । 'सोऽकामयत' इति श्रुतेः । अभिरूपतमं देहं वहन् कान्तः । द्विपरार्द्धान्ते कस्य ब्रह्मणोऽप्यन्तोऽस्मादिति वा कान्तः । कृत आगमः श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः । 'वेदाः शास्त्राणि विज्ञानमेतत् सर्व्वं जनार्द्दनात्' इति अत्रैव वक्ष्यति । 'श्रुतिस्मृती ममैवाज्ञे' इति भगवद्वचनात् । इदं तदीदृशं वेति निर्द्देष्टुं यत् न शक्यते गुणादीनाम् अतीतत्वात् परस्येत्यनिर्द्देश्यवपुः । रोदसी व्याप्य कान्तिरत्याधिका स्थिता अस्येति विष्णुः ।

व्याप्य मे रोदसी पार्थ कान्तिरभ्यधिका स्थिता । संसारवेशनात् पार्थ विष्णुरित्यभिसंज्ञितः ॥

इति महाभारते । गत्यादिमत्त्वाद्वीरः 'वी गतिप्रजनकान्त्यसनखादनेषु' इति धातुपाठात् । व्यापित्वान्नित्यत्वात् सर्व्वविक्त्वात् सर्व्वात्मत्वात् देशतः कालतो वस्तुतश्चापरिच्छिन्नोऽनन्तः । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः ।

गन्धर्व्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः।**

**ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥६६१-६७०॥८४॥**

**महाक्रमो महाकर्म्मा महातेजा महोरगः।**

**महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥६७१-६७८॥८५॥**

इति विष्णुपुराणवचनाद्वा अनन्तः। यत् दिग्विजये धनं प्रभूतम् अजयत्तेन धनञ्जयः अर्जुनः। 'पाण्डवानां धनञ्जयः' इति भगवद्वचनात् ॥८३॥

'तपो वेदाश्च विप्राश्च ज्ञानञ्च ब्रह्मसंज्ञितम्'। तस्मै हितत्वाद् ब्रह्मण्यः। तपआदीनां कर्त्तृत्वात् ब्रह्मकृत्। ब्रह्मात्मना सर्व्वं सृजतीति ब्रह्मा। बृहत्वाद्बृंहणत्वाच्च सत्यादिलक्षणं ब्रह्म। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिः।

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥

इति विष्णुपुराणे। तपआदीनां विवर्द्धनात् ब्रह्मविवर्द्धनः। वेदं वेदार्थञ्च यथावत् वेत्तीति ब्रह्मवित्। ब्रह्मात्मना ब्राह्मणात्मना समस्तानां लोकानां प्रवचनं कुर्व्वन् वेदस्याऽयमिति ब्राह्मणः। * ब्रह्मसंज्ञकास्तदंशभूता अस्य सन्ति इति ब्रह्मी। वेदान् ब्रह्म च स्वात्मभूतान् जानातीति ब्रह्मज्ञः। ब्राह्मणानां प्रियो ब्राह्मणप्रियः। ब्राह्मणाः प्रिया अस्येति वा।

घ्नन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं न प्रणमेद्यथार्हम्।

स पापकृद् ब्रह्मदवाग्निदग्धो दण्ड्यश्च वध्यश्च न चास्मदीयः॥ इति भगवद्वचनात्।

यं देवं देवकी देवी वसुदेवादजीजनत्। भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः ॥

इति महाभारते ॥ ८४ ॥

महान्तः क्रमाः पादविक्षेपोऽस्य स महाक्रमः। 'शं नो विष्णुरुरुक्रमः' इति श्रुतेः। महत् जगदुत्पत्त्यादि कर्म्माऽस्येति महाकर्म्मा। यदीयेन तेजसा भास्करादयस्तेजस्विनस्तत् महत्तेजः अस्य इति महातेजाः।

यदादित्यगतं तेजो जगद् भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाऽग्नौ तत्तेजो विद्धि मामकम् ॥

इति भगवद्वचनात्। स्थैर्य्यशौर्य्यादिभिः धर्म्मैर्महद्भिः समलङ्कृत इति वा महातेजाः। महांश्चासावुरगश्चेति महोरगः। 'सर्पाणामस्मि वासुकिः' इति भगवद्वचनात्। महांश्चासौ क्रतुश्चेति महाक्रतुः। 'यथाऽश्वमेधः क्रतुराट्' इति मनुवचनात्। सोऽपि स एवेति स्तुतिः। महांश्चासौ यज्वा चेति लोकसंग्रहार्थं यज्ञान् प्रवर्त्तयन् महायज्वा। महांश्चासौ यज्ञश्चेति महायज्ञः। 'यज्ञानां जपयज्ञोऽस्मि' इति भगवत्वचनात्। महच्च तद्धरिश्चेति सर्व्वजगत्तदात्मतया ह्रियत इति महाहरिः। महात्मतया ह्रियत इति वा महाहरिः। महाहविः इति

* ब्रह्मसंज्ञितास्तच्छेषभूता इति वा।

**स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।**
**पूर्णः पूरयिता पुण्यः पुण्यकीर्त्तिरनामयः ॥६७९-६८९॥८६॥**
**मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।**
**वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥६९०-६९८॥८७॥**
**सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।**
**शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥६९९-७०७॥८८॥**

पाठे महच्च तद्धविश्चेति ब्रह्मात्मनि सर्व्वं जगत् तदात्मतया हूयत इति महाहविः । महाक्रतुरित्यादिषु बहुव्रीहिर्वा ॥ ८५ ॥

सर्व्वैः स्तूयतेऽसौ न स्तोता कस्यचिदिति स्तव्यः । अत एव स्तवप्रियः । येन स्तूयते तत् स्तोत्रं गुणसंकीर्त्तनात्मकम् । तद्धरिरेवेति । स्तुतिः स्तवनक्रिया । स्तोता अपि स एव । प्रियं रणमस्य यतः पञ्चमहायुधानि धत्ते सततं लोकरक्षार्थमतो रणप्रियः । सकलकामैः सकलाभिः शक्तिभिः पूर्णत्वात् सम्पन्नः पूर्णः । पूरयिता च सर्व्वेषां सम्पद्भिः । न केवलम् पूर्ण एव । स्मृतिमात्रेण कल्मषाणि क्षपयतीति पुण्यः । पुण्या कीर्त्तिरस्य यतः पुण्यमावहत्यस्य कीर्त्तिर्नृणामिति पुण्यकीर्त्तिः । आन्तरैः बाह्यैर्व्याधिभिः कर्म्मजैर्न पीड्यत इति अनामयः ॥ ८६ ॥

मनसो वेग इव वेगो यस्य सर्व्वगतत्वादिति मनोजवः । चतुर्द्दशविद्यानां बाह्यविद्यासमयानाञ्च प्रणेता प्रवक्ता चेति तीर्थकरः । हयग्रीवरूपेण मधुकैटभौ हत्वा विरिञ्चाय सर्गादौ सर्व्वाः श्रुतीरन्याश्च विद्या उपादिशत् वेदबाह्या विद्याः सुरवैरिणां वञ्चनाय चोपादिशदिति पौराणिकाः कथयन्ति । वसु सुवर्णं रेतोऽस्येति वसुरेताः ।

अप एव ससर्ज्जादौ तासु वीजमवासृजत् । तदण्डमभवद्धैमं * सहस्रांशुसमप्रभम् ॥

इति व्यासवचनात् । वसु धनं प्रकर्षेण ददातीति साक्षाद्धनाध्यक्षोऽयम् इतरस्तु तत्प्रसादाद्धनाध्यक्ष इति वसुप्रदः । वसु प्रकृष्टं मोक्षाख्यं फलं भक्तेभ्यः प्रददाति इति द्वितीयवसुप्रदः । 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विदः' इति श्रुतेः । सुरारीणां वसु प्रकर्षेण खण्डयन् वा वसुप्रदः । वसुदेवस्यापत्यं वासुदेवः । वसन्ति भूतान्यत्र तेषु अयमपि वसतीति वसुः । अविशेषेण सर्व्वेषु विषयेषु तन्मनो वसतीति वसु तादृशं मनोऽस्येति वसुमनाः । 'ब्रह्म हविः' इति भगवद्वचनात् हविः ॥ ८७ ॥

'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः ब्रह्मास्तीति ये विदुस्ते सन्तः तैः प्राप्यत इति सद्गतिः । सती गतिः बुद्धिर्वा उत्कृष्टा साऽस्येति वा सद्गतिः । सतो कृतिः जगदुत्पत्त्यादिलक्षणा अस्य यस्मात्तेन सत्कृतिः । सजातीयविजातीयस्वगतभेदरहिता अनुभूतिः

* ब्रह्मणः कारणं परम् इति वा ।

Downloaded from https://www.holybooks.com

**भूतावासो वासुदेवः सर्व्वासुनिलयोऽनलः।**
**दर्पहा दर्पदो दृप्तो दुर्द्धरोऽथापराजितः॥ ७०८-७१६॥८९॥**
**विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्।**
**अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शताननः॥७१७-७२४॥९०॥**

सत्ता। 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः। सन्नेव परमात्मा चिदात्मको बहुधा अबाधात् भासमानत्वात् सद्भूतिः। नान्यप्रतीतैर्बाध्यमानत्वाच्च न सन्नाप्य सत्। श्रौतो यौक्तिको वा वाधः प्रपञ्चस्य विवच्चितः। सतां तत्त्वविदां परं प्रकृष्टमयनमिति सत्परायणः। हनूमत्प्रमुखाः शौर्य्यशालिनो सैनिकाः यस्यां सेनायां विद्यन्ते सा शूरसेना यस्य सः शूरसेनः। यदूनां प्रधानत्वात् यदुश्रेष्ठः। सतां विदुषामाश्रयः सन्निवासः। शोभना यामुना यमुनासम्बन्धिनः देवकीवसुदेवनन्दयशोदाबलभद्रसुभद्रादयः परिवेष्टारोऽस्येति सुयामुनः। गोपवेशधराः यामुनाः परिवेष्टारः पद्मासनादयः शोभना अस्य इति वा सुयामुनः॥ ८८॥

भूतान्यत्राभिमुख्येन वसन्तीति भूतावासः। 'वसन्ति सर्व्वभूतानि भूतावासस्ततो हरिः' इति श्रीहरिवंशे। जगदाच्छादयति माययेति वासुः वासुश्चासौ देवश्चेति वासुदेवः। 'छादयामि जगद्विश्वं भूत्वा सूर्य्य इवांशुभिः' इति भगवद्वचनात्। सर्व्व एव असवो मुख्याः प्राणा जीवात्मको यस्मिन्नाश्रये निलीयन्ते स सर्व्वासुनिलयः। अलं पर्य्याप्तिः शक्तिसम्पदाम्। अलं नास्य विद्यत इत्यनलः। धर्म्मविरुद्धे पथि तिष्ठतां दर्पं हन्तीति दर्पहा। धर्म्मत्र वर्त्मनि वर्त्तमानानां दर्पं ददातीति दर्पदः। * स्वात्मामृतरसाच्छादात् नित्यप्रमुदितत्वात् दृप्तः। न शक्या धारणा यस्य प्रणिधानादिषु सर्व्वोपाधिविनिर्मुक्तत्वात् तथापि तत्प्रसादतः कैश्चिद्दुःखेन हृदये धार्य्यते जन्मान्तरसहस्रेषु भावनायोगात् तस्मात् दुर्धरः।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥

इति भगवद्वचनात्। आन्तरैरागादिभिर्बाह्यै दानवादिभिरपि शत्रुभिर्न पराजित इत्यपराजितः॥ ८९॥

विश्वं मूर्त्तिरस्य सर्व्वात्मकत्वादिति विश्वमूर्त्तिः। शेषपर्य्यङ्कशायिनोऽनिरुद्धस्य महती मूर्त्तिरिति महामूर्त्तिः। दीप्ता ज्ञानमयी मूर्त्तिः यस्येति स्वेच्छया गृहीता तैजसी मूर्त्तिर्दीप्ता अस्येति वा दीप्तमूर्त्तिः। कर्म्मनिबन्धना मूर्त्तिरस्य न विद्यत इत्यमूर्त्तिमान्। अवतारेषु स्वेषु या लोकानामुपकारिणीः वह्वीः मूर्त्तीर्भजत इत्यनेकमूर्त्तिः। यद्यप्यनेकमूर्त्तिस्तथापि अयमीदृश इति न व्यज्यते इति अव्यक्तः। नानाविकल्पजा मूर्त्तयः संविदाकृतेः सन्तीति शतमूर्त्तिः। विश्वादिमूर्त्तित्वं यतोऽस्य अतः शताननः॥ ९०॥

* स्वात्मामृतरसास्वादनादिति वा।

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥७२५-७३५॥९१॥
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥७३६-७४५॥९२॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥७४६-७५५॥९३॥

परमार्थतः सजातीयविजातीयस्वगतभेदनिर्मुक्तत्वादेकः। 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः। माययाऽनेकरूपत्वात् नैकः। 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः। सोमो यत्राभिषूयते सोऽध्वरः सवः। कशब्दः सुखवाचकः तेन स्तूयत इति कः। 'कं ब्रह्म' इति श्रुतेः। सर्व्वपुरुषार्थरूपत्वात् ब्रह्मैव विचार्य्यमिति ब्रह्म किम्। यत्शब्देन स्वतःसिद्धवस्तूद्देश्यवाचिना ब्रह्म निर्द्दिश्यते इति ब्रह्म यत्। 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः। तनोतीति ब्रह्म तत्। 'ॐ तत्सदितिनिर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति भगवद्वचनात्। पद्यते गम्यते मुमुक्षुभिरिति पदम्। यस्मादुत्कृष्टं नास्ति तदनुत्तमम्। सविशेषणमेकं नाम पदमनुत्तममिति। आधारभूते अस्मिन् सकला लोका बध्यन्त इति लोकानां बन्धुर्लोकबन्धुः। लोकजनकत्वात् जनकोपमो बन्धुर्नास्तीति वा लोकबन्धुः। लोकानां बन्धुकृत्यं हिताहितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा लोकबन्धुः। लोकैर्नाथ्यते याच्यते लोकान् उपतपति आशास्ते इति लोकानामिष्ट इति लोकनाथः। 'नाथृनाधृ उपतापैश्वर्य्याशीःषु' इति धातुपाठात् लोकैर्य्याच्यते प्रार्थ्यते वा। मधुकुले जातत्वान्माधवः। भक्तस्नेहवान् भक्तवत्सलः ॥ ९१ ॥

सुवर्णस्य वर्ण इव वर्णोऽस्य इति सुवर्णवर्णः। 'यदा पश्यः पश्यते रुक्मवर्णम्' इति श्रुतेः। हेमेवाऽङ्गं वपुर्यस्य इति हेमाङ्गः। 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति श्रुतेः। वराणि शोभनान्यङ्गान्यस्येति वराङ्गः। चन्दनैराह्लादनैरङ्गदैः केयूरैर्भूषित इति चन्दनाङ्गदी। धर्म्मत्राणाय वीरान् असुरमुख्यान् हिरण्यकशिपुप्रभृतीन् नागादींश्च हन्तीति वीरहा। समो नास्य विद्यते सर्व्वलोकविलक्षणत्वादिति विषमः। 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेः। 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति गीतासु। सर्व्वविशेषणरहितत्वात् शून्य इव शून्यः। घृता विगलिता आशिषः प्रार्थनाः अस्येति घृताशीः। न स्वरूपान्न सामर्थ्यान्न च ज्ञानादिकात् गुणात् चलनं विद्यते अस्य इत्यचलः। वायुरूपेण चलति इति चलः ॥ ९२ ॥

अनात्मवस्तुष्वात्माभिमानो नास्ति अस्य स्वच्छसंवेदनाकृतेरित्यमानी। स्वमायया

तेजोवृषो द्युतिधरः सर्व्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥७५६-७६४॥९४॥
चतुर्मूर्त्तिश्चतुर्व्वाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्व्वेदविदेकपात् ॥७६५-७७२॥९५॥

सर्व्वेषामनात्मस्वात्माभिमानं ददाति भक्तानां सत्कारं मानञ्च ददातीति तत्त्वविदाम् अधिष्ठितानाम् अनात्मस्वात्माभिमानं खण्डयतीति वा मानदः । सर्व्वेषां माननीयत्वात् सर्व्वजन पूजार्हत्वात् सर्व्वेश्वरत्वाच्च मान्यः । त्रयो लोकाः स्वर्गादयस्तेषां स्वामी सर्व्वाध्यक्ष इति वा लोकस्वामी । चतुर्द्दशानां लोकानामीश्वर इति वा । त्रीन् लोकान् धारयति पालयतीति त्रिलोकधृक् । शोभना मेधा स्वाभाविकी प्रज्ञा अस्येति सुमेधाः । 'नित्यमसिच् प्रजामेधयोः' इति समासान्तोऽसिच्प्रत्ययः । मेधेऽध्वरे जायत इति मेधजः । कृतार्थत्वात् धन्यः । सत्या अवितथा मेधा अस्येति सत्यमेधाः । अंशैरशेषैः शेषाद्यैरशेषां धरां धरतीति धराधरः ॥९३॥

तेजसा अम्भांसि सर्व्वदा आदित्यरूपेण वर्षतीति तेजोवृषः । द्युतिमङ्गगतां कान्तिं धरतीति द्युतिधरः । सर्व्वशस्त्रभृतां वरः श्रेष्ठ इति सर्व्वशस्त्रभृतां वरः । भक्तैरुपहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः । धावतो विषयारण्ये दुर्द्दान्तेन्द्रियवाजिनः तत्प्रसादेन रश्मिनेव वध्नातीति वा प्रग्रहः । 'रश्मौ च' इति पाणिनिमुनिवचनात् प्रग्रहशब्दस्य साधुत्वम् । स्ववशेन सुरारीन् सर्व्वान् निगृह्णातीति निग्रहः । विगतम् अग्रम् अन्तो विनाशोऽस्येति व्यग्रः । भक्तानाम् अभीष्टप्रदाने व्यग्र इति वा । चतुःशृङ्गत्वान्नैकशृङ्गः । 'चत्वारि शृङ्गा त्रयोऽस्य पादा' इति मन्त्रवर्णात् । निगदेन मन्त्रेण अग्रे जायत इति निशब्दलोपं कृत्वा गदाग्रजः । यद्वा गदो नाम वसुदेवस्याग्रजः तस्मादग्रे जायत इति गदाग्रजः ॥९४॥

चतस्रो मूर्त्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्येति चतुर्मूर्त्तिः । सिता रक्ता पीता कृष्णा चेति चतस्रो मूर्त्तयोऽस्येति वा । चत्वारो बाहवोऽस्येति चतुर्व्वाहुः इति नाम वासुदेवे रूढ़म् । 'शरीरपुरुषश्छन्दः पुरुषो वेदपुरुषो महापुरुषः' इति वह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्युहा अस्येति चतुर्व्यूहः । आश्रमाणां वर्णानां चतुर्णां यथोक्तकारिणां गतिश्चतुर्गतिः । रागद्वेषादिरहितत्वात् चतुरः आत्मा मनः यस्य मनोबुद्धिरहङ्कारश्चित्तञ्चेति अन्तःकरणचतुष्टयं आत्मा यस्येति वा स चतुरात्मा । धर्म्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयं भवत्युत्पद्यते यस्मादिति चतुर्भावः । चतुरो वेदान् वेत्तीति चतुर्व्वेदवित् । प्रपञ्चलक्षण एकः पादो विभूत्यंशरूपोऽस्येति एकपात् । 'पादोऽस्य विश्वा भूतानि' इति श्रुतिः । 'विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति भागवद्वचनात् ॥९५॥

Downloaded from https://www.holybooks.com

**समावर्त्तोऽनिवृत्तात्मा दुर्ज्जयो दुरतिक्रमः ।**
**दुर्ल्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥७७३-७८१॥९६॥**
**शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्द्धनः ।**
**इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः ॥७८२-७८९॥९७॥**
**उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।**
**अर्क्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी ॥७९०-७९९॥९८॥**

संसारचक्रस्य सम्यगावर्त्तकः इति संसारचक्रमस्मिन् सम्यगावर्त्तत इति वा समावर्त्तः। निवृत्त आत्मा मनो विषयेभ्य इति निवृत्तात्मा। अनिवृत्तात्मा इति पाठे सर्व्वत्र वर्त्तमानत्वात् न निवर्त्तते आत्मा विषयेभ्यः अस्य इति अनिवृत्तात्मा। जेतुं न शक्यत इति दुर्ज्जयः। भयहेतुत्वादस्याऽऽज्ञां सूर्य्यादयो नातिक्रमन्तीति दुरतिक्रमः।

भयादस्याऽग्निस्तपति भयात्तपति भास्करः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

इति मन्त्रवर्णात्। 'महद्भयं वज्रमुद्यतम्' इति च। दुर्ल्लभया भक्त्या लभ्यत्वात् दुर्ल्लभः।

जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

इति व्यासवचनात्। 'भक्त्या लभ्यस्त्वनन्यया' इति भगवद्वचनाच्च। दुःखेन गम्यते ज्ञायत इति दुर्गमः। अन्तरायप्रतिहतैः दुःखादवाप्यत इति दुर्गः। दुःखेनाऽऽवास्यते चित्ते योगिभिः समाधाविति दुरावासः। दुरारयो दुर्दमिनो दानवादयस्तान् हन्तीति दुरारिहा ॥९६॥

शोभनैरङ्गैः ध्येयत्वात् शुभाङ्गः। लोकानां सारं सारङ्गवत् भृङ्गवद् गृह्णातीति लोकसारङ्गः। 'प्रजापतिः लोकानभ्यतपत्' इति श्रुतेः। लोकसारः प्रणवः तेन प्रतिपत्तव्य इति वा। पृषोदरादित्वात् साधुत्वम्। शोभनस्तन्तुर्विस्तीर्णः प्रपञ्चोऽस्येति सुतन्तुः। तमेव तन्तुं वर्द्धयति छेदयतीति वा तन्तुवर्द्धनः। इन्द्रस्य कर्म्मेव कर्म्म अस्येति इन्द्रकर्म्मा ऐश्वर्य्यकर्म्मेत्यर्थः। महान्ति वियदादीनि भूतानि कर्म्माणि कार्य्याण्यस्येति महाकर्म्मा। कृतमेव सर्व्वं न कर्त्तव्यं किञ्चित् कर्म्म अस्य विद्यत इति कृतकर्म्मा। धर्म्मात्मकं कर्म्म कृतवानिति वा कृतकर्म्मा। कृतो वेदात्मक आगमो येनेति कृतागमः। 'अस्य महतो भूतस्य निःश्वसितमेतत्' इति श्रुतेः ॥ ९७ ॥

उत्कृष्टं भवं जन्म स्वेच्छया भजति इति उद्भवः। उद्गतमपगतं जन्माऽस्य समस्तकारणत्वादिति वा उद्भवः। विश्वातिशायिसौभाग्यशालित्वात् सुन्दरः। सुष्ठु उनत्तीति सुन्दः। उन्दी क्लेदने इत्यस्य धातोः पचाद्यच्। आर्द्रीभावस्य वाचकः सुन्दः करुणाकरः इत्यर्थः। पृषोदरादित्वात् पररूपत्वम्। रत्नवत्सुन्दरा नाभिरस्येति रत्ननाभः। रत्नशब्देनात्र शोभा लक्ष्यते। शोभनं

Downloaded from https://www.holybooks.com

सुवर्णविन्दुरक्षोभ्यः सर्व्ववागीश्वरेश्वरः ।
महाह्रदो महागर्त्तो महाभूतो महानिधिः ॥८००-८०६॥९९॥
कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्व्वज्ञः सर्व्वतोमुखः ॥८०७-८१६॥१००॥

लोचनं नयनं ज्ञानं वा अस्येति सुलोचनः । ब्रह्मादिभिः पूज्यतमैरर्च्चनीयत्वादर्कः । वाजमन्नम् अन्नार्थिनां सनोति ददातीति वाजसनः । प्रलयाम्भसि शृङ्गवत् मत्स्यविशेषरूपी शृङ्गी । मत्वर्थीयोऽतिशायने इनि प्रत्ययः । अरीन् अतिशयेन जयति जयहेतुरिति वा जयन्तः । सर्व्वविषयं ज्ञानमस्येति सर्व्ववित् । आभ्यन्तरान् रागादीन् बाह्यान् हिरण्याक्षादीन् दुर्ज्जयान् जेतुं शीलमस्येति जयी । तच्छीलाधिकारे 'जिदृक्षि' इत्यादि पाणिनिवचनादिनिप्रत्ययः । सर्व्वविच्चासौ जयी चेति सर्व्वविजयी इत्येकं नाम ॥ ९८ ॥

विन्दवोऽवयवाः सुवर्णसदृशा अस्येति सुवर्णविन्दुः । 'आप्रणखात् सर्व्व एव सुवर्णः' इति श्रुतिः । शोभनो वर्णोऽक्षरं विन्दुश्च यस्मिन्मन्त्रे तन्मन्त्रात्मा वा सुवर्णविन्दुः । रागद्वेषादिभिः शब्दादि विषयैश्च त्रिदशारिभिश्च न क्षोभ्यत इत्यक्षोभ्यः । सर्व्वेषां वागीश्वराणां ब्रह्मादीनामपीश्वरः । अवगाह्य सदानन्दं विश्रम्य सुखमासते योगिन इति महाह्रदः । गर्त्तवदस्य माया महती दुरत्ययेति महागर्त्तः । 'मम माया दुरत्यया' इति भगवद्वचनात् । यद्वा गर्त्तशब्दो रथपर्य्याय इति नैरुक्तैरुक्तः तस्मान्महारथो महागर्त्तः । महारथत्वमस्य प्रसिद्धं भारतादिषु । कालत्रयानवच्छिन्नस्वभावत्वात् महाभूतः । सर्व्वमहाभूतान्यस्मिन्निधीयन्त इति निधिः । महांश्चासौ निधिश्चेति महानिधिः ॥९९॥

कुं धरणीं भारावतरणं कुर्व्वन् मोदयतीति कुमुदः । कुन्दपुष्पतुल्यानि शुद्धानि फलानि राति ददातीति लाति आदत्ते इति वा कुन्दरः । रलयोरैक्यत्वस्मरणात् । 'कुं धरां दारयामास हिरण्याक्षजिघांसया । वाराहं रूपमास्थाय' इति वा कुन्दरः । कुन्दोपमसुन्दराङ्गत्वात् शुद्धस्फटिकवन्निर्म्मल इति वा कुन्दः । कुं पृथिवीं कश्यपाय ददातीति वा कुन्दः । सर्व्वपापविनाशाय वाजिमेधेन चेष्टवान् । तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः ॥

मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम् । इति हरिवंशे ।

कुं पृथिवीं द्यति खण्डयतीति वा कुन्दः । कुशब्देन पृथिवीश्वरा लक्ष्यन्ते ।

निःक्षत्रियां यश्च चकार मेदिनीमनेकशो बाहुवलं तथाच्छिनत् ।

यः कार्त्तवीर्य्यस्य स भार्गवोत्तमो ममास्तु माङ्गल्यविवृद्धये हरिः ॥ इति विष्णुधर्म्मे ।

पर्ज्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वकामानभिवर्षतीति वा पर्ज्जन्यः । स्मृतिमात्रेण पुनातीति पावनः । इलति प्रेरणं करोतीति इलः तद्रहितत्वादनिलः । इलति

Downloaded from https://www.holybooks.com

**सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।**
**न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥८१७-८२५॥ १०१॥**
**सहस्रार्च्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।**
**अमूर्त्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८२६-८३४॥१०२॥**

स्वपिति इति वा इत्यत्र इलः तद्विपरीतः नित्यबुद्धस्वरूपत्वादनिलः। अनिलो वायुस्तत्स्वरूपत्वादिति वा अनिलः। अथवा इलतिर्ग्रहणार्थत्वात् किञ्चिन्न गृह्णातीति वा अनिलः। आत्मामृतरसम् अश्नातीति अमृताशः। मथितममृतमसुरान् नाशयित्वा स्वयं चाश्नातीति वा अमृताशः। अमृता अनश्वरा अनश्वरफलत्वात् आशा वाञ्छाऽस्येति वा अमृताशः। मृतं मरणं तद्रहितं वपुरस्येति अमृतवपुः। सर्व्वं जानातीति सर्व्वज्ञः। 'यः सर्व्वज्ञः सर्व्ववित्' इति श्रुतेः। 'सर्व्वतोऽक्षिशिरोमुखम्' इति भगवद्वचनात् सर्व्वतोमुखः ॥१००॥

पत्रपुष्पफलादिभिर्भक्तिमात्रसमर्पितैः सुखेन लभ्यत इति सुलभः।

पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु।
भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्नः॥ इति महाभारते।

शोभनं व्रतमस्येति शोभनं व्रतयति इति वा भुङ्क्ते भोजनाच्च निवर्त्तते इति सुव्रतः। अनन्याधीनसिद्धित्वात् सिद्धः। सुरशत्रव एवास्य शत्रवस्तान् जयतीति शत्रुजित्। तापनात् सुरशत्रूणां शत्रुतापनः। न्यक् अर्व्वाक् रोहति सर्व्वेषामुपरि वर्त्तत इति न्यग्रोधः। पृषोदरादित्वात् हकारस्य धकारादेशः। सर्व्वाणि भूतानि न्यक्कृत्य स्वमायया वृणोति रुणद्धीति वा न्यग्रोधः। अम्बरवदुन्नतः सर्व्वकारणत्वेन इत्युदुम्बरः। पृषोदरादित्वात् उकारः। यद्वा उदुम्बरमन्नाद्यं तेन तदात्मना विश्वं पोषयन्नुदुम्बरः। 'अन्नाद्यमुदुम्बरम्' इति श्रुतेः। न्यग्रोधोदुम्बर इत्यत्र विसर्गलोपे सन्धिरार्षः। श्वोऽपि न स्थास्यतीत्यश्वत्थः। पृषोदरादित्वात् सकारस्य तकारः।

ऊर्द्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्। छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥

इति भगवद्वचनात्। 'ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थ सनातनः' इति श्रुतेः। चाणूरनामानमन्ध्रञ्च निषूदितवानिति चाणूरान्ध्रनिषूदनः ॥१०१॥

अनन्तान्यर्च्चींषि यस्य स सहस्रार्च्चिः।

दिवि सूर्य्यसहस्रस्य भवेद् युगपदुत्थिता। यदि भाः सदृशी सा स्यात् भासस्तस्य महात्मनः॥

इति भगवद्वचनात्। सप्तजिह्वा अस्य सन्ति इति वा सप्तजिह्वः। तथा च श्रुतिः।

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वाः॥ इति॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**अणुर्बृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान् ।**
**अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ॥८३५-८४६॥१०३॥**
**भारभृत् कथितो योगी योगीशः सर्व्वकामदः ।**
**आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥८४७-८५६॥१०४॥**

सप्त एधांसि दीप्तयोऽस्येति सप्तैधाः अग्निः । 'सप्त ते अग्ने समिधः सप्तजिह्वाः' इति मन्त्रवर्णात् । सप्ताश्वाः वाहनानि सप्तनामैको वा अश्वो वाहनम् अस्येति सप्तवाहनः । 'आदित्यमेकोऽश्वो वहति सप्तनामा' इति श्रुतेः । मूर्त्तिर्घनरूपं धारणसमर्थं चराचरलक्षणम् । 'ताभ्योऽभितप्ताभ्यो मूर्त्तिरजायत' इति श्रुतेः । तद्रहित इत्यमूर्त्तिः । अथवा देहसंस्थापनलक्षणा मूर्च्छिताङ्गावयवा मूर्त्तिः तद्रहित इति अमूर्त्तिः । अघं दुःखं पापञ्च इयमस्य न विद्यत इत्यनघः । प्रमाणादिसाक्षित्वेन सर्व्वप्रमाणागोचरत्वात् अचिन्त्यः । अयमीदृशः इति विश्वप्रपञ्चविलक्षणत्वेन चिन्तयितुमशक्यत्वाद्वा अचिन्त्यः । असन्मार्गवर्त्तिनां भयङ्करोतीति भक्तानां भयानि कृन्तति कृणोतीति वा भयकृत् । वर्णाश्रमाचारवतां भयं नाशयतीति भयनाशनः ।

वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥

इति पराशरवचनात् तैराराधितत्वाद् भयं नाशयतीति भयनाशनः ॥ १०२ ॥

सौक्ष्म्यातिशयशालित्वात् अणुः । 'एषोऽणुरात्मा चेतसा वेदितव्यः' इति मन्त्रवर्णात् । बृहत्त्वात् बृंहणत्वाच्च बृहत् ब्रह्म । 'अणोरणीयान् महतो महीयान्' इति श्रुतेः । अस्थूलमित्यादिना द्रव्यत्वप्रतिषेधात् कृश इव कृश स्थूल इव स्थूल इत्युपचर्य्यते सर्व्वात्मत्वात् । सत्त्वरजस्तमसां सृष्टिस्थितिप्रलयकर्म्मस्वधिष्ठातृत्वात् गुणभृत् । परमार्थतो गुणाभावान्निर्गुणः । 'साक्षी चेताः केवलो निर्गुणश्च' इति श्रुतेः । शब्दादिगुणहीनत्वात् निरतिशयसूक्ष्मत्वात् नित्यशुद्धबुद्धसर्व्वगतत्वात् प्रतिबन्धकं कर्म्मजातं तर्कतोऽपि यतो वक्तुं न शक्यम् अतएव महान् । 'अशब्दोऽस्पर्शोऽनङ्गोऽशरीरो महांश्च शुचिः' इति आपस्तम्बः । पृथिव्यादीनां धारकाणां धारकत्वात् न केनापि ध्रियत इति अधृतः । यद्येवमयं केन धार्य्यते इत्याशङ्क्याह स्वेनैव आत्मना धार्य्यत इति स्वधृतः । 'स भगवः कस्मिन् प्रतिष्ठितः स्वमहिम्नि' इति श्रुतेः । शोभनं पद्मोदरताम्रवदभिरूपमस्य आस्यमिति स्वास्यः । स्वो वेदात्मको महान् शब्दराशिः तस्य मुखान्निर्गतः पुरुषार्थोपदेशार्थमिति वा स्वास्यः । 'वेदा अस्य महतो भूतस्य निश्वसितम्' इति श्रुतेः । अन्यस्य वंशिनो वंशा पाश्चात्याः । अस्य वंशः प्रपञ्चः प्रागेव न पाश्चात्य इति प्राग्वंशः । वंशं प्रपञ्चं वर्द्धयन् छेदयन् वा वंशवर्द्धनः ॥१०३॥

अनन्तादिरूपेण भुवो भारं बिभ्रत् भारभृत् । वेदादिभिरेवायं परत्वेन कथितः । सर्व्वैः वेदैः कथित इति वा कथितः । 'सर्व्वे वेदा यत्पदमामनन्ति' । 'वेदैश्च सर्व्वैरहमेव वेद्यः' ।

Downloaded from https://www.holybooks.com



**धनुर्द्धरो धनुर्व्वेदो दण्डो दमयिता दमः।**
**अपराजितः सर्व्वसहो नियन्ताऽनियमोऽयमः ॥८५७-८६६॥१०५॥**
**सत्ववान् सात्त्विकः सत्यः सत्यधर्म्मपरायणः।**
**अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्द्धनः ॥ ८६७-८७५॥१०६॥**

वेदे रामायणे पुण्ये भारते भरतर्षभ। आदावन्ते च मध्ये च हरिः सर्व्वत्र गीयते ॥

इति वचनाच्च। 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्याद्युक्तम्। किं तदध्वनो विष्णोः व्यापनशीलस्य परमं पदं सतत्त्वम् इत्याकाङ्क्षायामिन्द्रियादिभ्यः सर्व्वेभ्यः परत्वेन प्रतिपाद्यते। 'इन्द्रियेभ्यः परो ह्यात्मा' इत्यारभ्यः 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा-गतिः' इत्यन्तेन यः सः कथितः। योगो ज्ञानं तेनैव गम्यत्वाद् योगी। योगः समाधिः स हि स्वात्मनि सर्व्वदा समाधत्ते स्वमात्मानं तेन वा योगी। अन्ये योगिनो योगान्तरायैः आत्मनि सर्व्वदा विहन्यमानाः स्वरूपात् प्रमाद्यन्ति अयन्तु तद्रहितत्वात्तेषामीश इति योगीशः। सर्व्वान् कामान् ददाति इति सर्व्वकामदः। 'फलमत उपपत्तेः' इति व्यासेन अभिहितत्वात्। आश्रमवत् सर्व्वेषां संसारारण्ये भ्रमतां विश्रामस्थानत्वात् आश्रमः। अविवेकिनो मनस्तापय-तीति श्रमणः। क्षामाः क्षीणाः प्रजाः सर्व्वाः करोतीति 'तत्करोति तदाचष्टे' इति णिचि पचाद्यचि कृते सम्पन्नः क्षामः इति। शोभनानि पर्णानि छन्दांसि संसारतरुरूपिणोऽस्य इति सुपर्णः। 'छन्दांसि यस्य पर्णानि' इति भगवद्वचनात्। वायुर्वहति यद्भीत्या स वायुवाहनः। 'भीषाऽस्माद्वातः पवते' इति श्रुतेः ॥१०४॥

श्रीमान् रामो धनुः धारयामासेति धनुर्द्धरः। स एव दाशरथिः धनुर्व्वेदं वेत्तीति धनु-र्व्वेदः। दमनं दमयतां दण्डः। 'दण्डो दमयतामस्मि' इति भगवद्वचनात्। वैवस्वतनरेन्द्रादि-रूपेण प्रजा दमयतीति दमयिता। दमो दम्येषु दण्डकार्य्यं फलम् तच्च स एवेति दमः। शत्रु-भिर्न पराजित इति अपराजितः। सर्व्वकर्म्मसु समर्थ इति सर्व्वसहः। सर्व्वान् शत्रून् सहत इति वा सर्व्वसहः। सर्व्वान् स्वेषु स्वेषु कृत्येषु व्यवस्थापयतीति नियन्ता। नियमो नियतिः तस्य न विद्यत इति अनियमः। सर्व्वनियन्तुरस्य नियन्त्रन्तराभावात्। नास्य विद्यते यमो मृत्यु-रिति अयमः। अथवा यमनियमौ योगाङ्गे तद्गम्यत्वात् स एव नियमः यमः ॥ १०५ ॥

शौर्य्यवीर्य्यादिकं सत्त्वम् अस्यास्ति इति सत्त्ववान्। सत्त्वगुणे प्राधान्येन स्थित इति सात्त्विकः। सत्येषु साधुत्वात् सत्यः। सत्ये यथाभूतार्थकथने धर्म्मे च चोदनालक्षणे प्रकर्षेण नियत इति सत्यधर्म्मपरायणः। अभिप्रेयते पुरुषार्थाकाङ्क्षिभिः आभिमुख्येन प्रलयेऽस्मिन् अभिप्रैति जगदिति वा अभिप्रायः। प्रियाणि इष्टान्यर्हतीति प्रियार्हः।

यद्यदिष्टतमं लोके यच्चाऽस्य दयितं गृहे। तत्तद्गुणवते देयं तदेवाऽक्षयमिच्छता ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्य्यः सविता रविलोचनः ॥८७६-८८५॥१०७॥
अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्व्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥८८६-८९५॥१०८॥
सनात् सनातनतमः कपिलः कपिरप्ययः ।

इति स्मरणात् । स्वागतासनप्रशंसार्घ्यपाद्यस्तुतिनमस्कारादिभिः पूजासाधनैः पूजनीय इति अर्हः । न केवलं प्रियार्ह एव किन्तु स्तुत्यादिभिर्भजतां प्रियं करोतीति प्रियकृत् । तेषामेव प्रीतिं वर्द्धयति इति प्रीतिवर्द्धनः ॥ १०६ ॥

विहायसं गच्छति विहायो गतिराश्रयोऽस्येति वा विहायसगतिः । विहायो हृदयकुहरं विष्णुपदमादित्यो वा । स्वत एव द्योतत इति ज्योतिः । 'नारायणः परं ज्योतिः' इति मन्त्रवर्णात् । शोभना रुचिर्दीप्तिरिच्छा वाऽस्येति सुरुचिः । समस्तदेवतोद्देशेन प्रवृत्तेष्वपि कर्म्मसु हुतं भुङ्क्ते इति हुतभुक् । सर्व्वत्रैव वर्त्तमानत्वात् त्रयाणां लोकानां प्रभुत्वाद्वा विभुः । रसमादत्त इति रविरादित्यात्मा । विविधं रोचत इति विरोचनः । सूर्य्योऽग्निर्वा । सूतेः सुवतेर्वा सर्व्वमिति सूर्य्यशब्दो निपात्यते । 'राजसूयसूर्य्य' इति पाणिनिवचनात् । सर्व्वस्य जगतः प्रसवितेति सविता ।

रसानाञ्च तथादानात् रविरित्यभिधीयते । प्रजानान्तु प्रसवनात् सवितेति निगद्यते ॥

इति विष्णुधर्म्मोत्तरे । रविर्लोचनं चक्षुरस्येति रविलोचनः । 'अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ' इति श्रुतेः ॥ १०७ ॥

नित्यत्वात् सर्व्वगतत्वात् देशकालपरिच्छेदाभावात् अनन्तः । शेषरूपो वा । हुतं भुनक्तीति हुतभुक् । प्रकृतिं भोग्यां तच्चेतसा अचेतनां भुङ्क्ते इति जगत् पालयतीति वा भोक्ता । भक्तानां सुखं मोक्षलक्षणं ददातीति सुखदः । असुखं द्यति खण्डयतीति वा असुखदः । धर्म्मगुप्तये असकृज्जायमानत्वात् नैकजः अनेकजः । अग्रे जायत इत्यग्रजः हिरण्यगर्भः । 'हिरण्यगर्भः समवर्त्तताग्रे' इति श्रुतेः । अवाप्तसर्व्वकामत्वात् प्राप्तिहेतुत्वाभावात् निर्व्वेदोऽस्य नास्तीति अनिर्व्विण्णः । सतः साधून् आभिमुख्येन मृष्यते क्षमत इति सदामर्षी । तमनाधारमाधारमधिष्ठाय त्रयो लोकास्तिष्ठन्तीति लोकाधिष्ठानं ब्रह्म । अद्भुतत्वादद्भुतः । 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्य्यो वक्ता कुशलोऽस्य लब्धा आश्चर्य्यो ज्ञाता कुशलानुशिष्टः' इति श्रुतेः । 'आश्चर्य्यवत् पश्यति कश्चिदेनम्' इति भगवद्वचनात् । स्वरूपशक्तिव्यापारकार्य्यैरद्भुतत्वादद्भुतः ॥ १०८ ॥

सनादिति निपातः चिरार्थवचनः । कालश्च परस्यैव विकल्पना कापि ।

Downloaded from https://www.holybooks.com

**स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥८९६-९०५॥१०९॥**
**अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ॥**
**शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥९०६-९१४॥११०॥**

परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज। व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरम् ॥

इति श्रीविष्णुपुराणे। सर्व्वकारणत्वात् विरिञ्चादीनामपि सनातनानाम् अतिशयेन सनातनत्वात् सनातनतमः। * वाडवस्य कपिलो वर्णं इति प्रसिद्धम्। तद्रूपी कपिलः। कं जलं रश्मिभिः पिबति इति कपिः सूर्य्यः। कपिः वराहो वा। 'कपिर्वराहः श्रेष्ठश्च' इति वचनात्। प्रलये तस्मिन् अप्ययन्ति जगन्तीति अप्ययः। भक्तानां स्वस्ति मङ्गलं ददातीति स्वस्तिदः। तदेव करोतीति स्वस्तिकृत्। मङ्गलस्वरूपमात्मीयं परमानन्दलक्षणं स्वस्ति। तदेव भुङ्क्ते इति स्वस्तिभुक्। भक्तानां स्वस्ति मङ्गलं भुनक्तीति वा स्वस्तिभुक्। स्वस्तिरूपेण दक्षते वर्द्धते स्वस्ति दातुं समर्थो दक्षिणो वा स्वस्तिदक्षिणः। अथवा आशुकारिणि दक्षिणशब्दो वर्त्तते शीघ्रं स्वस्ति दातुम् अयमेव समर्थ इति स्वस्तिदक्षिणः।

यस्य च स्मरणादेव सिद्ध्यन्ति सर्व्वसिद्धयः। स्मृते सकलकल्याणभाजनं यत्र जायते ॥
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्। स्मरणादेव कृष्णस्य पापसंघातपञ्जरम् ॥
शतधा भेदमायाति गिरिर्वज्रहतो यथा ॥ इत्यादि वचनेभ्यः ॥ १०९ ॥

कर्म्म रौद्रं रागश्च रौद्रः कोपश्च रौद्रः यस्य रौद्रत्रयं नास्तीति अरौद्रः। अवाप्तसर्व्वकामत्वेन रागद्वेषादयो न सन्तीति अरौद्रः। शेषरूपभाक् कुण्डली। सहस्रांशुमण्डलोपमकुण्डलधारणाद्वा। यद्वा साङ्ख्ययोगात्मके मकराकारे कुण्डले अस्य स्त इति कुण्डली। समस्तलोकरक्षार्थं समायया मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रं धत्त इति चक्री।

चलस्वरूपमत्यन्तं जवेनान्तरितानिलम्। चक्रस्वरूपं च मनो धत्ते विष्णुः करे स्थितम् ॥

इति विष्णुपुराणे। विक्रमः पादविक्षेपः शौर्य्यं वा द्वयं चाशेषपुरुषेभ्यो विलक्षणमस्य इति विक्रमी। श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति ऊर्जितशासनः।

श्रुतिस्मृती ममैवाज्ञे यस्तु उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥

इति भगवद्वचनात्। शब्दप्रवृत्तिहेतूनां जात्यादीनामसम्भवात् शब्देन वक्तुमशक्यत्वात् शब्दातिगः। 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह'। 'न शब्दगोचरे यस्य योगिध्येयं परं पदम्' ॥ इत्यादि श्रुतिस्मृतिभ्यः। तमेव सर्व्वे वेदास्तात्पर्य्येण वदन्तीति शब्दसहः। 'सर्व्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्व्वैरहमेव वेद्यः' इति श्रुतिस्मृतिभ्याम्। तापत्रयाभितप्तानां विश्राम-

* वडवानलस्य इत्यपि क्वचित्।

Downloaded from https://www.holybooks.com

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्त्तनः ॥९१५-९२२॥१११॥
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः।

स्थानत्वात् शिशिरः। संसारिणाम् आत्मा अविद्यायोगात् शर्व्वरीव शर्व्वरी। ज्ञानिनां पुनः संसारः शर्व्वरी तामुभयेषां करोतीति शर्व्वरीकरः।

या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥

इति भगवद्वचनात्॥ ११०॥

क्रौर्य्यं नाम मनसो मत्सरधर्म्मः कोपजः आन्तरः सन्तापः साभिनिवेशः। अवाप्तसर्व्वकामत्वात् कामाभावादेव कोपाभावः। तस्मादस्य क्रौर्य्यं नास्तीति अक्रूरः। कर्म्मणा मनसा वाचा वपुषा च शोभनत्वात् पेशलः। प्रवृद्धः शक्तः शीघ्रकारी च दक्षः। त्रयञ्चैतत्परस्मिन्नियतम् इति दक्षः। दक्षिणशब्दस्यापि दक्ष शब्दार्थः पुनरुक्तिदोषो नास्ति शब्दभेदात्। अथवा दक्षते गच्छति हिनस्तीति वा दक्षिणः। 'दक्ष गतिहिंसनयोः' इति धातुपाठात्। क्षमावतां योगिनां पृथिव्यादीनां भारधारकाणाञ्च श्रेष्ठ इति क्षमिणां वरः। 'क्षमया पृथिवीसमः' इति वाल्मीकिवचनात्। ब्रह्माण्डमखिलं वहन् पृथिवीव भारेण नार्द्दित इति पृथिव्या अपि वरः। क्षमिणः शक्ताः अयन्तु सर्व्वशक्तिमत्त्वात् सकलाः क्रियाः कर्त्तुं क्षमत इति वा क्षमिणां वरः। निरस्तातिशयं ज्ञानं सर्व्वदा सर्व्वगोचरम् अस्य एवास्ति नान्येषामिति विद्वत्तमः। वीतं विगतं भयं सांसारिकं संसारलक्षणं चास्य वीतभयः। सर्व्वेश्वरत्वान्नित्यमुक्तत्वाच्च। पुण्यं पुण्यकरं श्रवणं कीर्त्तनञ्चास्येति पुण्यश्रवणकीर्त्तनः।

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत्। नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः॥

इति श्रवणादि फलवचनात्॥ १११॥

संसारसागरादुत्तारयतीति उत्तारणः। दुष्कृतीः पापानि दुष्कृतिनः पापकारिणः तान् हन्ति इति दुष्कृतिहा। स्मरणादि कुर्व्वतां पुण्यं करोतीति पुण्यः। सर्व्वेषां श्रुतिस्मृतिलक्षणया वाचा पुण्यमाचष्ट इति वा पुण्यः। भाविनोऽनर्थस्य सूचकान् अशुभान् स्वप्नान् नाशयतीति ध्यातः स्तुतः कीर्त्तितः पूजितश्चेति दुःस्वप्ननाशनः। विविधाः संसारिणाम् ईरान् गतीः मुक्तिप्रदानेन हन्तीति वीरहा। सत्त्वं गुणमधिष्ठाय जगत्त्रयं रक्षतीति रक्षणः। नन्द्यादित्वा कर्त्तरि ल्युट्।

सन्मार्गवर्त्तिनः सन्तः पञ्चयज्ञाः प्रकीर्त्तिताः। द्वाविंशतिस्तथा चाष्टौ संसारः परिकीर्त्तितः।
तद्युक्तोऽपि न मोक्षाय यस्त्वात्मगुणवर्ज्जितः। जिह्वोपस्थनिमित्तं हि पतनं सर्व्वदेहिनाम्॥
तस्मादमित्रवत् कुर्य्यात् जिह्वोपस्थस्य नित्यशः। सुवर्णरौप्यपात्रेषु ताम्रकांश्यायसेऽपि च॥

Downloaded from https://www.holybooks.com

**वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः ॥९२३-९३१॥११२॥**

**अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।**

**चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥९३२-९४०॥११३॥**

भिक्षां दत्त्वा न धर्म्मोऽस्य गृहीत्वा नरकं व्रजेत् । हिरण्यं रजतं पात्रं यतेर्यस्य परिग्रहः ॥
तादृशं कश्मलं दृष्ट्वा सचेलो जलमाविशेत् । तुषगोमयगोमूत्रलवणभस्मास्थि चार्थवत् ॥
प्रवृत्तानां निवृत्तानां स्कन्धे तु भुवनं वनम् । यन्निमित्तं भवेच्छोकः त्रासो वा क्रोध एव वा ।
आयासो वा यतो मूलमेकाङ्गमपि तत् त्यज । त्यज धर्म्ममधर्म्मञ्च तथा सत्यानृते त्यज ॥
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत् त्यज ॥

योषिद्धिरण्याभरणादिरत्नं दूरेषु मायारचितेष्वमूढः ।

प्रलोभितात्माभ्युपभोगवह्ना पतङ्गवन्नश्यति नष्टदृष्टिः ॥

अहङ्करोमि यद् ब्रूते प्रसुप्तं यत् प्रबोधयेत् । उत्थिते परमानन्दे न त्वं नाहं न वै जगत् ॥
सुवर्णं यतये दत्त्वा ताम्बूलं ब्रह्मचारिणे । चौराय चाहुतं दत्त्वा दाता च नरकं व्रजेत् ॥
अन्नदानपरो भिक्षुश्चत्वारो घ्नन्ति दानतः । प्रतारयन्ननात्मानं यत्ने चान्नं प्रयच्छति ॥
अष्टावनुगुणान् प्रोक्तान् पुरोनितान्निबोधत । असूयति यथा लोके शौचमन्तर्बहिर्द्विज ॥
अनायासस्त्वकार्य्येषु मङ्गल्याचारसेवनम् । परद्रव्येष्वकार्पण्यमर्थेषूपार्ज्जितेषु च ॥
तथाऽस्पृहा परस्त्रीषु परार्थेषु च सर्व्वदा । अयमेव क्रियायोगो ज्ञानयोगस्य साधकः ।
धर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते । श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठेत् प्रयत्नतः ॥
कण्डली-पेशली-चुल्ली-जलकुम्भाप्रमार्ज्जनात् । पञ्चसूना गृहस्थस्य तेन स्वर्गं न गच्छति ॥
तत्पापं नाशयामीति मुञ्च मुञ्चेति भण्यताम् । उभयोः पतनं दृष्ट्वा मौनं सर्व्वार्थसाधकम् ॥
शुद्धं भागवतस्यार्थं शुद्धं भागीरथीजलम् । शुद्धं विष्णुपरं चित्तं शुद्धमेकादशीव्रतम् ॥
उलूकजिह्वा पृथिवी न देवग्रहभूषिता । भवित्रीप्रायशो ब्रह्मन् मयि शुद्धत्वमागते ॥
स्वाध्यायिषु च सीदन्ति शौचधर्म्मविवर्ज्जितः । अन्य-प्रतिग्रहादानं करिष्यन्त्यल्पमेधसः ॥ इति ।

एतद्रूपेण विद्याविनयवृद्धये समवर्त्तत इति सन्तः । सर्व्वान् प्राणरूपेण जीवयन् जीवनः । परि सर्व्वतो विश्वं व्याप्य स्थित इति पर्य्यवस्थितः ॥११२॥

अनन्तादिरूपेण विश्वप्रपञ्चरूपेण स्थितश्चेति अनन्तरूपः । अनन्ता अपरिमिता श्रीः पराशक्तिरस्येति अनन्तश्रीः । 'पराऽस्य शक्तिर्व्विविधैव श्रूयते' इति श्रुतेः । मन्युः कोपो जितो येन स जितमन्युः । भयं संसारजं पुंसाम् अपघ्नन् भयापहः । न्यायसमवेतः चतुरस्रः पुंसां कर्म्मानुरूपं फलं प्रयच्छतीति । आत्मा स्वरूपं चित्तं वा गभीरं परिच्छेत्तुमशक्यमस्येति गभी-

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



**अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।**
**जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥९४१-९४९॥११४॥**
**आधारनिलयोऽधाता पुष्पहासः प्रजागरः।**
**ऊर्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥९५०-९५८॥११५॥**
**प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः।**
**तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ९५९-९६५॥११६॥**

त्मा। विविधानि फलान्यधिकारिभ्यो विशेषेण दिशन् विदिशः। विविधामाज्ञां शक्रादीनां दिशन् व्यादिशः। समस्तानां कर्म्मणां फलानि दिशन् स वेदात्मना इति दिशः ॥११३॥

आदिः कारणमस्य न विद्यत इति अनादिः। सर्व्वकारणत्वात्। भूराधारः भुवः सर्व्वभूताश्रयत्वेन प्रसिद्धाया भूम्या भुवोऽपि भूरिति भूर्भुवः। अथवा न केवलमसौ भूर्भुवः अपितु लक्ष्मीः शोभा चेति भुवो लक्ष्मीः। अथवा भूः भूर्लोकः भुवो भुवर्लोकः लक्ष्मीः आत्मविद्या 'आत्मविद्या च देवि त्वम्' इति श्रीस्तुतौ। भूम्यन्तरीक्षयोः शोभेति वा भूर्भुवो लक्ष्मीः। शोभना विविधा ईरा गतयोऽस्येति सुवीरः। शोभनं विविधमीरणमस्येति वा सुवीरः। रुचिरे कल्याणे अङ्गदे अस्येति रुचिराङ्गदः। जन्तून् जनयन् जननः। ल्युड्विधौ बहुलग्रहणात् कर्त्तरि ल्युट्प्रत्ययः। प्रयोगवचनादिवत्। जनस्य जनिमतो जन्मन उद्भवस्यादिः जनजन्मादिः। 'मूलं कारणम्' इति मन्त्रवर्णात्। असुरादीनां भयहेतुत्वात् भीमः। 'महद्भयं वज्रमुद्यतम्' इति श्रुतेः। भीमः पराक्रमोऽस्यावतारेष्विति भीमपराक्रमः ॥११४॥

पृथिव्यादीनां पञ्चभूतानामाधरभूतानामाधारत्वात् आधारनिलयः। आत्मना धृतस्याऽन्यो धाता नास्तीति अधाता। 'न वृतश्च' इति समासान्तविधेरनित्यत्वात् कप्रत्ययाभावः। संहारसमये सर्व्वाः प्रजा धयति पिवतीति वा धाता। धेट्पाने इति धातुः। मुद्रणावस्थितानां पुष्पाणां हासवत् प्रपञ्चरूपेण विकासोऽस्येति पुष्पहासः। नित्यप्रवुद्धस्वभावत्वात् प्रकर्षेण जागर्त्ति प्रजागरः। सर्व्वेषामुपरि तिष्ठन् ऊर्द्ध्वगः। सतां कर्म्माणि सत्पथास्तान् आचरत्येष इति सत्पथाचारः। मृतान् जीवयन् परीक्षित् प्रभृतीनिति प्राणदः। प्रणवो नाम परमात्मनो वाचकः ॐकारः। तदभेदोपचारात् प्रणवः। पणतिः व्यवहारार्थः तं कुर्व्वन् पणः। 'सर्व्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते' इति श्रुतिः। पुण्यानि कर्म्माणि पणः तं संगृह्याऽधिकारिभ्यस्तत्फलं प्रयच्छतीति लक्षणया वा पण इति ॥११५

प्रमितिः सम्वित् स्वयंप्रभा प्रमाणम्। 'प्रज्ञानं ब्रह्म' इति श्रुतेः।
ज्ञानस्वरूपमत्यन्तनिर्म्मलं परमार्थतः। तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्।

भूर्भुवः स्वस्तरुस्तारः स पिता प्रपितामहः।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥९६६-९७५॥११७॥

इति श्रीविष्णुपुराणे। प्राणा इन्द्रियाणि यत्र जीवे निलीयन्ते तत्परतन्त्रत्वात् देहस्य धारकाः प्राणापानादयो वा तस्मिन् निलीयन्ते प्राणितीति प्राणो जीवः परे पुंसि निलीयत इति वा प्राणनिलयः। प्राणान् जीवांश्च संहरन्निति वा प्राणनिलयः। पोषयन्नन्नरूपेण प्राणानिति प्राणभृत्। प्राणिनो जीवयन् प्राणाख्यैः पवनैरिति प्राणजीवनः।

न प्राणेन नाऽपानेन मर्त्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ॥

इति मन्त्रवर्णात्। तत्त्वं तथ्यमनृतम् सत्यम् परमार्थः सतत्त्वमित्येते एकार्थवाचिनः। परमार्थसतो ब्रह्मणो वाचकाः एते शब्दाः। तत्त्वं स्वरूपं यथावद्वेत्तीति तत्त्ववित्। एकश्चासावात्मा चेति एकात्मा। 'आत्मा वा इदमेक एवाग्र आसीत्' इति श्रुतेः।

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते॥

इति स्मृतेः। 'जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते विनश्यति' इति षड्भावविकारान् अतीत्य गच्छतीति जन्ममृत्युजरातिगः। 'न जायते म्रियते वा विपश्चित्' इति मन्त्रवर्णात्॥ ११६॥

भूर्भुवःस्वःसमाख्यानि त्रीणि व्याहृतिरूपाणि च शुक्राणि त्रयीसाराणि बह्वृचा आहुः। तैर्होमादिना जगत्त्रयं तरति प्लवते चेति भूर्भुवःस्वस्तरुः।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥

इति मनुवचनात्। अथवा भूर्भुवःस्वःसमाख्यलोकत्रयसंसारवृक्षो भूर्भुवः स्वस्तरुः। भूर्भुवः स्वराख्यं लोकत्रयं वृक्षवद्व्याप्य तिष्ठतीति वा भूर्भुवःस्वस्तरुः। संसारसागरं तारयतीति तारः प्रणवो वा। सर्व्वस्य लोकस्य जनक इति स पिता। पितामहस्यापि ब्रह्मणोऽपि पिता प्रपितामहः। सङ्गन्ता सत्कृतो वा यज्ञः। यज्ञानां पाता स्वामी वा यज्ञपतिः। 'अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च' इति भवद्वचनात्। यजमानात्मना यजन् यज्वा। यज्ञा अङ्गान्यस्येति यज्ञाङ्गो वराहमूर्त्तिः।

वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः। अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः॥
अहोरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः। आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान्॥
धर्म्मसत्यमयः श्रीमान् क्रमविक्रमसत्क्रियः। प्रायश्चित्तनखो घोरः पशुजानुर्महाभुजः॥
उद्गात्रन्त्रो होमलिङ्गः फलबीजमहौषधिः। वाह्यान्तरात्मा मन्त्रस्फिग् विकृतः सोमशोणितः॥
वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान्। प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरर्च्चितः॥
दक्षिणाहृदयो योगी महासत्त्वमयो महान्। उपाकर्म्मोष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः॥

Downloaded from https://www.holybooks.com

**यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः।**
**यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ॥९७६-९८४॥११८॥**
**आत्मयोनिः स्वयंजातो वैखानः सामगायनः।**
**देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥९८४-९९२॥११९॥**
**शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।**

नानाछन्दोगतिपथो गुह्योपनिषदासनः। छायापत्नीसहायो वै मेरुशृङ्ग इवोच्छ्रितः॥ इति श्रीहरिवंशे। फलहेतुभूतान् यज्ञान् वाहयतीति यज्ञवाहनः ॥११७॥

यज्ञं विभर्त्ति पातीति च यज्ञभृत्। जगदादौ तदन्ते च यज्ञं करोति कृन्तति इति वा यज्ञकृत्। यज्ञानां तत्समाराधनात्मनां शेषीति यज्ञी। यज्ञं भुङ्क्ते भुनक्तीति वा यज्ञभुक्। यज्ञाः साधनं तत्प्राप्ताविति यज्ञसाधनः। यज्ञस्यान्तं फलप्राप्तिं कुर्व्वन् यज्ञान्तकृत्। वैष्णवी-ऋक्शंसनेन पूर्णाहुत्या पूर्णं कृत्वा यज्ञसमाप्तिं करोतीति वा यज्ञान्तकृत्। यज्ञानां गुह्यं ज्ञानयज्ञः फलाभिसन्धिरहितो वा यज्ञः तदभेदोपचारात् ब्रह्म यज्ञगुह्यम्। अद्यते अत्तीति च भूतानीति अन्नम्। अन्नमत्तीति अन्नादः। सर्व्वं जगदन्नादिरूपेण * अग्नीषोमात्मकमेवेति दर्शयितुमेवकारः। च-शब्दः समस्तनाम्नामेकस्मिन् पुंसि समुच्चित्य वृत्तिं दर्शयितुम् ॥११८

आत्मैव योनिरुपादानकारणं नान्यदिति आत्मयोनिः। निमित्तकारणमपि स एवेति दर्शयति स्वयंजात इति। 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यत्र स्थापितमुभयकारणत्वं हरेः। विशेषेण खननात् वैखानः। धरणीं विशेषेण खनित्वा पातालवासिनं हिरण्याक्षं देवशत्रुं महावराहरूपमास्थाय जघानेति पुराणप्रसिद्धम्। सामानि गायतीति सामगायनः। देवक्याः सुतो देवकीनन्दनः।

ज्योतींषि शुक्लानि च यानि लोके त्रयो लोका लोकपालास्त्रयी च।
त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्व्वे † वेदा देवकीपुत्र एव॥ इति महाभारते।

यतः स्रष्टा सर्व्वलोकस्यातः स्रष्टेति। क्षितेर्भुमेरीशः क्षितीशो दशरथात्मजः। कीर्त्तितः पूजितो ध्यातः संस्मृतः पापराशिं नाशयतीति पापनाशनः।

पक्षोपवासाद्यत् पापं पुरुषस्य प्रणश्यति। प्राणायामशतेनैव यत् पापं नश्यते नृणाम्॥
प्राणायामसहस्रेण यत्पापं नश्यते नृणाम्। क्षणमात्रेण तत्पापं हरेर्ध्यानात् प्रणश्यति॥
इति वृद्धशातातपे ॥११९॥

पाञ्चजन्याख्यं भूताद्यहङ्कारात्मकं शङ्खं विभर्त्तीति शङ्खभृत्। विद्यामयो नन्दकाख्यः असिरस्येति नन्दकी। मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रमस्यास्तीति चक्री। संसारचक्रमस्या-

* भोक्तृभोग्यात्मकमेवेति वा क्वचित्। † देवा इत्यपि क्वचित्।



Downloaded from https://www.holybooks.com

**रथाङ्गपाणिरक्षोभ्यः सर्व्वप्रहरणायुधः ॥**

**सर्व्वप्रहरणायुधः ॐ नमः ॥९९३-१०००॥१२०॥**

**इतीदं कीर्त्तनीयस्य केशवस्य महात्मनः ।**

**नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्त्तितम् ॥ १२१ ॥**

त्रया परिवर्त्तते इति वा चक्री । इन्द्रियाद्यहङ्कारात्मकं शार्ङ्गं नाम धनुरस्यास्तीति शार्ङ्गधन्वा । 'धनुषश्च' इत्यनङ् समासान्तः। बुद्धितत्त्वात्मिकां कौमोदकीं नाम गदां वहन् गदाधरः । रथाङ्गं चक्रमस्य पाणौ स्थितमिति रथाङ्गपाणिः । अतएवाशक्यक्षोभस्य इति अक्षोभ्यः । न केवलम् एतावन्त्यायुधान्यस्येति न नियम्यते अपितु सर्व्वाण्येव प्रहरणान्यायुधान्यस्येति सर्व्वप्रहरणायुधः । आयुधत्वेन अप्रसिद्धान्यपि * कवचादीन्यायुधानि भवन्तीति । अन्ते सर्व्वप्रहरणायुध इति वचनं सत्यसङ्कल्पत्वेन सर्व्वेश्वरत्वं दर्शयितुमिव । 'एष सर्व्वेश्वरः' इति श्रुतिः । सर्व्वप्रहरणायुधः इति द्विर्वचनं समाप्तिं द्योतयति ।

ॐकारश्च मङ्गलार्थः ।

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥

इति वचनात् । अन्ते नम इत्युक्त्वा परिचरणं कृतवान् । 'भूयिष्ठां ते नमउक्तिं विधेम' इति मन्त्रवर्णात् ।

धन्यं तदेव लग्नं तन्नक्षत्रं तदेव पुण्यमहः । करणस्य च सा सिद्धिर्यत्र हरिः प्राङ्नमस्क्रियते ॥

इति च । प्रागित्युपलक्षणम् । अन्तेऽपि नमस्कारस्य शिष्टैराचरणात् । फलं प्रागेव दर्शितम् ।

एकोऽपि कृष्णे तु सकृत्प्रणामो दशाश्वमेधी न च याति तुल्यम् ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥

अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न तेषां विद्यते जनुः ॥

लोकत्रयाधिपतिमप्रतिमप्रभावमीषत् प्रणम्य शिरसा प्रभविष्णुमीशम् ।
जन्मान्तरप्रलयकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम् ॥ इति ॥

भूरिवचनाद्विष्णोर्नमस्कारः सर्व्वकर्म्मसु विधेयः । अतएवास्य सहस्रनाम स्तवपाठस्याद्यन्ते विष्णुर्नमस्य इति प्रतीयते । स्तवादीनामाद्यन्ते ओङ्कारमुच्चारणस्यावश्यकत्वेऽस्य सहस्रनाम्नः प्रागन्तेऽपि ओङ्कारः प्रयोक्तव्य इति ॥१२०

इतीदमित्यनेन नामसहस्रन्यूनातिरिक्तमिति दर्शयति । महान् सृष्टिस्थितिलयकरणसमर्थ आत्मा यस्येति तस्य केशवस्य कीर्त्तनीयस्य 'सर्व्वे पापा विनश्यन्ति श्रीहरेर्नामकीर्त्तनात्' इति वचनात् गीयमानस्य विष्णोः इदं विश्वादिसर्व्वप्रहरणायुधान्तं दिव्याना-

* कवचेत्यत्र करजेत्यपि क्वचित् ।

Downloaded from https://www.holybooks.com

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत् ।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ॥१२२॥
वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ १२३ ॥

मप्राकृतानां नाम्नां सहस्रं प्रकीर्त्तितमिति वदता प्रकारान्तरेणापि संख्योपपत्तिः दर्शिता। प्रक्रमे 'किं जपन्मुच्यते जन्तुः' इति जपशब्दोपादनात् कीर्त्तयेदित्यनेनापि त्रिविधो जप उच्चोपांशुमानसभेदेन लक्ष्यते ॥१२१

यः कश्चित् इदं नामसहस्रं प्रतिदिनं शृणुयादाकर्णयेत् यश्चापि परिकीर्त्तयेत् विष्णुनामानुकीर्त्तनं कुर्य्यात् सोऽपि मानवो नरः अमुत्र परकाले इह आधुनिके किञ्चिदशुभमङ्गलं न प्राप्नुयात्। परलोकप्राप्तस्यापि ययातिनहुषादिवदशुभप्राप्त्यभावं सूचयितुम् अमुत्र इत्युक्तम् ॥१२२॥

वेदान्तानामुपनिषदाम् अर्थं प्रतिपाद्यं ब्रह्म गच्छति अवगच्छतीति वेदान्तगः। 'किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्' इति वचनात् जपकर्म्मणा साक्षान्मुक्तिशङ्कायाम् कर्म्मणां साक्षान्मुक्तिहेतुत्वं नास्ति ज्ञानेनैव मोक्ष इति दर्शयितुं वेदान्तगो ब्राह्मणः स्यादित्युक्तम्। कर्म्मणा त्वन्तःकरणशुद्धिद्वारेण ज्ञानमुत्पद्यते।

कषायपक्तिः कर्म्माणि ज्ञानन्तु परमा गतिः। कषाये कर्म्मभिः क्षीणे ततो ज्ञानं प्रवर्त्तते ॥
नित्यं ज्ञानं समासाद्य नरो बन्धात् प्रमुच्यते। धर्म्मात् सुखञ्च ज्ञानञ्च ज्ञानान्मोक्षोऽधिगम्यते ॥
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये। कर्म्मणा बध्यते जन्तुर्विद्ययैव विमुच्यते ॥
तस्मात् कर्म्म न कुर्व्वन्ति यतयः पारदर्शिनः। यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः ॥
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्। तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः। यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥

इत्यादि स्मृतिभ्यः। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन'। 'येन केन च यजेतापि वा दर्विहोमेनानुपहतमना एव भवति' इत्यादिश्रुतिभ्यश्च। ज्ञानादेव मोक्षो भवति। 'ज्ञानादेव तु कैवल्यं प्राप्यते तेन मुच्यते'। 'ब्रह्मविदाप्नोति परम्'। 'तरति शोकमात्मवित्'। 'ब्रह्म वेद ब्रह्मैव भवति'। 'ब्रह्मैव सन् ब्रह्माप्येति'। 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनाय'। 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'। 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन् महती विनष्टिः'।
'यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति' ॥

Downloaded from https://www.holybooks.com

धर्म्मार्थी प्राप्नुयाद्धर्म्ममर्थार्थी चार्थमाप्नुयात्।
कामानवाप्नुयात् कामी प्रजार्थी प्राप्नुयात् प्रजाः॥ १२४ ॥
भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्त्तयेत्॥ १२५ ॥
यशः प्राप्नोति विपुलं * ज्ञातिप्राधान्यमेव च।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्॥ १२६ ॥
न भयं क्वचिदाप्नोति वीर्य्यं तेजश्च विन्दति।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः॥ १२७ ॥

'न कर्म्मणा न पूजया न धनेन त्यागेनैकेनामृतत्वमानशुः'। 'वेदान्तविज्ञानविनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः'। 'ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्व्वे'॥ इत्यादि श्रुतिभ्यः। शूद्रः सुखमवाप्नुयात् श्रवणेनैव नतु जपयज्ञेन। 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति श्रुतेः। 'श्रावयेच्चतुरो वेदान् कृत्वा ब्राह्मणमग्रतः' इति महाभारते श्रवणमनुज्ञायते। 'सुगतिमियात् श्रवणाच्च शूद्रयोनिः' इति हरिवंशे। यः शूद्रः शृणुयात् स सुखमाप्नुयात् इति व्यवहितेन संबन्धः। त्रैवर्णिकानां कीर्त्तयेदित्यनेन॥ १२३ ॥

धर्म्मार्थी नाम्नामेतत् सहस्रं पठित्वा धर्म्मं प्राप्नुयात्। एवमर्थार्थी अर्थं कामार्थी अभिलषितान् कामान् प्रजार्थी प्रजाः सन्ततीः प्राप्नुयादित्यर्थः। चक्षुरादीनामात्मयुक्तेन मनसाऽधिष्ठितानां स्वेषु स्वेषु विषयेषु आनुकूल्यात् प्रवृत्तिः कामः। ऐहिकामुष्मिकोभयफललाभ एव स्तवस्यास्य पाठाद्भविष्यतीति॥ १२४ ॥

भक्तिमानित्यादिना भक्तिमतः शुचेः सततमुद्यमयुक्तस्य एकाग्रचित्तस्य श्रद्धालोः विशिष्टाधिकारिणः फलविशेषं दर्शयति। सदोत्थाय सततमुद्यम्य। तद्गतमानसः तस्मिन् वासुदेवे गतं समर्पितं मानसं येन स तथोक्तः। प्रकीर्त्तयेत् पठेत्॥ १२५ ॥

सहस्रनामस्तोत्रपाठस्यैहिकं फलं दर्शयति यश इति। विपुलमतिव्याप्तं यशः कीर्त्तिम्। ज्ञातिप्रधान्यं शौर्य्यवीर्य्यसम्पद्भिः स्वगोष्ठीनामग्रणीर्भविष्यतीति। अचलां श्रियं स्थिरलक्ष्मीम्। पारत्रिकफलञ्च अनुत्तमं श्रेयः परमपदप्राप्तिर्मोक्षलाभः स्यादिति॥ १२६ ॥

सहस्रनामाख्यस्तोत्रपाठस्य फलान्तरं दर्शयति न भयमिति। सर्व्वत्राकुतोभयः सञ्चर-

* यातिप्राधान्यमित्यपि क्वचित्।

Downloaded from https://www.holybooks.com

रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येताऽऽपन्न आपदः ॥ १२८ ॥
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ १२९ ॥
वासुदेवाश्रयो मर्त्त्यो वासुदेवपरायणः ।
सर्व्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १३० ॥
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ १३१ ॥
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्ति श्रीधृतिस्मृतिकीर्त्तिभिः ॥ १३२ ॥

तीति भावः । वीर्य्यं बलाधिक्यं तेजः ब्रह्मप्रजा - विन्दति लभते । यावज्जीवमरोगी भवेत् । द्युतिमान् कान्तिशाली । बलरूपगुणान्वितः बलञ्च रूपञ्च गुणाश्च तैः समन्वितः सम्पन्नः सन् चिरं जीवतीति भावः ॥ १२७ ॥

रोगार्त्तः पीड़ाभिभूतः रोगात् परिमुक्तो भवति । बद्धः कारागारनिरुद्धः कारामुक्तो भवेत् । भीतः भयपीड़ितः भयात् परिमोचितो भवति । आपन्नः विपद्ग्रस्तः राजोपद्रवादिना अभिभूत इति यावत् । आपदः विपत्तेः परित्रातो भवेदिति ॥ १२८ ॥

आशु झटिति दुर्गाणि सङ्कटानतितरति अतिक्रामेत् । सः पुरुषः यः स्तवपाठद्वारा विष्णुमुपास्ते । पुरुषोत्तमम् सर्व्वपुरुषप्रधानम् । प्रतिदिनं भक्तियुक्तः सहस्रनामपाठेन स्तुवन्नेव पूर्व्वोक्तमैहिकामुष्मिकं फलं विन्दतीति भावः ॥ १२९ ॥

मर्त्त्यो मानवः यो वासुदेवाश्रयः वासुदेवं विष्णुं समाश्रयति एकाग्रचित्तेन भजते स तथोक्तः । वासुदेवपरायणः एकान्तकृष्णगतचित्तः । सर्व्वपापविशुद्धात्मा सर्व्वेभ्यः पापेभ्यः विशुद्धः परित्रात आत्मा येन सः । सनातनं ब्रह्म याति मोक्षं प्राप्नोति ॥ १३० ॥

स्तवस्यास्य पाठात् साधननैर्व्विघ्नं भवतीति सूचितुमाह नेति । वासुदेवभक्तानां कदाचिदपि अशुभं न भवति सर्व्वत्रैव तेषां विघ्नाभावः सञ्जायते । अकुतोभयाः सन्तः सर्व्वत्र सञ्चरन्तीति भावः । जन्मादिभ्यश्चतुर्भ्योऽपि तेषां भयं नास्ति । वासुदेवोपासनया मोक्षस्यावश्यम्भावित्वात् तस्य जठरयातना मरणक्लेशः जराजनितदुःखं रोगोपतापश्च सर्व्वथैवाऽसम्भव इति भावः ॥१३१॥

इमं स्तवमिति । अधीयानः पठन् । श्रद्धा आस्तिक्यबुद्धिः । भक्तिः भजनतात्पर्य्यम् ।

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com



नक्रोधो न च मात्सर्य्यं नलोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १३३ ॥
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्य्येण विधृतानि महात्मनः ॥ १३४ ॥
ससुरासुरगन्धर्व्वं सयक्षोरगराक्षसम् ।
जगद्वशेऽवर्त्ततेदं कृष्णस्य सचराचरम् ॥ १३५ ॥
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजोबलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च १३६ ॥

आत्मनः सुखम् आत्मसुखम् । तेन च क्षान्त्यादिभिश्च युज्यते । श्रद्धाभक्तिपुरःसरमस्य स्तवस्य पाठादेव साधकस्य क्षान्तिप्रभृतयो गुणा आविर्भूयन्ते ॥ १३२ ॥

पुरुषोत्तमे विष्णौ भक्तानां न्यस्तचित्तानाम् अतएव कृतपुण्यानाम् । पुरुषोत्तमभजनात् सम्यगधिकं पुण्यमस्तीत्यर्थः । सिंहभिया करीव विष्णुभजनभयात् क्रोधादिः पलायते । क्रोधः कोपः । मात्सर्य्यं मत्तता । अशुभा मतिः पापाचरणानुरागः । नक्रोधः नलोभः नाशुभा मतिः इति अकारानुबन्धरहितेन नकारेण समस्तं पदत्रयम् ।
नक्रोधो न च मात्सर्य्यं नलोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां श्रीसूक्तं सततं जपेत् ॥
इति श्रुतिः । क्रोधादयो न भवन्ति मात्सर्य्यं च न भवतीत्यर्थः ॥ १३३ ॥

द्यौः सचन्द्रार्कनक्षत्रा इत्यादिना स्तुत्यस्य वासुदेवस्य माहात्म्यकथनेनोक्तानां फलानां प्रतिवचनं यथार्थकथनं नानुवाद इति दर्शयति त्रिभिः श्लोकैः । महात्मनो वासुदेवस्य वीर्य्येण बलवत्तया द्यौः स्वर्गं सचन्द्रार्कनक्षत्रा चन्द्रसूर्य्यग्रहगण समेता । खमाकाशम् । दिशः पूर्व्वादयः स्वनामप्रसिद्धाः । भूर्धरित्री महोदधिः महासागरः । एतानि द्यौरादीनि विधृतानि स्वस्वकक्षोपरि स्थापितानीत्यर्थः ॥ १३४ ॥

इदं सचराचरं सस्थावरजङ्गमं ससुरासुरगन्धर्व्वं देवदानवगन्धर्व्वसमन्वितम् । सयक्षोरगराक्षसम् यक्षो देवयोनिविशेषः उरगो नागलोकः राक्षसः स्वनामप्रसिद्धो जीवविशेषः एतैः सहितम् इदं जगत् कृष्णस्य वशे अवर्त्तत । सर्व्वमेव ब्रह्माण्डं कृष्णवशीभूतमिति भावः ॥१३५॥

इन्द्रियाणि वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाणि चक्षुःकर्णनासिकाजिह्वात्वचो ज्ञानेन्द्रियाणि । सत्त्वं शौर्य्यम् । तेजः प्रभा । बलं सामर्थ्यम् । धृतिः धैर्य्यम् । क्षेत्रं शरीरम् । क्षेत्रज्ञो जीवः । एतानि सर्व्वाणि वासुदेवात्मकानि वासुदेवो विष्णुरात्मा प्रवर्त्तको येषां तानि । आहुः कथयन्ति तत्त्वज्ञा इति शेषः ॥ १३६ ॥

Downloaded from https://www.holybooks.com



सर्व्वागमानामाचारः प्रथमं परिकल्पते।
आचारप्रभवो धर्म्मो धर्म्मस्य प्रभुरच्युतः॥ १३७॥
ऋषयः पितरो देवा महाभूतानि धातवः।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् १३८॥
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादिकर्म्म च।
वेदाः शास्त्राणि विज्ञानमेतत् सर्व्वं जनार्द्दनात्॥ १३९॥
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः।
त्रींल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥ १४०॥
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्त्तितम्।

सर्व्वागमानामाचारः इत्यनेनावान्तरवाक्येन सर्व्वधर्म्माणामाचारवत एवाधिकार इति दर्शयति। सर्व्वेषामागमानाम् आचारः स्नानसन्ध्यावन्दनादिः। प्रथमं पूर्व्वमेव। आचारः पूर्व्वकर्त्तव्यतया परिकल्पते निर्द्दिश्यते। आचार एव धर्म्मस्य प्रभवः कारणम्। अच्युतो विष्णुः धर्म्मस्य प्रभुः सर्व्वाध्यक्षः। धर्म्मात् परत्र यत् श्रेयो भविष्यति अच्युत एव तस्य विधातेति भावः॥१३७॥

भगवतो जगद्गुरुत्वं दर्शयितुमाह ऋषय इति। ऋषयः राजर्षयो महर्षयश्च। पितरः पितृलोकाः। देवा इन्द्रादयः। महाभूतानि पृथिव्यादीनि पञ्च। धातवः सुवर्णादीनि। जङ्गमा गमनशीला अजङ्गमाः स्थावराः पर्व्वतादयः एतत् जङ्गमाजङ्गमं जगत् सर्व्वमेव नारायणोद्भवं नारायणात् प्रभवतीत्यर्थः॥ १३८॥

योगः शमदमाद्यष्टाङ्गयोगः। ज्ञानं योगसाध्यो बोधः। सांख्यं चिदचिद्विवेचनम्। विद्याः चतुर्द्दशविद्याः।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश॥

इति स्मृतेः। शिल्पादिकर्म्म शिल्पं विज्ञानशास्त्रम्। वेदाः आयुर्व्वेद-धनुर्व्वेद-गन्धर्व्ववेदाः। शास्त्राणि स्मृत्यादि धर्म्मप्रवचनानि। विज्ञानं शास्त्रार्थावबोधः। एतत् सर्व्वं जनार्द्दनात् विष्णोराविर्भूतमिति शेषः॥ १३९॥

हरेर्विश्वव्याप्तिमाह एक इति। एक एव विष्णुः महद्भूतं अनेकशः पृथग्भूतानि व्यस्तानि। त्रीन् लोकान् स्वर्गभूरसातलानि व्याप्य विशेषेणाधिष्ठाय भुङ्क्ते। अतएव स विश्वभुक् भूतात्मा सर्व्वभूतस्वरूपः अव्ययः सनातनः। सर्व्वमेव जगत्तस्यैव विभूतिरिति॥ १४०॥

इमं स्तवम् इत्यादिना सहस्रशाखाज्ञानेन सर्व्वज्ञेन भगवता कृष्णद्वैपायनेन साक्षान्नारा-

पठेद् य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१४१॥
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१४२॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामानुशासनिके धर्म्मोत्तरे श्रीविष्णोर्दिव्यसहस्रनाम स्तोत्रं समाप्तम्।

यत्नेन ज्ञातमिति सर्व्वैरेव अर्थिभिः सादरं पठितव्यं सर्व्वफलसिद्धय इति दर्शयति। भगवतः षडैश्वर्य्यशालिनो विष्णोः। व्यासेन कीर्त्तितं कथितम्। यः पुरुषः श्रेयः परत्र परमपदप्राप्तिरूपं मङ्गलम्। सुखानि च ऐहिकानीति शेषः। यः प्राप्तुम् इच्छेत् स इमं सहस्रनामात्मकं स्तवं पठेत् ॥ १४१ ॥

विश्वेश्वरं जगतामधीशम्। जगतः प्रभवाप्ययं यतो जगतामुत्पत्तिविनाशौ स्याताम्। तं पुष्कराक्षं पुण्डरीकनयनं देवं विष्णुं ये भजन्ति ते पराभवं न यान्तीत्यन्वयः ॥ १४२ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्य श्रीशङ्करभगवत्कृतौ श्रीविष्णोः सहस्रनामभाष्ये सहस्रनामविवृतिः समाप्ता ॥

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com

Downloaded from https://www.holybooks.com